Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अमदावाद्मां श्री खरतरगच्छ संघनी मालीकीनी स्थावर मील्कतनी नोंध ।

संवत् १९९५ ना कारतक शुदि १. अमदावादमां श्री खरतरगच्छ संघनी स्थावर मील्कतनी नोंध नीचे मुजब छे, जे श्रीमद् आचार्य महाराज श्री कृपाचंद्रसूरीश्वरजीना चरित्रमां छपाववा आप्युं छे.

खरतरनी खडकीमां खरतरगच्छनो उपाश्रय, जेनो म्यु. नं. २६८१ नो छे, ते उपाश्रय घणाज जूना वखतनो एटले चारसोथी पांचसो वरस पहेलांनो छे, जेनी अंदर खरतरगच्छना मुनि महाराजो अने साध्वीजीओ उतरता हता, पण उतरवानी घणीज अगवडता पडवाथी खरतरगच्छ संघे संवत् १९८४ नी सालमां आंबली पोळना सामे कोटावाळा शेठ पासेथी मकान वेचाण लईने त्यां मुनि महाराजोने उतरवानुं राख्युं, ते हालमां श्री खरतरगच्छ जैन धर्मशाळाना नामे ओळखाय छे. तेनो म्यु. नं. २८३७ थी २८३७/२२ छे. तेमां उपाश्रयना नीचे ओटला उपर एक दुकान काढीने भाडे आपवामां आवी छे. तेनुं भाडुं वरस १ ना रू. ४२ ) शा. पोपटलाल डाह्याभाई घीवाळा पासेथी आवे छे.

त्रीजो उपाश्रय दादा साहेबनी पोळमां संवत् १९७९ नी सालमां बंधावेलो छे, तेमां हालमां साध्वीजीओ उतरे छे. तेनो म्यु. नं. ३६४/१ छे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दादासाहेबनी पोळमां मूळनायक महाराज श्री शांतिनाथजीनुं देरासर छे, तथा बीजुं श्री आदीश्वरजी महाराजनुं देरासर छे, अने देरासरनी बाजुमां श्री खरतरगच्छ युगप्रधान श्री जिनदत्त सूरीश्वरजीनुं गुरुमंदिर छे. ते देरासर तथा गुरुमंदिरनो वहीवट अमदावादनो खरतरगच्छ संघ करे छे. गुरुमंदिरना अंदरना चोकमां दादा साहेबनी पोळमां उपाश्रयनुं बारणुं पडे छे.

बीजा दादासाहेबनी पोळमां खरतरगच्छनां जे मकानो छे, अने भाडे आपेला छे, तेना भाडवातनां नाम तथा म्यु. नंबर तथा भाडानी रकमनी वीगत—

| भाडवातनुं नाम. | रूपीआ. | नंबर. | |
|---|---|---|---|
| केशवलाल दलीचंद | १०८) | ३६३ | तेनी साथेज सुथारनुं मकान छे, अने तेनो तथा आपणो करो मझीयारो छे. |
| सांकलचंद ताराचंद | १०९) | ३६३/१ | |
| केशवलाल शीवलाल | १०९) | ३६३/२ | |
| भीखाभाई छगनलाल | ११२) | ३६३/३ | |
| चंदुलाल गोकळदास | १६१) | ३६३/४ | तेनी पछीत शेठ माकुभाई मनसुखभाईना मकानोमां पडे छे, अने तेमां जैन भोजनशाळा छे. |
| वाडी फेडरेशन हाईस्कुल | ७२०) | ३६३/५ | तेनी पछीत नवावासमां पडे छे,अने एक बारी जैनभोजनशाळामां पडे छे. |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

| | | | |
|---|---|---|---|
| केशवलाल शीवलाल | ९२) | ३६३/६ | वाडीना ओटला उपर छे. |
| केसरीमल शेराजी | ३६) | | दादाजीनां गुरुमंदिरनो पाछळनो बुरजो, तेनी ओरडी बनावी छे. बुरजानी जोडे जरा आगळ जतां दादासाहेबनी पोळना उपाश्रयनुं मुख्य बारणुं पडे छे. |
| परतापजी मुलाजी | ६०) | ३६४/२ | |
| मंगळदास मोहनलाल | ८४) | ३६४/३ | |
| चंदुलाल मलुकचंद | ९०) | ३६४/४ | तेनी जोडे खरतरगच्छना भाडवातने माटे जाजरु त्रण गटरना बांधेला छे, त्यां एक पीपळो छे, अने सांकळचंद घेलाभाईनो करो पडे छे. |
| चीमनलाल रवचंद | ९०) | ३६७ | तेनो करो शा. जमनादास घहेलाभाईना करानी साथेनो मझीयारो छे. |
| मंगळदास चंदुलाल | ९०) | ३६७/१ | नीचे |
| लखमीचंद मोतीचंद | ९०) | ३६७/१ | ना मेडा उपर |
| मणीलाल उत्तमचंद | १०२) | ३६७/२ | नीचे |
| हीरालाल मुळचंद | १२०) | ३६७/२ | ना मेडा उपर |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





| | | |
|---|---|---|
| सोमचंद मोहनलाल | ९०)<br>रू. २२६३) | ३६७/३ नो करो शेठ राजमल माणेकजीना करा साथे मझीयारो छे. म्यु. नं ३६७ थी ३६७/३ सुधीना चारे मकानोनी पछीत शेठ बालाभाई मंछारामना डेलामां पडे छे, अने ए चारे मकानोनी पछीते बारीओ छे. ( बालाभाई शेठ हालमां पाछीयानी पोळमां रहे छे. ) |

दुकान एक रतनपोळमांथी माणेकचोक तरफ जतां नाका उपर डाबा हाथ तरफ म्यु. नं. ३१२७ नी छे, तेनुं भाडुं रू. १०७१) आवे छे. गांधी कस्तुर अमरशी बेसे छे. तेनो करो शेठ लीलचंद मुलचंदनी दुकाननी साथे मझीयारो छे.

लेरीयापोळमां शा दलसुख पानाचंद संकरनुं मकान छे, जेनी अंदर लेरीया पोळना देरासरनो दस आनी भाग छे, अने दादा साहेबनी पोळना देरासरनो छ आनी भाग छे, तेना भाडाना वरस एकना छ आनी भागना रू. ५०) दर साल आवे छे.

एटले के, भाडानी कुल आवक वरस एकना रूपीआ २३८४) नी आवे छे.

उपर सिवाय शहेर बहार गाम नवरंगपरानी हदमां दादा साहेबनी वाडीना नामे खेतर नंग बे नंबर ५१ अने ५२ नां छे. तेनां नं ५१ नां (एकर ० गुंठा २१) अने नं. ५२ नां (एकर १ गुंठा ५) मळी कुल बे खेतर छे. तेनी अंदर दादा साहेब श्री जिनदत्त सूरीश्वरजीनुं गुरु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंदिर छे. तेमां पांच देरी तथा एक खेतरपाळनी देरी छे. तेनी पासे एक कूवो छे. तेनी बाजुमां दरेकने बेसवा सारु एक मोटो चोतरो बांधेलो छे. तेना उपर छापरुं शेठ अमृतलाल मोहनलाल झवेरीए रू. ९०१) खर्ची पोतानां मातुश्रीना नामथी बनावी आप्युं छे. तेनी बाजुमां एक ओरडो शेठ मंगळदास नगीनदासे तेमना मर्हुम भत्रीजा शांतिलाल मोतीलालना नामथी बंधावी आप्यो छे.

उपरनी मीलकतनो वहीवट श्री खरतरगच्छ संघनी वती वहीवट करनार कमीटीना ट्रस्टीओ नीचे मुजब छे—

१ कोठारी मणिभाई मोहनलाल.
२ शेठ माणेकलाल काळीदास.
३ परी मंगळदास नगीनदास.
४ कोठारी चंदुलाल मोहनलाल.
५ शा. लालभाई फुलचंद.

उपरना पांच ट्रस्टीओनी वती वहीवट करनार कोठारी चंदुलाल मोहनलाल वहीवट करे छे, अने तेमना हाथ नीचे दरेक कामकाज शा. तलकचंद जेठाभाई करे छे. एज. संवत् १९९५ ना कारतक शुदि १ सोमवार.

द. शा. तलकचंद जेठाभाई.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री जिन जय सागर सूरी
ज्ञान भंडार
पालीताणा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अर्हं नमः । ऐं नमः ।

श्रीमज्जिनकीर्त्तिरत्नसूरिशाखाभृत्–श्रीमज्जिनवर्द्धनसूरिसन्तानीय–श्रीबृहत्खरतरबिरुदभृत्–श्रीकोटिकाख्यगच्छाधिपति–

श्रीमज्जिनजयसागरसूरीश्वरप्रणीतम्–

जङ्गमयुगप्रधान–भट्टारकपुरन्दर–सर्वशास्त्रविशारद–जैनाचार्य–

# श्रीमद्–जिनकृपाचन्द्रसूरीश्वरचरित्रम्

## ॥ अथ प्रथमः सर्गः ॥

( मालिनीवृत्तम् )—त्रिभुवननरनारीवृन्दपोपूज्यमानः, प्रथमजिनवरोऽयं निर्जिताऽमर्त्यवृक्षः । जगदवनकरिष्णुः शान्तिकृच्छान्तिनाथो, भवतु सकलसंघश्रेयसेऽनारतं सः ॥ १ ॥ भव–भयहर एकः पार्श्वनाथः शरण्यः, कलुष–वनदवोऽयं मारजिन्नेमिनाथः । चरमजिनपतिः श्रीवर्धमानः कृपालु–र्भवजलधि–सुपोतः श्रेयसे नः सदाऽस्तु ॥ २ ॥

( शार्दूलविक्रीडितम् )—श्रीमान् स्तम्भनसत्पुरे स्थितिकरः श्रीपार्श्वनाथः प्रभुः, सर्वाऽऽशा–परिपूर्णेऽमरतरोरौपम्यमाप्तः क्षितौ । विद्याऽऽढ्योऽभयदेवसूरिरत्नीमध्यस्थितां शाश्वतीं, मूर्तिं यस्य बहिश्चकार सततं दद्यात्सको वः शिवम् ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( उपजातिः )—पद्माऽऽनना वारिजकेसराऽङ्गी, पद्मेक्षणा पद्मवराऽऽसनस्था। श्रीशारदा निर्मलबुद्धिमिष्टां, ददातु सा मे श्रुतदेवता हि ॥ ४ ॥ ( वसन्ततिलका )—श्रीमज्जिनाऽऽदिककृपायुतचन्द्रसूरे–रज्ञान–पुञ्ज–तिमिराऽऽकरपद्मबन्धोः । स्वीयान्यदीय–समयोदधि–पारदृश्व–नः पादपद्म–युगलं बहुशोभि नत्वा ॥ ५ ॥ ( इन्द्रवज्रा )—सर्वानमून् पूज्यतमान् प्रणम्य, संस्मृत्य चित्ते स्वगुरोः क्रमाऽब्जम् । पद्यप्रबन्धेन गुरोश्चरित्रं, रम्यं पवित्रं रचयाम्यहं तत् ॥ ६ ॥ ( शिखरिणी )—युगाऽऽरम्भेऽभूवन्निपुदशमितास्ते कुलकराः, सधर्माणः सर्वे युगलिकतया जातजननाः। जगन्मान्या धन्या बहलमहिमानोऽतिसुखिन–स्तदेषां नामानि प्रथितयशसां वित्त सुजनाः ! ॥ ७ ॥ ( आर्या )—सुमतिः प्रतिश्रुतिः सी–मङ्कराऽसीमन्धर–क्षेमङ्कराः । क्षेमन्धरश्च विमल–वाहनश्चक्षुष्मान् यशोमान् ॥ ८ ॥ ( अनुष्टुप् )—अभिचन्द्रश्च चन्द्राभो, द्वादशश्च प्रसेनजित् । मरुदेवाऽभिधो नाभि–र्ऋषभस्तीर्थकृत्तथा ॥ ९ ॥ ( उपजातिः )—नाभेयकाऽऽद्यास्तदनन्तरं हि, वीराऽन्तिमास्तीर्थकृतो बभूवुः । युगाऽक्षिमात्रा अवनीतलेऽस्मिं–स्तदन्तरे द्वादश चक्रिणश्च ॥१०॥ षट्खण्डभूमीपरिशासितारो, महौजसः श्रीभरताऽऽदयस्ते । विपक्षकक्ष–व्रज–पावका हि, क्रमेण नीत्या ह्यशिषन् प्रजास्ताः ॥ ११ ॥ बभूवुरेतद्द्वयकाऽन्तराले, सुग्रीवकाद्याः प्रतिवासुदेवाः । नव त्रिपृष्ठाऽऽदिकवासुदेवा, नवाऽभवंस्ते क्रमशः पृथिव्याम् ॥ १२ ॥ त्रिखण्ड–पृथ्वीपरिरक्षितारः, संग्राम–लब्धाऽतुलकीर्तिमन्तः । महाबलिष्ठा अचलाऽऽदयोऽपि, नवैव जाता बलदेवसंज्ञाः ॥ १३ ॥ प्रचण्डदोर्दण्डबलेन चैते, निःशेष–वैपक्षिक–पक्षमाशु । हत्वा वरीत्वा विजयश्रियं हि, सौख्यं विशेषं चिरमन्वभूवन् ॥ १४ ॥ ( शार्दूलविक्रीडितम् )—एकं द्व्यङ्क–र्हं रिच्छिवाऽर्क–गुणदिक्–पाथोधिचिन्द्रेषु–भू–तर्कैकाऽब्धि–दलप्रमाणजिनपानां तुल्यकालेऽभवन् । श्रीमद्भीमबलादयः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिवमिता रुद्राभिधानाः क्रमा–दत्यन्ताद्भुतशक्तिशालिपुरुषा आदर्शभूता इह ॥ १५ ॥ ( उपजातिः )—श्रीवासुदेव–प्रति-वासुदेव—काले बभूवुर्नव नारदा हि । देवैर्मनुष्यैरसुरैश्च पूज्या, अखण्डशीला गगनप्रयाणाः ॥ १६ ॥ ( गीतिः )—तस्या-धिकमधिगन्तुं, महापुरुषचरित–प्राकृतग्रन्थः । आवश्यकबृहद्वृत्तिः, त्रिषष्टिशलाकापुरुष–चरितं च ॥ १७ ॥

( उपगीतिः )—शत्रुञ्जयमाहात्म्य–प्रमुख–ग्रन्था विलोकनीयाः । ग्रन्थविस्तारभीत्या, नास्माभिः सकलं तदलेखि ॥१८॥ ( अनुष्टुप् )—बभूवुर्वर्द्धमानस्य, चरमस्यार्हतः प्रभोः । गणधारिण एते हि, रुद्रदंष्ट्रा महाधियः ॥ १९ ॥ ते चतुर्दशपूर्वाणां, वेत्तारस्त्रिपदीधराः । द्वादशाङ्गानि बिभ्राणा, लब्धिमन्तः कृपालवः ॥ २० ॥ शिष्योपज्ञत्वमापन्ना, अर्हतः परमेशितुः । एषामेतानि नामानि, प्रसङ्गाद्दर्शयाम्यहम् ॥ २१ ॥ इन्द्रभूतिरभूदाद्य–श्चाऽग्निभूतिर्द्वितीयकः । तृतीयो वायुभूतिश्च, व्यक्त-श्चाऽऽसीत्तुरीयकः ॥ २२ ॥ सुधर्मा पञ्चमो जज्ञे, षष्ठो जातश्च मण्डितः । सप्तमो मौर्यपुत्रो हि, त्वष्टमोऽभूदकम्पितः ॥ २३ ॥ नवमो गणधारी चा–चलभ्राता प्रकीर्तितः । मेतार्यो दशमो जज्ञे, प्रभासस्त्वन्तिमो मतः ॥ २४ ॥ ( वसन्ततिलका )—सत्स्व-प्यमुष्य चरमस्य जिनेश्वरस्य, तावत्प्रमाण–गणपेषु समुल्लसत्सु । द्विद्विप्रवाचन–गतैकतया बभूवुः, ख्याता गणा नवमिता इति चक्षते हि ॥ २५ ॥ (उपजातिः)—विदेहतीर्थाधिपतिं प्रवन्दे, विश्वाद्भुताऽशेष–गुणाऽभिरामम् । वन्दे सुधर्माणमभीष्टिऽ-(प्सि)ताऽर्थ—सम्प्राप्तये नित्यमघच्छिदं हि ॥ २६ ॥ ( द्रुतविलम्बितम् )—चरमकेवलिनं प्रभुजम्बुकं, परिणुमः प्रथिताऽम-लकीर्तिकम् । शिवपदं परमं समुपागतं, प्रबलमोहविजित्वरमाघदम् ॥ २७ ॥ ( अनुष्टुप् )—चरमः केवली जम्बू–स्वामी श्रीप्रभवाऽभिधः । शय्यम्भवो यशोभद्रः, सम्भूतिविजयाभिधः ॥ २८ ॥ भद्रबाहुः स्थूलिभद्रः, षडेते वरसूरयः । श्रुतकेवलि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नोऽभूवुः (वन्), शारदेन्दुयशोधराः ॥ २९ ॥ महागिर्यादिका अष्टौ, वज्रान्ता दशपूर्विणः । व्युच्छित्तिं च ततः पश्चा-दगमद्दशमो हि सः ॥ ३० ॥ श्रीमहागिरिनामानं, सुहस्त्याचार्यकं परम् । सुस्थिताऽभिधमाचार्यं, तं श्रीसुप्रतिबद्धकम् ॥ ३१ ॥ इन्द्रदिन्नाऽभिधं दिन्न,-सूरिं वन्दामहे भृशम् । आचार्यं सिंहगिर्याख्यं, वज्रस्वामिनमेव च ॥ ३२ ॥ वज्रसेनाऽभिधं चन्द्रं, सामन्तभद्रकं ततः । देवं प्रद्योतनं स्तौमि, मानदेवाऽभिधं नुमः ॥ ३३ ॥ आचार्यं मानतुङ्गाऽऽख्यं, वीरं सूरीश्वरं तथा । जयदेवाऽभिधं सूरिं, देवानन्दं महाधियम् ॥ ३४ ॥ विक्रमं नरसिंहाऽऽख्यं, समुद्रविजयं तथा । मानदेवं नमस्यामि, विबुध-प्रभसूरिकम् ॥ ३५ ॥ जयानन्दमभिष्टौमि, कीर्तिमन्तं रविप्रभम् । यशोभद्राऽभिधं सूरिं, श्रीमद्विमलचन्द्रकम् ॥३६॥ देवच-न्द्राऽभिधं नौमि, नेमिचन्द्रं नमामि तम् । सूरिमुद्योतनं स्तौमि, वर्द्धमानं जिनेश्वरम् ॥ ३७ ॥ जिनचन्द्रप्रभुं भक्त्या-ऽभयदेवमभिष्टुवे । जिनवल्लभनामानं, जिनदत्तं प्रभाविनम् ॥ ३८ ॥ जिनचन्द्राऽभिधं सूरिं, जिनपतिं यतीन्द्रकम् । लक्ष्मीजिनेश्वरौ वन्दे, श्रीसंघसुखकारिणौ ॥ ३९ ॥ जिनप्रबोधमाचार्यं, जिनचन्द्रं यतीश्वरम् । जिनकुशलनामानं, पद्मसूरिं च नौम्यहम् ॥ ४० ॥ जिनलब्धिमहं वन्दे, जिनचन्द्र–जिनोदयौ । जिनराजाऽभिधं सूरि–माचार्यं जिनभद्रकम् ॥ ४१ ॥ जिनचन्द्राऽऽख्यमाचार्यं, श्रीमज्जिनसमुद्रकम् । जिनहंसमभिष्टौमि, जिनमाणिक्यसूरिकम् ॥ ४२ ॥ (पञ्चचामरम्)—महागिरिं श्रियाऽन्वितं मुनीश्वरं शमाऽम्बुधिं, जगज्जनाऽऽधिवारकं दयालुतासुमन्दिरम् । नमामि सूरिनायकं जिनागमाब्धिपारगं, समस्तलोकमानितं विशालकीर्तिमण्डितम् ॥ ४३ ॥ सुहस्तिसूरिराजकं ह्यशेष–सद्गुणाऽऽकरं, रविप्रभा–समप्रभं सुधा–समानदे-शनम् । विवादि–वृक्ष–कुञ्जरं जगद्धितप्रवर्तकं, भृशं स्तवीमि सादरं भवाम्बुधिप्रतारकम् ॥ ४४ ॥ (उपजातिः)—श्रीसुस्थि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताऽऽख्यं प्रणमामि सूरिं, जगज्जनाऽऽनन्दकरं प्रभासम् । सद्वीमतामादिममर्च्यवर्यं, विद्वत्तमं बोधितभूरिलोकम् ॥ ४५ ॥

( शार्दूलविक्रीडितम् )—श्रीमत्सुप्रतिबद्धसूरिमनिशं तोष्टोमि सत्कीर्तिकं, श्रीमद्वीरविभु-प्रशासन-सरोजस्तोम-हंसायितम् । लोकाऽज्ञान-तमिस्रपुञ्ज-हरणे सूर्यायितं भूतले, सद्बोधाऽमृतपायिनं सुभविनां संसारवार्धौ तरिम् ॥ ४६ ॥

( आख्यानकी )—तमिन्द्रदिन्नाऽभिधसूरिवर्यं, संसार-बाधा-दव-वारिवाहम् । वादीन्द्र-दन्तिव्रज-सिंहकल्पं, भक्त्याऽभिवन्दे जगदर्चनीयम् ॥ ४७ ॥ ( उपजातिः )—श्रीदिन्नसूरिं प्रथितप्रताप-मदभ्रमाहात्म्यमुपेतवन्तम् । कारुण्यकूपं कुमताऽब्जशीतं, स्तवीम्यहं निर्मलकीर्तिमन्तम् ॥ ४८ ॥ सिंहोरुसत्त्वं विलसच्चरित्रं, जगत्पवित्रं निरवद्यशीलम् । अध्यात्मविज्ञानवतां वरिष्ठं, नोनोमि तं सिंहगिरिं च सूरिम् ॥ ४९ ॥ ( शार्दूलविक्रीडितम् )—वज्रस्वामिनमानतक्षितिभुजां मौकुट्यरत्न-प्रभा-भास्वत्पादनखप्रभं सुयमिनामग्रेसरं श्रीकरम् । सद्ध्यानाऽसि-हताऽऽन्तरार(रि)मनघं दुर्वादिपक्षच्छिदं, ह्यर्हद्भाषित-शुद्धधर्मजलजप्रोल्लासिभानुं स्तुवे ॥५०॥ ( उपजातिः )—श्रीवज्रसेनाऽभिधसूरिवर्यं, सर्वेषु शास्त्रेषु कृतश्रमं च । यशोऽभिरामं सुतपःप्रतिष्ठं, जितेन्द्रियं तं शिरसा नमामि ॥ ५१ ॥ चन्द्राऽऽख्यमाचार्यवरं प्रणौमि, चन्द्राऽवदाताऽमलकीर्तिमन्तम् । सूर्योग्रतेजिष्ठमतुच्छबुद्धिं, त्रिगुप्तिमन्तं ( गुप्तं ) शमताम्बुराशिम् ॥ ५२ ॥ समन्तभद्रं धवलीकृताऽऽशं, शङ्खेन्दु-कुन्दोपमयाऽऽत्मकीर्त्या । सूरीश्वरं सर्वमत-प्रविज्ञं, प्रकाममीडे कमनीयमूर्तिम् ॥ ५३ ॥ प्रद्योतनं सूरिवरं नमामि, प्रद्योतनांऽशुप्रतिमानभासम् । सम्पूजनीयाङ्घ्रिसरोजयुग्मं, सत्कीर्तिमालं ह्यभिवादयेऽहम् ॥ ५४ ॥ ( वसन्ततिलका )—श्रीमानदेवयतिराजमुदार-कीर्तिं, स्वीयाऽन्यदीय-मतसागरपारयातम् । सन्मुक्तिमार्गपरिदर्शनदक्षिणं च, सन्तोष्टवीमि शरणाऽगतदुःखवारम् ॥ ५५ ॥ श्रीमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नतुङ्गमनघं मुनिराजमेनं, नैदाघ-भानुसम-दुःसह-दीप्तिमन्तम् । निःशेष-भूमिजनतामहितं समीडे, नानानृपालसदसि प्रकटप्रभावम् ॥ ५६ ॥ ( शार्दूलविक्रीडितम् )—वीरं सूरिवरं नमामि शिरसा दुर्जय्य-मोह-क्षितेः, कर्तारं भुवि देहिनामघततेर्हन्तारमिष्टप्रदम् । कर्मोन्मूलन-संविधानकुशलं सम्यक्त्वसम्प्रापकं, संसाराऽर्णवतारकं सुभविनां ध्येयक्रमाऽम्भोरुहम् ॥ ५७ ॥

( त्रोटकम् )—जयदेव-सुनामकसूरिवरं, जनता-भवभीति-विनाशकरम् । शरणाऽऽगत-दीनजनाऽऽर्तिहरं, करुणामयमूर्तिमहं स्तुवके ॥ ५८ ॥ ( शार्दूलविक्रीडितम् )—येनाऽकारि सुशासनस्य बहुधा सौन्नत्यमुर्वीतले, जित्वाऽनेक-विवादिवृन्दमसकृच्चक्रे स्वपक्षस्थितिः । माहात्म्यं विजयश्रिया सह परं व्यस्तारि विद्याऽब्धिना, देवानन्दमभिष्टवीमि तमहं सूरीश्वराऽग्रेसरम् ॥ ५९ ॥ ( उपजातिः )—श्रीविक्रमं विक्रमवन्तमीडे, सच्छास्त्रपारीणमगाधबुद्धिम् । सत्कीर्तिवल्लीललितालवालं, सूरीश्वरं शान्ततमं वरिष्ठम् ॥ ६० ॥ सिंहोरुसत्त्वं नरसिंहसूरिं, क्षान्त्या च पृथ्वीसमतामुपेतम् । कान्त्या महत्या शशिनः समानं, तेजोऽधिकैर्भानुसमं समीडे ॥ ६१ ॥ जाज्वल्यमानं विहिताऽतिघोर-तपःप्रभूतोत्थिततेजसा हि । रत्नत्रयीभूषणभूषितं तं, समुद्रसूरिं प्रणमामि नित्यम् ॥ ६२ ॥ आचार्यवर्यव्रज-मौलिरत्नं, श्रीमानदेवं यशसाऽभिरामम् । नमस्यतां पापतरोः कुठारं, सम्पश्यतामव्ययसौख्यदायम् ॥ ६३ ॥ ( त्रोटकम् )—विबुधप्रभसूरिवरं जयिनं, जगदुज्ज्वल-भूरि-सुकीर्तिकरम् । कतिजन्म-सुसञ्चित-पापहरं, निजभक्तिकृतामनिशं प्रणुमः ॥ ६४ ॥ ( भुजङ्गप्रयातम् )—जयानन्दसूरिं नमामि प्रकामं, भवाब्धिप्रतारं समेषामुदारम् । लसत्कीर्तिमालं ज्वलत्सत्प्रतापं, जितात्मानमुच्चैः शरण्यं वरेण्यम् ॥ ६५ ॥

( प्रमाणिका )—रविप्रभं विभासुरं जगज्जनैः समीडितं, ह्यपारधाममन्दिरं समस्तसूरिनायकम् । अनेक-भूप-चर्चित-क्रमा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽरविन्दकद्वयं, नमामि जैनशासन-प्रभूत-वृद्धि-कारकम् ॥ ६६ ॥ ( शिखरिणी )—यशोभद्रं सूरिं भविकजनताऽज्ञानतिमिरं, प्रहातुं भास्वन्तं समुदितममुं नौमि सततम् । कृपापारावारं सकल–वसुधापावनकरं, भवाऽम्भोधौ मज्जत्सुजननिवहानां दृढतरिम् ॥ ६७ ॥ ( द्रुतविलम्बितम् )—विमलचन्द्रशुभाऽभिधसद्गुरुं, प्रथित–विश्वजनीनमघाऽपहम् । स्व–पर–शास्त्र–विशेष–विचक्षणं, सुयशसं परिणौमि महत्तरम् ॥ ६८ ॥ ( उपजातिः )—श्रीदेवचन्द्राऽभिधमुख्यसूरिं, शिष्योपशिष्यैः परिषेविताङ्घ्रिम् । ककुब्गणं मण्डितमात्मकीर्त्या, तं लोकमान्यं विबुधं स्तवीमि ॥ ६९ ॥ श्रीनेमिचन्द्रं वरसूरिराजं, प्रौढप्रतापं शरदिन्दुकीर्तिम् । श्रीवीतरागोदित–धर्म्म–पद्म—दिवाकरं प्राज्ञतमं प्रवन्दे ॥ ७० ॥ श्रीमन्तमुद्योतनसूरिराजं, प्रेक्षावतामग्र्यतमं समीडे । प्रभाविनं निर्मलकीर्तिमन्तं, सद्धर्मसेतुं कुमतैककेतुम् ॥ ७१ ॥ श्रीवर्द्धमानं जनगीयमान—यशःश्रिया सत्तपसां श्रिया च । शोशुभ्यमानं जितमोहमल्लं, हताऽऽन्तराऽऽरं विबुधं नमामि ॥ ७२ ॥ ( पञ्चचामरम् )—जिनेश्वरं प्रभावकं विशेष–शेमुषीधरं, ह्यखण्ड–शील–शालिनं दयालुतासुमण्डितम् । अनेकशास्त्रवेदिनं सभा–सुवादि जित्वरं, समस्त–जीवपालकं नमामि तं गुणोदधिम् ॥ ७३ ॥ ( तोटकवृत्तम् )—जिनचन्द्रमदभ्रसुकीर्तिकरं, जनता–भवभीति–कुबुद्धिहरम् । पुनरागमहारिमहाव्रतिनं, प्रणमामि सदा सकलार्तिश(ह)रम् ॥ ७४ ॥ ( द्रुतविलम्बितम् )—सुजन–वारिजराजिनभोमणिं, शम–दमाऽऽदि–समस्तगुणाऽऽश्रयम् । शशिकलाऽमलकीर्तिलताऽऽकुलं, ह्यभयदेवयतीशमभिष्टुवे ॥ ७५ ॥ ( शार्दूलविक्रीडितम् )—श्रीमन्तं जिनवल्लभं सुविदुषामग्रेसरं सत्तमं, मार्तण्डप्रभमुन्नतं सुयशसा चन्द्रोपमेन क्षितौ । संसाराब्धि--निमज्जतामसुमतां पोतायमानं प्रभुं, स्वीयोदार-चरित्र-चित्रितभुवं सन्नौमि सूरीश्वरम् ॥ ७६ ॥ नक्षत्रेशसुशीतलं दिनमणि-प्रस्फारतेजस्विनं, भक्त्यानम्र–धराधिपेन्द्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुकुटप्रोद्भासिरत्नांशुभिः। दीप्राऽङ्घ्रिस्थपुनर्भवं वितरणे स्वःशाखिसाम्यङ्गतं, प्राचार्यं जिनदत्तसूरिमनघं नौमीड्यवर्यं प्रभुम् ॥ ७७ ॥ ( त्रोटकम् )—जिनचन्द्रममुं समशास्त्रविदं, जिनधर्मविकाशकसूरिवरम् । भवरोगमहौषधदानकरं, प्रणमामि सदा तमभीष्टदुहम् ॥ ७८ ॥ ( मालिनी )—जिनपतिवरसूरिः सर्वशास्त्रप्रवीणः, सुरतरुरिव लोके कामितैकप्रदित्सुः । अतुलबलयशोभिः शोभमानोऽत्र योऽभूत्, तमनिशमहमीडेऽचिन्त्यमाहात्म्यमेनम् ॥ ७९ ॥ ( पञ्चचामरम् )—जिनेश्वरं प्रणौम्यहं सुतेजसं जगद्गुरुं, समस्तसूरिमण्डलेऽद्वितीयभासुरं प्रभुम् । परोपकारिताऽऽदिभिर्विशिष्टसद्गुणैः श्रितं, सदा स्वकीयकर्मणि प्रदक्षतामुपागतम् ॥ ८० ॥ ( उपजातिः )—जिनप्रबोधं यमिनां वरिष्ठं, दिक्षु प्रसारिप्रचुराऽवदातम् । यशश्चयं बिभ्रतमाप्तवर्यं, शास्त्रेष्वभिज्ञं विविधेषु नौमि ॥ ८१ ॥ ( त्रोटकम् )—जिनचन्द्रमपास्तकषायगणं, बहुलप्रतिबोधित–भव्यजनम् । सदनन्तपदप्रतिपित्सुममुं, परिणौमि महान्तमनङ्गजितम् ॥ ८२ ॥ ( मालतीवृत्तम् )—जिनकुशलं घनशास्त्रकोविदं, जगति जनाऽधिकबोधकारकम् । अनुपमकीर्तिलता–सुवेष्टितं, सुधियममुं परिणौमि सर्वदा ॥ ८३ ॥ ( प्रमिताक्षरावृत्तम् )—जिनपद्मसूरिमनघं जयिनं, वसुधा–प्रसिद्ध–बहुकीर्ति–कलम् । सकलाऽऽगमज्ञमतुलं तपसा, परिचिन्तयामि सततं हृदये ॥ ८४ ॥ जिनलब्धिसूरिमतिधीरधियं, जनता–सुपूज्य–चरणाब्जयुगम् । (परितोदधामि हृदयाब्जदले) शमता–सुधारस–निमग्नतरम् ॥ ८५ ॥ सुजनाऽम्बुजव्रजविकाश–रविं, भविनां भवाऽब्धितरणे तरणिम् । यमिनां वरिष्ठजिनचन्द्रगुरुं, परिणौमि सूरिवरमीड्यतमम् ॥ ८६ ॥

( उपजातिः )—जिनोदयाऽऽख्यं वरसूरिराजं, जितेन्द्रियं तत्त्वविदां वरिष्ठम् । यशस्विनामादिममेनमीडे, कुबुद्धिकान्तारदवानलं हि ॥ ८७ ॥ ( तोटकम् )—जिनराजमगाधमतिं गुणिनं, कलुषौघमहीध्रपविं सुविदम् । शरणागतवत्सलमृद्धिकरं,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकलाऽऽर्हतपूज्यतमं प्रणुमः ॥ ८८ ॥ ( मञ्जुभाषिणी )—जिनभद्रसूरिमखिलाऽऽर्हतैर्जनैः, परिपूज्य मान-पदसारस-द्वयम् । अतिदुर्लभाऽव्यय-पदाऽऽप्तिकारकं, परिणौमि तारकवरं त्रिगुप्तिकम् ॥ ८९ ॥ परमाऽऽर्हतीय-हृदयाऽब्जभास्करं, मद-नाऽतिदर्प-दलनाऽतुलौजसम् । निज-भक्त-चित्त-शमताविधायकं, जिनचन्द्रसूरिमनिशं नमाम्यहम् ॥ ९० ॥

( द्रुतविलम्बितम् )—-जिनसमुद्रमशेषविवादिनां, सदसि जित्वरमागमपारगम् । अभयदानपरव्रतमुज्ज्वलं, प्रथितसूरिवरं प्रणुमः प्रभुम् ॥९१॥(मञ्जुभाषिणी)—जिनहंससूरिमवनीभुजाऽऽदिभिः, पूजिताऽङ्घ्रिपद्म-युगलं दयानिधिम् । निरवद्य-विद्यमति-हृद्यदेशनं, ह्यभिवादये तमनिशं प्रभासुरम् ॥ ९२ ॥ ( वैतालीयम् )—दिनमणिसम-तानव-त्विषं, श्रीजिनमाणिक्याऽभिधा-नकम् । प्रणमामि प्राणिरक्षिणं, स्व-पर-समयविदुषां पुरःसरम् ॥ ९३ ॥ ( उपजातिः )—श्रीमन्तमेनं जिनचन्द्रसूरिं, वशीकृ-ताऽनेकसुरं महान्तम् । सुखस्थितं गुर्जरदेशमध्ये, रम्ये पुरे पट्टणनामधेये ॥९४॥ अकब्बराख्यः पृथिवीपतीन्द्रः, आकर्णिततद्बहु-चित्रशक्तिः । विज्ञप्तिपत्रैरतिभक्तिपूर्णैः, प्राजूहवत्तं वरलाभपुर्याम् ॥ ९५ ॥ ( युग्मम् ) युगप्रधानः स हि संविहृत्य, क्रमेण तत्राऽभ्युपयात एषः । चमत्कृताऽनेकविशेषशक्तिं, प्रादीदृशत्तं यवनाऽधिराजम् ॥ ९६ ॥ निरीक्ष्य लोकोत्तरशक्तिमस्य, निपीय पीयूषसमोपदेशम् । अमोमुदीच्छ्रीयवनाऽधिपेन्द्र--श्चमत्कृतः सत्कृतवांश्च सूरिम् ॥९७॥ अमारिघोषं समचीकरत्स, पर्यूषणादौ गुरुपर्वघस्रे । धर्मं विशुद्धं परमार्हतं हि, गुरूपदेशादमताऽवनीपः ॥९८॥ ( स्रग्धरा )—तत्पट्टे सिंहसूरिः समभवदतुलः प्रोल्ल-सत्कीर्तिशाली, सर्वाऽऽशाव्याप्त-तेजा रविरिव सकलाऽज्ञान-तामिस्रहन्ता । बुद्ध्या वागीशकल्पः सुरतरुवदसौ याचकाऽर्थ-प्रदाता, निर्मुक्ताऽशेषमोहः क्षितितलविजयी शासनौन्नत्यकारी ॥ ९९ ॥ ( वसन्ततिलकावृत्तम् )—श्रीमानशेषगुणवाञ्जिनराज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सूरिः, पट्टं तदीयविमलं समलञ्चकार । सूर्यः सुराद्रिमिव जैनजनाऽब्जबन्धुः, पापौघ–गाढ–तिमिर–व्रजनाशकारी ॥ १०० ॥

(उपजातिः)—अमुष्य पट्टं जिनरत्नसूरि–रध्यास्त सर्वाऽऽगम–पारदृश्वा । वादीन्द्रजिष्णुः प्रभविष्णुरेष, दिगन्त–विख्यात-विशालकीर्तिः ॥१०१॥ श्रीजैनचन्द्रोऽभवदेतदीय–पट्टे निषण्णः शरदिन्दुकीर्तिः । विद्यानिधिस्तत्त्वविचारदक्षः, संसारकूपाज्जन-तोद्धरिष्णुः ॥ १०२ ॥ विद्वत्तमः श्री जिनसौख्यसूरि–रुपाविशच्चारुतदीयपट्टे । सर्वासु दिक्षु प्रततान कीर्त्तिं, प्राबूबुधद् भूरिज-नांश्च तत्त्वम् ॥ १०३ ॥ ( वसन्ततिलका )—तत्पट्ट–मेरुशिखरोदित–लोकचक्षुः, सल्लोक–हृद्य–कुमताऽन्धनिराकरिष्णुः । निर्वाण–पद्म–विचकासनहेतुभूतः, प्रादिद्युतज्जगदिदं जिनभक्तिसूरिः ॥१०४॥ एतत्क्रमाऽब्ज–मकरन्द–मिलिन्द एष, योगीश-वृन्दपरिजुष्ट–पदाऽरविन्दः । विश्वाऽतिशायियशसा परिपूरिताऽऽशः, प्रज्ञाऽधिकः समभवज्जिनलाभसूरिः ॥ १०५ ॥

( शार्दूलविक्रीडितम् )—अब्ध्यग्न्यङ्ग[१६३४]–वसुन्धराप्रमितिके श्रीवैक्रमे वत्सरे, मासे चाऽऽश्वयुजे सुमेचकदले स्मारे तिथौ सत्पुरे । गूडाख्ये प्रतिपद्य सूरिपदवीं गुर्वासने तस्थिवान्, स श्रीमाञ्जिनचन्द्रसूरिरनघः श्रीसङ्घभूत्यै भवेत् ॥ १०६ ॥ रम्ये सूर्यपुरे कुशाऽग्रमतिमाञ्जाते च चारूत्सवे, श्रीमद्गौरवमासनं सुविधिनाऽध्यासिष्ट सूरीश्वरः । श्रीमच्छ्रीजिनहर्षसूरिरपरो भास्वा-निवोद्यन् क्षितौ, शान्त्यादिप्रगुणाऽऽकरो विजयिनामग्रेसरोऽस्तु श्रिये ॥ १०७ ॥ श्रीमद्विक्रमहायने दल–निधानाऽष्ट–क्ष्मा[१८९२]सं-ख्यके, मार्गे मासि सिते दले गुरुदिने लक्ष्मीपतेः सत्तिथौ । ख्याते विक्रमपत्तने सुविहिते संघेन चारूत्सवे, आचार्या-सनमारुरोह विधिवल्लग्ने शुभे यः सुधीः ॥ १०८ ॥ स श्रीमज्जिनपूर्वकः सुमहिमा सौभाग्यसूरीश्वरो, नानाशास्त्रविच-क्षणः सुगरिमा चारित्ररत्नोज्ज्वलः । मोहाऽरातिविषूदनः सुभविनां पापौघविद्रावणः, षट्त्रिंशद्गुणधारकः प्रणमतां तन्तन्तु



For Private And Personal Use Only

नः सच्छ्रियम् ॥ १०९ ॥ ( युग्मम् ) वर्षे नाग–धराग्रहेन्दु[१९१८]तुलिते मासे तपस्ये शुभे, पक्षे स्वच्छतरे तिथौ मधुरिपोर्गीर्वाण-वन्द्ये दिने । श्रीमद्विक्रमनामधेयनगरे जाते गरिष्ठे महे, षट्त्रिंशद्‌गुणभूषितं गुरुतरं सौरं पदं प्राप्तवान् ॥ ११० ॥ सोऽयं श्रीजिनहंससूरिरनिशं दादेतु नः सच्छिवं, सद्वक्ता सदसि प्रवादिनिवहाऽशेष–प्रभाहारकः । योगीन्द्रः क्षिति--सन्तताऽमलयशाः प्रौढप्रतापानलः, संसारार्णवतारकः शुभधियां सद्भक्तशर्मप्रदः ॥ १११ ॥ ( युग्मम् ) अब्दे बाण–गुणा[१९३५]ऽङ्क–भूमितुलिते सम्वत्सरे वैक्रमे, माघे मासि सिते दले गुरुदिने सत्पूर्णिमायां तिथौ । दुर्गे विक्रमसत्पुरे बहुविधैरारब्धचारूत्सवै—राचार्या-ऽऽसनमध्युवास महिमाऽकूपार उग्रप्रभः ॥ ११२ ॥ सैष श्रीजिनचन्द्रसूरिरखिलाऽऽशाव्याप्तकीर्तिव्रजो, मार्तण्डद्युतिमावहन् बुधवरांस्तोतोषयन् विद्यया । श्रीसंघं परिमोदयन्नतितरां चन्द्रश्चकोरानिव, व्याख्यानाऽमृतपायनैरहरहस्तन्तन्तु शं नः सदा ॥ ११३ ॥ वर्षे तर्क–शरा[१९५६]ङ्क–चन्द्रगणिते सूर्जे सुमासेऽसिते, पक्षे चन्द्रसुवासरे फणितिथावाचार्यतामाप्तवान् । श्रीमद्विक्रमसु-प्रसिद्धनगरे जाजायमानोत्सवे, श्रीमच्छ्रीजिनकीर्तिसूरिरनिशं बोभोतु नः श्रेयसे ॥ ११४ ॥ ( उपजातिः )—तुरङ्ग–तर्क–ग्रह[१९६७]चन्द्रवर्षे, माघेऽसिते भोगितिथौ सुवारे । समीयिवान् सूरिपदं जिनाऽऽदि—चारित्रसूरिर्जयतु प्रविद्वान् ॥ ११५ ॥

( मालिनी )—खरतरगणनाथः सच्चरित्रः पवित्रः, कृत–विविध–तपस्या–निर्धुताऽशेषपापः । अधिगत–कतिशास्त्रः प्राप्त-भूरिप्रतिष्ठः, स भवतु जिनचारित्राऽभिधः श्रेयसे नः ॥ ११६ ॥ ( इन्द्रवज्रा )—स दीनबन्धुः करुणैकसिन्धु–र्युगप्रधानो विगताभिमानः । प्रविस्तृणातु प्रभुरेष शर्म, प्रभावकः श्रीजिनभद्रसूरिः ॥ ११७ ॥ ( शार्दूलविक्रीडितम् )—षट्त्रिंशद्गुणरत्न-वारिधिरसौ सच्छङ्खवाले कुले, जातः स्वीय-विशुद्ध-गच्छ–जलज-प्रोल्लासने भानुमान् । पादाब्ज-प्रणताऽखिल-क्षितिपतिः सद्दीप-

चन्द्राऽङ्गजः, सूरिः श्रीजिनकीर्तिरत्नविमलाख्यो नः श्रिये जायताम् ॥ ११८ ॥ ( वसन्ततिलका )—भूम्यग्नि-वेद[१४३१]-धरणी-
मितहायनेऽसौ, प्रादुर्बभूव रस-वेद-युगेन्दु[१४४६]वर्षे । दीक्षां ललौ शशि-षडब्धि-[१४६१]धरामिताऽब्दे, जग्राह सूरिपदवीं जिनवर्द्धनाऽऽख्यः
॥११९॥ सूरीश्वरः सकल-तन्त्र-गभीरबुद्धि–भूमण्डल–प्रसृत-शारदचन्द्रकीर्तिः । श्रीवीरशासन-विकासन-कारकोऽसौ, वार्जि-ग्रहा-[१४९७]
ऽब्धि-शशिनि स्वरगाच्च वर्षे ॥१२०॥ ( युग्मम् ) शैलाऽब्धि–वेद–शशि–सम्मितवत्सरे[१४४८]ऽसौ, जन्माग्रहीत् क्षिति-रसोदधि-[१४६३]भू-
मिवर्षे । आदाद् व्रतं शर तुरङ्ग-युगैकवर्षे[१४७५], माघे सिते शुभदिने जिनभद्र एषः ॥१२१ ॥ सम्प्राप सूरिपदमुत्तमसिद्धतेजा राका-
तिथौ युग मही-शर[१५१४]–भूमिताऽब्दे । मार्गेऽसिते हिमगिरीन्द्रसुता-सुतिथ्यां, यातो दिवं कुभलमेरुपुरे महीयान् ॥१२२॥ (युग्मम्)

( पृथ्वी )—चतुर्दशसमावयाः सकलसम्पदं लोष्ठवद्, विहाय शुभहायने दहन–तर्क–वेद[१४६३]–क्षितौ । शुभङ्कर-कराब्जतः
स जिनवर्द्धनस्य प्रभोः, शुचावसित पक्षके शुभदविश्वतिथ्यामसौ ॥ १२३ ॥ ( मन्दाक्रान्ता )—दीक्षां लात्वा ख-मुनि-जल-
धीन्दुप्रमाणे[१४७०] च वर्षे, संलेभानो गणिपदमसौ सर्वशास्त्राऽवगाही । सोपाध्यायस्तदनु समभूद्विन्दु–वस्वब्धि[१४८०]–चन्द्रे, सप्ताऽ-
ङ्काऽब्धि–क्षिति–मित–समायामभूत्सूरिभाजः ॥ १२४ ॥ ( युग्मम् ) ( उपजातिः )—श्रीकीर्तिरत्नाऽभिध-सर्वसूरि–चूडा-
मणिर्विश्वगुणाऽभिरामः । जगद्धिताऽनेक-सुकृत्य-कर्ता, पायात् सदा नः सुसुतान् पितेव ॥१२५॥ आजन्म–शीलव्रत–जात–
तेजो–देदीप्यमानः सवितेव लोके । सुधांशुवच्छीतलशान्तमूर्ति–रासीदसौ शासनदीप्तिकारी ॥ १२६ ॥ प्रधानशिष्यः सम-
भूदमुष्यो–पाध्याय एष प्रथितः सुविद्वान् । श्रीमानशेषाऽऽगमसत्पटीयाँ–ल्लावण्यशीलो गणभृत्कलावान् ॥ १२७ ॥ एतस्य
शिष्यो विनयी बभूवो–पाध्यायभाजो निरवद्यविद्यः । मान्यः सतां विश्वजनीन आर्त–त्राता विधाता जनता–सुखस्य ॥१२८॥



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीपुण्य–धीराऽऽख्यगणी सुवक्ता, स्वाम्नाय–शुद्धाऽऽचरण–प्रतिष्ठः। वादि–प्रकाण्ड–द्विरदेषु सिंहः, पापौघ–भूभृच्छतकोटिकल्पः ॥ १२९ ॥ ( युग्मम् ) श्रीज्ञानकीर्तिर्गणभृत्तदीयो–पाध्यायभागुज्ज्वलकीर्तिशाली । विद्वद्वरिष्ठः सुजनाऽब्जभानुः, प्रभावकोऽभूज्जनतानुताङ्घ्रिः ॥ १३० ॥ गुणप्रमोदोऽभवदस्य शिष्यो–पाध्याय एष प्रततान कीर्तिम् । सर्वासु दिक्षु प्रभयोपपन्नो, विद्याविवादे विजयी सभायाम् ॥ १३१ ॥ छात्रस्तदीयः समयाऽऽदिकीर्ति–रभूदुपाध्यायगणी यशस्वी । विद्वत्प्रकाण्डो गुणिवर्यगण्यः, सुरक्षिताऽखण्डित–शीलशाली ॥ १३२ ॥ श्रीहर्षकल्लोलगणी बभूवो–पाध्यायतत्पाद–सरोज–भृङ्गः। समिद्धतेजाः करुणाऽऽर्द्रचेता, आदर्शभूतो जगदर्हणाऽर्हः ॥ १३३ ॥ ( आर्या )—शिष्यश्चाऽस्य विनीतः, श्रीमान् गणी विनयकल्लोलाऽऽख्यः । उपाध्यायपदयुक्तो, जातः स्वपर–समयनिष्णातः ॥ १३४ ॥ ( आख्यानकी )—तदीयशिष्यः समभूदुपाध्या–यः कीर्तिशाली प्रभयांऽशुमाली । श्रीचन्द्रकीर्तिर्गणभृत्कृपालुः, सद्भक्तचित्ताऽम्बुज-पद्मबन्धुः ॥ १३५ ॥

( उपजातिः )—अमुष्य शिष्यो गुणकीर्तिरासीत्, गणी सुविद्वान् गुणरत्नसिन्धुः। स्वाम्नाय–सैद्धान्तिक–वेद–वित्तो–पाध्यायमुख्यो जनता–शुभंयुः ॥ १३६ ॥ ( द्रुतविलम्बितम् )—सुमतिरङ्गगणी समजायत, प्रवरवाचक उत्तमशीलपः। गुरुवरस्य हि तस्य सुशिष्यकः, सुमतिदायक इज्यवरः प्रभुः ॥ १३७ ॥ ( उपजातिः )—तदीय-शिष्यत्वमयं समार, श्रीयुक्तिरङ्गो गणभृद्दयालुः। विद्याचणो जातजगत्प्रतिष्ठो–पाध्याय आबाल–सुशीलपाली ॥ १३८ ॥ अस्याभवच्छ्रीसुखलाभशिष्यो–पाध्याय आनम्र–समस्तजैनः । अर्हन्मताऽम्भोज–विकाशनाऽर्कः, सम्यक्त्वदाता गणिमुख्य एषः ॥ १३९ ॥

( तामरसवृत्तम् )—जयकुशलः सुविनीतसुशिष्यः, समभवदस्य सुवाचकमुख्यः। सकल–जिनागम–पाठनशक्तः, क्षिति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जनपण्यगणीश्वर एषः ॥ १४० ॥ ( तामरसम् )--जयकुशलः सुविनीतसुशिष्यः, समभवदस्य सुवाचकमुख्यः । सकल-जिनाऽऽगम-पाठन-शक्तः, क्षितितल-गण्य-गणीश्वर एषः ॥ १४१ ॥ ( द्रुतविलंबितम् )--अचलवर्द्धन-शिष्यवरोऽभवत्, सकल-शास्त्र-विचारण-दक्षिणः । प्रथित-वाचक-वृन्द-शिरोमणि-गणभृदस्य गरिष्ठगुरोरयम् ॥ १४२ ॥

( उपजातिः )—एतस्य शिष्यो जिनहंसनामा, गणी सुधर्मा सदसि प्रवक्ता । यशस्करो भूतिददो बभूवो—पाध्याय-वृन्दाऽग्र्यतमो जितात्मा ॥ १४३ ॥ एतत्क्रमाऽम्भोज-युग-द्विरेफ-माणिक्यमूर्तिर्गणभृद्बभूवान् । शास्त्राऽब्धि-पारीण उदारबुद्धिः, सद्वाचकाऽग्रेसर आप्तवक्ता ॥१४४॥ श्रीज्ञानमूर्तिर्गणभृत्प्रजज्ञे, शिष्यस्तदीयो यशसा गरीयान् । जिताऽऽन्तराऽरिर्ममता-विमुक्तो—पाध्याय उष्णांऽशु-समप्रभासः ॥१४५॥ श्रीभावहर्षो गणभृद्बभूवो-पाध्याय उच्चैर्यशसाऽभिरामः । सुदक्षिणः सर्वकलासु तस्य, प्रशस्य-शिष्यः परमार्थदर्शी ॥ १४६ ॥ ( प्रमुदितवदना )—अमर-विमल-शिष्य-वर्यो गणी, समजनि-सम-वाचकाऽग्रेसरः । तदतुल-पदपद्म-भृङ्गोपमो, जगदुदित-सुकीर्ति-वल्ल्यावृतः ॥ १४७ ॥

( द्रुतविलंबितम् )—अमृतसुन्दर उज्वल-कीर्तिमान्, समजनिष्ट गणी वरवाचकः । तदनुकूल-विनेयवरः प्रधी-रधिक-विद्य उपास्यतमः कृती ॥ १४८ ॥ ( तोटकम् )--अमुकस्य सुशिष्य--महामतिमान्, निरवद्य-सुविद्य उदारयशाः । महिमा-युत-हेमगणी समभूत्, प्रभुरेष सुवाचक ईड्यतमः ॥ १४९ ॥ ( उपजातिः )--एतस्य शिष्यत्वमगादनल्प--तेजा महौजा गणिवाचकोऽसौ । मान्यः समेषां जयकीर्तिनामा, वशीकृतात्मा शशि-शुभ्रकीर्तिः ॥ १५० ॥ प्रतापसौभाग्य-गणी बभूवो—पाध्यायभाक् तस्य गरिष्ठकीर्तेः । शिष्यो महीयानुदधिर्गुणानाम्, अनेक-शास्त्रेषु कृतश्रमोऽसौ ॥ १५१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

( तामरसवृत्तम् )––प्रणत–नृपाल–शिरोमणि–दीप्रः, प्रथितसुवाचक आप्तयशस्कः । समभवदस्य गुरोरिह शिष्यः, सुमतिविशालगणी प्रभविष्णुः ॥ १५२ ॥ ( उपजातिः )––समुद्रसोमः समभूदमुष्यो––पाध्याय उद्यत्सुयशोगरीयान् । गणी जगत्यामुदित–प्रतापः, शिष्यो यशस्यः प्रभया पतङ्गः ॥ १५३ ॥ श्रीयुक्ति––युक्ताऽमृतनामधेयो, ह्यन्तेसदस्याऽभवदेष जिष्णुः । सद्वाचकोऽशेष–कषाय–मुक्तो, गणी प्रविद्वाञ्चित–वादिवृन्दः ॥ १५४ ॥ ( शार्दूलविक्रीडितम् )––कालैकाऽङ्क–निशाकर[१९१३]–प्रमितिके वर्षेऽजनिष्टाऽसुकः, तर्काऽग्नि–ग्रह[१९३६]–भूमिते च जगृहे दीक्षां परामार्हतीम् । नेत्राऽश्वा[१९७२]ऽङ्क–महीमिते च धवले पक्षे सहस्ये शुभे, पक्षान्ते सुतिथौ समस्त–सुजनाऽऽरब्धे सुचारूत्सवे ॥ १५५ ॥ श्रीमच्छ्रीगुरुवर्यकस्य जिनयुक्चारित्र-सूरेः करात् , प्रापत्सूरिपदं कुशाऽग्रधिषणः श्रीमान् प्रविद्वान्महान् । सैष श्रीजिनकीर्तिसूरिपरः श्रीमञ्जिनाऽऽदिः कृपा––चन्द्रः सागर आविभाति सकले भूमण्डले सद्गुरुः ॥ १५६ ॥ श्रीमन्मोहमयीपुरे जिनयुतश्चारित्रसूरीश्वर–स्तुभ्यं सद्गुण-सद्मने सुविदुषामग्र्याय मेधाविने । प्रादात्सूरिपदं प्रसन्नहृदयश्चाऽऽचार्यतामप्यसौ, गच्छेऽस्मिन् सकले त्वमेव गुरुतां धत्से-ऽधुना सर्वथा ।। १५७ ॥ (उपजातिः )––गच्छे प्रभावी पुरुषो यतस्त्वं, ज्यायानपि त्वं बहुविद्ययाऽऽढ्यः । गीतार्थ-कत्वादपि तस्य पट्ट–मलङ्करिष्णुर्भविता त्वमेव ॥१५८॥ वालोत्तरायां पुरि नेत्र–नाग–नवेन्दु[१९८२]–वर्षे सह शिष्यवर्गैः । प्रावृट्-चतुर्मासमिह न्यवात्सीः, नॄन् पाययन् धर्म्यकथाऽमृतानि ॥ १५९ ॥ (आर्या)––तत्र हि भावहर्षीय–शाखोपाध्याय–श्रीम-दनाऽऽख्यः । निज–गुरुफतेन्द्रसूरि–स्थाने त्वामेव सम्मेने ॥१६०॥ श्रीजिनफतेन्द्रसूरेः, पट्टाऽऽलङ्कारि–जिनलब्धिसूरिः । तावकीन–करकमलैः, क्रियोद्धृतिमचीकरद्यत्नात् ॥ १६१ ॥ ( उपजातिः )––जाते त्वदीये ह्यमुके विनेये, मुमुक्षुवर्ये गुणवद्-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गरिष्ठे। तदीय–तत्पट्ट--नियन्तृतैवं, त्वय्येव जाता जगदेकजिष्णो !॥ १६२ ॥ (वैतालीयम्)—मालवीय–जावरापुरे, पिप्पलक–खरतरीय--शाखिकः । समजनि जिनचन्द्रसूरिको, जिनोदयसूरिरास्त तत्पदे ॥ १६३ ॥ (उपजातिः)—महात्मनाऽनेन सुबुद्धिनाऽपि, समुज्झिताऽशेष–परिग्रहेण । वेदाऽश्व[१९७४]–नन्देन्दुमिते च वर्षे, क्रियोद्धृतिं त्वं समचीकरश्च ॥ १६४ ॥ अतस्त्वमेवाऽसि तदीयपट्ट—प्रधाननेता जगदुज्ज्वलाऽऽभ !। जिनाऽऽदिकीर्तेर्वरसूरिकस्य, ह्यस्त्येव पट्टाऽधिकृतिस्त्वयीश ! ॥ १६५ ॥ इत्थं चतुःशाखिक–पट्टकीयाऽऽ—चार्यत्वमापद्य वरीवृतीषि । महीयसस्तेऽतुलतेजसोऽस्माद्, गायन्ति धीराश्चरितं ह्युदारम् ॥ १६६ ॥ मत्पूर्वजो गौरवबन्धुरासीद्, विद्वत्तमानां धुरि कीर्तनीयः । विभूषणः सज्जनपुङ्गवाना–मानन्दनामा महिमाऽम्बुराशिः ॥ १६७ ॥ नेत्राऽब्धि–नन्द[१९४२]–क्षितिहायनेऽसौ, प्रादुर्बभूवाऽङ्ग–शराऽ[१९५६]ङ्क–चन्द्रे । वर्षे तपस्ये शुभवासरेऽस्य, जाता सुदीक्षा महता महेन ॥ १६८ ॥ नभस्तुरङ्गा[१९७०]ऽङ्क–शशाङ्कवर्षे, चैत्रेऽसिते ब्रह्मतिथौ च शुक्रे । ख्यातो मराले नगरे समाधि—ना चेतसि श्रीपरमेष्ठिपश्च ॥ १६९ ॥ स्मरन्नजस्रं वरमुक्तिदायं, सीमन्धर–स्वामि–पदारविन्दम् । ध्यायञ्छुभध्यानमना मनीषी, सुरेशपुर्यां गतवाननंहाः ॥ १७० ॥ ( युग्मम् ) गार्हस्थ्यवासे दशपञ्चवर्षी, सुसंयमित्वेऽपि च तावतीं सः । सम्पूर्णमायुर्गुणबिन्दुमब्दं, भुक्त्वा सहस्राक्षपुरीं जगाम ॥ १७१ ॥ राजन्यवंशीय–सुवत्सगोत्र—श्रीखूमसिंहात्पडिहारगोत्रा। श्रीअमृताख्या जनथाश्चकार, गुणाऽब्धि–नन्देन्दुमिते च[१९४३] वर्षे ॥ १७२ ॥ शुभाऽभिधानं युगराजमासीत्, नक्षत्रमासीदभिजित्प्रधानम् । बभूव राशिर्मकरस्तदानी–मित्थं सुवंशे जनितोऽस्म्यहं हि ॥ १७३ ॥ गार्हस्थ्यवासे दशपञ्चवर्षीं, सुसंयमित्वेऽपि च तावतीं सः । सम्पूर्णमायुर्गुणबिन्दुवर्षं, भुक्त्वा सहस्राक्षपुरीं जगाम ॥ १७४ ॥ राजन्यवंशीय-सुवत्सगोत्र–श्रीखूमसिंहात्



For Private And Personal Use Only

पडिहारगोत्रा । अजीजनच्छ्रीअमृता सुपुत्रं, गुणाऽब्धि-नन्देन्दुमिते च [१९४३] वर्षे ॥ १७५ ॥ गार्हस्थ्यसंज्ञा युगराज आसी-न्नक्षत्र-मासीदभिजित्प्रधानम् । बभूव राशिर्मकरश्च सोऽहं, जातः सुधांशाविव शुद्धवंशे ॥ १७६ ॥ पाण्यम्बुजाच्छ्रीजिनकीर्तिसूरे-स्तर्केषु-रन्ध्र-क्षितितुल्यवर्षे [१९५६] । सुदीक्षितस्तर्क-हयाऽङ्कचन्द्रे-ऽलभे [१९७६] ह्युपाध्यायपदं किलाऽहम् ॥ १७७ ॥

( शार्दूलविक्रीडितवृत्तम् )—वर्षे व्योम-नवांऽङ्कचन्द्रगणिते [१९९०] श्रीपादलिप्ते पुरे, मासे फाल्गुनिके सिते रविदिने चक्षुःश्रवः-सत्तिथौ । चन्द्रे मीनगते शुभेऽह्नि शुभदे मेषे नवांशे भृगोः, श्रीमच्छ्रीजिनकीर्तिसूरिगुरुभिः प्रादायि सूरेः पदम् ॥ १७८ ॥ चन्द्रागार-विशाल-सर्वजनताचेतोहरे सुन्दरे, द्वैतीये वरभूमिके विरचितायां गोष्ठिकायां मुदा । श्रीसङ्घैर्बहुसज्जनैश्च विबुधै-रामण्डितायां भृशं, श्रीमत्सूरिपदप्रदानमभवद्भूर्युत्सवैर्मामकम् ॥ १७९ ॥ ( मालतीवृत्तम् )—जिनजयसागरसूरिनाम मे, प्रथितमनेन गुणाऽम्बुराशिना । सकल-महाजन-पूजिताऽङ्घ्रिणा, सजिनकृपायुतचन्द्रसूरिणा ॥ १८० ॥

( शार्दूलविक्रीडितम् )—इत्याचार्यशिरोमणेर्जिनकृपाचन्द्रस्य सूरीशितुः, सूरिश्रीजयसागरेण मयका रम्ये चरित्रे गुरोः । सत्पद्यैरतिमञ्जुलैर्विरचिते मोदप्रदे धीमतां, सन्तानोद्भवकीर्तनोज्ज्वलतरः सर्गोऽयमाद्योऽभवत् ॥ १८१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरित्रकर्तुः श्रीजिनजयसागरसूरेः सूरिपदप्रदानकुण्डली—




॥ इति प्रथमः सर्गः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ अथ द्वितीयः सर्गः ॥

( उपगीती )—धन्वनि योधपुर–नगर–पश्चिमे चतुर्मुखो ग्रामः । न्यवसत्तत्र श्रीमान्, मेघरथो बाफणागोत्रः ॥ १ ॥

( उपजातिः )—स वृद्धशाखीय उदारतेजा, ज्ञातिश्च तस्याऽभवदोशवालः । ऊकेश आसीदिह मूलवंशः, सतीप्रकाण्डा ह्यमरा सुपत्नी ॥ २ ॥ तयोः सुपुत्रोऽभवदेष कीर्ति–श्चन्द्रः कुमारः शुभलक्षणाङ्गः । रामेषु–रन्ध्रेन्दुमिते [१९५३] च वर्षे, कुशाऽग्रबुद्धि-श्चतुरः सुवक्ता ॥ ३ ॥ अथैकदा योधपुरं समागा–न्मात्रा सहायं प्रतिबोधमापत् । धर्मश्रिया दर्भमुख-प्रबुद्ध्या, तत्रस्थया साध्विकया महत्या ॥ ४ ॥ त्रयोदशाऽब्दोऽपि भवार्णवं स–न्तितीर्षुरेतत्सकलं जिहासुः । तर्क–द्वि–नन्देन्दुमिते [१९२६] च वर्षे, वैराग्य–भावोज्ज्वलतामियाय ॥ ५ ॥ निःशेष–कर्मक्षयरूपमोक्षं, विज्ञान–पूर्वक्रिययैव याति । तत्राऽपि हेतुः सुगुरुर्महीयान्, इत्यब्रवीत्तां विनयी तदर्थी ॥ ६ ॥ आर्ये ! द्रुतं मां सुगुरोः समीपे, विद्यार्थिनं प्रेषय मा विलम्बम् । कृथा इदानीं शरणाऽऽ-गताऽऽर्त--बालोपरिष्ठात्करुणां विधाय ॥ ७ ॥ यो द्रव्यषट्कं न हि वेत्ति सम्यङ्, नाऽसौ यथार्थां मुनितामुपैति । ज्ञानेन साधुः परिकीर्त्यते हि, नाऽरण्यवासेन कदाऽपि काले ॥ ८ ॥ ये द्रव्यमात्रेण हि मुण्डयित्वा, शिरः स्वकं मौनिकवेषवन्तः । जानन्ति किञ्चिन्न हि वस्तुतत्त्वं, कुक्षिम्भरास्ते कुगतिं लभन्ते ॥ ९ ॥ इत्थं तदुक्त्या करुणाऽऽर्द्रचित्ता, धर्मश्रिका सा हृदयेऽ-वधार्य । अग्रे भविष्यन्तममुं महान्तं, विद्यामुपादातुमतुच्छबुद्धिम् ॥ १० ॥ समुद्रसोमाऽभिधसूरि-शिष्य–युक्त्यादिकश्रीअमृताऽ-ख्यसूरेः । विशुद्धधर्म-प्रतिपादकस्य, नैकेषु शास्त्रेषु कृतश्रमस्य ॥ ११ ॥ पार्श्वे तदैनं गत-जन्म-सम्य-गाराधित-ज्ञानमहा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्रताऽऽदिम् । मत्वा कुमारं विनयाऽवनम्रं, सम्प्राहिणोत्तज्जननीं च पृष्ट्वा ॥ १२ ॥ ( त्रिभिर्विशेषकम् )—प्रणम्य धर्मश्रियमार्यिकां तां, स्वमातरं चाऽपि सुखेन तस्मात् । शुभे मुहूर्ते चलितः कुमारः, संप्राप्तवान् विक्रमपत्तनं हि ॥ १३ ॥ सच्चैत्रिके शुक्लदले तृतीया–तिथ्यां समागत्य गुरून् मिमेल । आरब्धवाञ्छ्रेयसि सौम्यघस्रे, बलिष्ठलग्नेऽध्ययनं शुभंयुः ॥ १४ ॥ मेधाविनामुत्तम एष शीघ्रं, सल्लौकिकं धार्मिकशब्दशास्त्रम् । सत्तर्कशास्त्रं सकलं महार्थं, वेदान्त–वैशेषिक–जैमिनीयम् ॥ १५ ॥ साङ्ख्यश्च पातञ्जल–तन्त्र–मन्त्र–चार्वाक–बौद्धाऽऽदिकसर्वशास्त्रम् । नैमित्तिकं शाकुनिकं बहूनि, काव्यानि चम्पू–वरनाटकानि ॥ १६ ॥ ज्योतिस्तथा वैद्यक–सर्वकोशा–ऽलङ्कार–सामुद्रिकशास्त्रमेवम् । सद्गद्यकाव्यानि बहूँश्च वृत्त–ग्रन्थान् समध्यैष्ट यथावदेषः ॥ १७ ॥ ( त्रिभिर्विशेषकम् )—इत्थं पटीयान् सकलेषु जातः, शास्त्रेषु गाम्भीर्यपयोधिरेषः । चातुर्यतायामयमद्वितीयो, बभूव विद्वद्वनचारि–सिंहः ॥ १८ ॥ ततः प्रविद्वांसममुं महीयान्, जैनाऽऽगमीयाऽध्ययनाय योग्यम् । मत्वा गुरुस्तर्क–गुणाऽङ्क–चन्द्र–मानें सुवर्षे शुचिशुक्लपक्षे ॥ १९ ॥ प्राविव्रजद्याम्यतिथौ सुलग्ने, स्वाम्नायदीक्षाविधिना विधिज्ञः । पात्रे समेतेऽसमयेऽप्यवश्यं, सिद्धान्तसद्वाचनमस्य देयम् ॥ २० ॥ ( युग्मम् ) अमानि चेत्यप्यपवादमार्गः, सिद्धान्तशास्त्रे बहुभिः सुधीभिः । कुशिष्यकादेः किल वाचनाया, दानं तदादानमपि न्यषेधि ॥ २१ ॥ अश्नन्ति नित्यं विकृतं हि भक्ष्यं, कुर्वन्ति ये नो विनयं महत्सु शठाश्च दुष्टा अतिकोपिनो ये, व्युद्ग्राहिता भिक्षु–मतान्तरीयाः ॥ २२ ॥ स्वाचारशैथिल्यमुपागता ये, तेषां समेषां श्रुतवाचनायाः । दाता ग्रहीता च ततः स पापी, छेदश्रुतावेवमलेखि सर्वम् ॥ २३ ॥ अतो गुरुस्तं प्रथमं प्रदीक्ष्य, प्राध्यापिपत्सर्वजिनागमांश्च । सिद्धान्तनिष्णातमबीभवच्च, त्रिनेत्रवर्षाणि गतं विनीतम् ॥ २४ ॥ इत्थं स्वकीयाऽन्यमतीयशास्त्र–पाथोधि–पारङ्गत एष



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिष्णुः । अचीकमच्छ्रीगुरुभिः समेतः, क्रियासमुद्धारमगाधबुद्धिः ॥ २५ ॥ अथाऽसकौ दर्शनशुद्धतायै, श्रीमद्गुरोरङ्घ्रिसरोजयुग्मम् । शेश्रीयमाणः सुजनान् प्रबोधन् , बम्भ्रम्यमाणो विषयाननेकान् ॥ २६ ॥ महापुरग्रामटिकीयशश्व–दशाश्वतश्रीजिनराजबिम्बम् । पश्यन्नयं प्राच्य–समस्ततीर्थ–यात्रामकार्षीद्दृढवृद्धभावः ॥ २७ ॥ युग्मम् ॥ ऐदन्तरिक्षस्थितपार्श्वनाथ–तीर्थं तथा श्रीकुलपाकतीर्थम् । समाययौ केशरियाख्यतीर्थं, ननाम तीर्थेशमनल्पभक्त्या ॥ २८ ॥ (इन्द्रवंशा)—श्रीमाण्डवादिं गढमाप गुर्जरे, देशे ततः श्रीमकसीपुरस्थितम् । आजग्मिवान् सामलियासुपत्तनं, सागारवन्तीं विवडोदपत्तनम् ॥ २९ ॥

( शार्दूलविक्रीडितम् )—नाकोडामगमत्ततः पुनरसौ संप्राप्तवाँल्लोद्रवां, कापेडामपि सङ्गतो जिनवराऽपूर्वच्छविं दृष्टवान् । भूविख्यात–फलोधिसंस्थितमसौ श्रीपार्श्वनाथप्रभुं, दृष्ट्वाऽगाद्धरमेदनीपुरमितो यातो जवालीपुरम् ॥ ३० ॥

(उपजातिः)—ततः करेडापुरि शान्तिनाथं, महाद्भुतं प्रैक्षत भूरिभक्त्या । तत्रत्यलोकानमृतायमान–सद्देशनाभिः सकलानतर्पीत् ॥ ३१ ॥ आगात्ततो देवलयुक्तवाडां, पुरीं सुरम्यां कृतवांश्च यात्राम् । उपादिशद्धार्मिकतत्त्वमत्र, प्रापत्प्रतिष्ठां महतीं च सङ्घे ॥ ३२ ॥ ( भुजङ्गप्रयातम् )—ततश्चित्रकूटं समेत्य प्रभक्त्या, जिनेशं प्रणम्य प्रमोदं समाप । भृशं सत्कृतोऽशेषपौरैश्च तत्र, विजह्रे ततोऽपारधामा महात्मा ॥ ३३ ॥ ( जलोद्धतगतिः )—स राजनगरं प्रभासुर इत—श्चकार जिनदर्शनं प्रमुदितः । ददावमृतदेशनां सुजनतः, दिनेश इव भासुरः समुदितः ॥ ३४ ॥ (पञ्चचामरं)—ततः कनिष्ठधन्वनि प्रसिद्धतीर्थकस्थलं, महाऽर्बुदाऽचलाऽभिधं प्रभासपट्टनं मुदा । बले च मांगरोलकाऽभिधानतीर्थमुत्तमं, सुरैवताऽचलं परं सुजामनाऽऽदिकं गरम् ॥ ३५ ॥ प्रशस्तमोशियाऽभिधं जगाम तीर्थनायकं, ददर्श मोदमेदुरः प्रधीवरः शुभङ्करः । अनेक–तीर्थकृद्गणि–प्रधान–वीरवेषिणां, सुजन्म–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दीक्षणाऽऽदिभिः पवित्रमंहसां हरम् ॥ ३६ ॥ (युग्मम्) (उपजातिः)—अनन्त–कैवल्यसमुद्भवश्च, यस्मिंश्च निर्वाणमुपेयिवांसः । अनेक–कल्याणकमाविरासीत्, समावसारो रचितश्च यत्र ॥ ३७ ॥ संघं चतुर्धा समतिष्ठिपच्च, श्रीवीतरागो भगवान्हि यत्र । प्राच्यं च तत्तद्व्यतिशायितीर्थ—स्थलं प्रविद्वान् समुपाजगाम ॥ ३८ ॥ प्राचीन–नूत्नाऽखिल-पौर्वमेवं, सगौर्जरं वृद्धमरुस्थलीयम् । कच्छीय–सौराष्ट्रिक–कौङ्कणं च, लाट्यं समस्तं वढियारदेश्यम् ॥ ३९ ॥ वैदर्भिकं मालवदेशजातं, सौवीर–सिन्धूद्भव–मैदपाटम् । छत्तीशयुक्तं गढमाप्य सर्वं, पाश्चालिकं तीर्थमपश्यदेषः ॥ ४० ॥ (वसन्ततिलका)—शत्रुञ्जयाऽऽदिबहुपावन–तीर्थभूमिं, कल्याणकाऽऽदिबहुतीर्थभुवश्च रम्याः । संस्पृश्य भूरितपसा कृतनिर्मलं हि, देहं व्यशोधयदसौ जगदेकवन्द्यः ॥ ४१ ॥ विशुद्ध–सैद्धान्तिकतत्त्वबोधं, सम्प्राप्य वाचा निरवद्यया हि । शश्वत्तदाख्याय गिरं स्वकीयां, पवित्रयामास महामनीषी ॥ ४२ ॥ (उपजातिः)—महाव्रतानामथ पञ्चकानां, बाण–द्वि–सद्भावनया महत्या । अनित्यताद्यर्के–विभावनाभि–र्मनो व्यशोधि प्रभुणाऽमुना हि ॥ ४३ ॥ (वसन्ततिलका)—सद्दान–शील–तपसा जप–संयमाऽऽद्यैः, पूतं व्यधात् त्रिकरणाऽऽदिकयोगमीड्यः । षड्दर्शनोदित–पदार्थमबोधि सम्यग्, जग्राह चाऽस्य परमार्थमसौ पटीयान् ॥ ४४ ॥ स्वीयान्यदीय–समयाध्ययनं विधाय, तत्रोभयत्र परमां पटुतां प्रपद्य । प्रख्यातिमाप्य सकले धरणीतलेऽस्मिन्, सम्यक्त्वमित्थममलं समवीवृधत्सः ॥ ४५ ॥ सद्गौरवाऽतिविनय–प्रवितानदक्षो, ज्ञानं च सर्वविषयाऽवगमक्षमं हि । लब्ध्वा तदीय–विषय–प्रतिपादनेन, प्राशूशुधच्च जयदुज्ज्वलकीर्तिशाली ॥ ४६ ॥ आलोचिता च विहिताऽखिल–पातकाऽऽदेः, शुद्धव्रती निरतिचार–सुशीलपाली । चारित्र–रत्न–सतताऽधिकशोभमानः, प्रादीपि भूरि सवितेव जगत्यजस्रम् ॥ ४७ ॥ निष्काम–बाह्य–विविधं तप आन्तरं च,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निःशेष—कर्मदलनाय समारराध । सद्भव्यजीवनिकरं समबूबुधच्च, नैशं तमो रविरिवाऽहिनदेष मोहम् ॥ ४८ ॥ ज्ञानाऽऽदिक-त्रितय--सत्तपरूपमोक्ष -मार्गे च ये सुमनसः सुधियः परस्मिन् । तिष्ठन्ति नित्यममलाः सफलं तदीयं, मानुष्यमत्र वरधीरत एव सोऽपि ॥ ४९ ॥ ( इन्द्रवंशा )—दृग्--ज्ञान—चारित्र--तपोऽतिसंयमान्, सन्त्यज्य सर्वा अपि वासना मुदा । आराध्धुमेषोऽति-शय--प्रभावकः, स्वान्ते दृढं निश्चयमाततान सः ॥ ५० ॥ ( स्रग्धरा )—साध्वाचारं विचारं सकलमपि दिवारात्रिकृत्यं सुसाधोः, प्रारेभे कर्मकाण्डं विजितविषयिकः सर्वशास्त्राऽवगाही । पञ्चत्रिंशत्समाभिर्निज--परसमयं दत्तचित्तोऽध्यगीष्ट, भूमी--तर्काऽङ्क--चन्द्रप्रमितं[१९६७]-शरदि सोऽध्यायपूर्तिं व्यधत्त ॥ ५१ ॥ ( उपजातिः )—न सोऽस्ति तीर्थो न च सोऽस्ति देशः, यत्राऽसकौ नाऽगमदीड्यवर्यः । पुराऽऽदिकं वा न हि विद्यते तत्, नाऽपावि यत्तस्य पदाऽम्बुजेन ॥ ५२ ॥ या नाऽमुनाऽपाठि न साऽस्ति विद्या, शास्त्रं च तन्नैव जगत्यमुष्मिन् । नाऽशिक्षि दर्भाऽग्रधियाऽमुना यत्, मेधाविना सद्गुणशालिना हि ॥ ५३ ॥ नाऽऽलोक्यते सोऽत्र गुणोऽपि लोके, यो नाऽवसत्तत्र महीपुनाने । कलाऽपि शस्ता न हि वीक्ष्यते सा, भेजे न या मानवरत्नमेतम् ॥ ५४ ॥ मेधाविपुंसामयमद्वितीयो, व्याख्यानशैली समभूदमुष्य । क्लिष्टाऽर्थ--सौगम्यविबोध-दक्षा, पीयूषवृष्टेस्तुलनामवाप्ता ॥ ५५ ॥ परिस्फुटार्थाऽधिकमिष्टवाणी, भवाऽऽमयाऽमोघमहौषधिश्च । संसार--कान्तार--जरा--विपत्ति--दावोपशान्त्यै जलदायमाना ॥ ५६ ॥ प्रश्नोत्तरस्फूर्ति--विशेषशाली, विद्वत्कदम्बाऽधिसभं महिष्ठः । प्रत्युत्तराऽनुत्तर--शक्ति--हेतु--दृष्टान्त--सद्युक्ति--विरोध--भङ्गः ॥ ५७ ॥ सभाविसंवादिजनैकजेता, महानयज्ञः सदसद्विवेक्ता । विनाऽपि शब्दं सकलार्थवक्ता, मितप्रवक्ता रिपुताविमोक्ता ॥ ५८ ॥ पृथ्वीव सर्वंसह एष लोके, शशीव कान्तः कनकप्रभाऽऽभः । निश्शेष--

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साद्गुण्य–सुरत्नवार्द्धि–र्न हीदृशः कोऽप्यपरोऽस्ति नूनम् ॥ ५९ ॥ ( स्रग्धरा )—भूयांसः सूरिवर्या विविधपदधराः सन्ति भूमप्रतिष्ठाः, एकैकस्माद्गुणाऽऽढ्या निजनिजगणके मह्यमाना महान्तः । श्रीमद्वीरप्रभूक्ताऽखिलगुणसहितो निःस्पृहः साम्प्रतं हि, वा(आ)भाति त्वादृशोऽन्यो न हि जगति गुरो ! सत्यमेतद्वदामः ॥६०॥ ( भुजङ्गप्रयातम् )—असौ यत्यवस्थः समासीत्समानां, नवैव स्वकीयाऽन्यदीयश्रुतानाम् । समध्येतुकामः समाः सप्त तत्र, सदा भावचारित्रपर्यायकस्थः ॥ ६१ ॥

( उपजातिः )—बाणाऽब्धि[१९४५]–नन्देन्दुमिते च वर्षे, क्रियोद्धृतिं नागपुरे चकार । कर्मक्षयार्थं शिवधामलिप्सु–र्नानाविधं दुष्करसत्तपश्च ॥ ६२ ॥ अचीकरत्तत्र पुरे हि राय–पुरे प्रधाने सुविदां वरिष्ठः । चैत्यद्वयस्याऽतिमनोहरस्य, सम्यक् प्रतिष्ठामतुलोत्सवेन ॥ ६३ ॥ प्रान्ते च तस्मिंश्चरणेन साधो–र्विहर्तुमासीदतिदुष्करं हि । गुरोः क्रमाऽब्जं श्रयमाण एष, नौज्झत् किलैकं वरधूमयानम् ॥ ६४ ॥ शशाङ्क–वेदाऽङ्कमहीमितेऽब्दे[१९४१], चैत्रे सिते पक्षसमाप्तितिथ्याम् । जाते गुरूणां परलोकवासे, सुदुःसहोऽभूद्गुरुसंवियोगः ॥ ६५ ॥ संवेग ऐधिष्ट ततोऽमुकस्य, जगत्स्वरूपं परिपश्यतो हि । विमुक्तमोहस्य जितेन्द्रियस्य, पक्षे च शुक्ले शशिनः कलेव ॥ ६६ ॥ पपात तस्मिन् समये महिष्ठ–कपूरचन्द्रस्य महोपकर्तुः । कृपादृगस्योपरि भूयसी हि, शुभाऽऽशिषं चाऽस्य ददौ महात्मा ॥ ६७ ॥ अमुष्य पत्रेण तदेन्दिराऽऽदि–पुरीयसङ्घः सकलो गरिष्ठम् । आजूहवच्चाऽऽगमवाचनाय, विज्ञप्तिपत्रैरमुमाप्तकीर्तिम् ॥ ६८ ॥ ( आर्या )—तदवसरे नागपुरे, प्रज्ञापनासूत्रवृत्तिं वाचयन् । प्रवचनसारोद्धार–प्रकरणवृत्तिं च सभासीत्सः ॥ ६९ ॥ ( उपजातिः )—प्रारब्धमेतद्द्वयमप्यसौ हि, सम्पूर्णमत्रत्यजनानशेषान् । संश्राव्य तस्मादचिरं विहृत्य, ह्यागच्छदिन्दौरपुरीं महीयान् ॥७०॥ ( युग्मम् ) समागतं तं महदग्रगण्यं बेण्डाऽऽ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिवाद्यैः सह भूरिलोकैः । तामिन्दिराऽऽख्यां नगरीमनल्पैः, प्रवेशयामास महोत्सवैः सः ॥ ७१ ॥

( शार्दूलविक्रीडितम् )—तत्राऽऽगत्य जनाऽऽग्रहाद्भगवतीं प्रज्ञापनाऽऽख्यं बृहद्--वृत्त्यावश्यकसूत्रमेष वरधीर्नन्दीपयन्नाऽऽदिकम् । सानन्दं सुचिरं समस्तजनताचेतांसि सन्तोषय--ञ्छ्रीसङ्घं समशुश्रवन्मधुरया वाचा सुधातुल्यया ॥ ७२ ॥ एतद्वक्त्र--सुधामयूख--विगलत्पीयूषवाचं जनाः, पायं पायमनारतं श्रुतिपुटैः संसारनिस्तारिकाम् । जन्मव्याधि--जरा--विपत्ति-मरण--त्रासाऽपहां सद्धियां, तृप्तिं कामपि लेभिरे निजजनुः संमेनिरे सार्थकम् ॥ ७३ ॥ मेघाऽऽरावगभीरया स्फुटगिरा पीयूषमाधुर्यया, सद्बोधाऽमृतवर्षिणीं गुरुवरप्रत्याहिकीं देशनाम् । श्रावं श्रावमशेषतत्त्वमखिलाः प्रावेदिषुश्चाऽऽर्हतं, श्रीमन्तं जगदद्वितीयविबुधं चैनं गुरुं तुष्टुवुः ॥ ७४ ॥ ( उपजातिः )—विहृत्य तस्मादयमाजगाम, तद्राजयुक्तं नगरं जितात्मा । प्रवेशितस्तत्र महोत्सवेन, प्रौढप्रतापः सकलैश्च पौरैः ॥ ७५ ॥ धर्मोपदेशैरवराशिहारैः, सूर्यांशुभिर्ध्वान्तमिवाऽत्रलोके । प्राबूबुधच्चाऽऽर्हतशुद्धधर्मं, सङ्घं समस्तं विजहार तस्मात् ॥ ७६ ॥ क्रमेण शत्रुञ्जयतीर्थमेत्य जिनाऽऽदिनाथं प्रभुमालुलोके । स्तुत्वा च नत्वा बहुशोऽतिभक्त्या, भव्यांश्च लोकान् बहुधोपदिश्य ॥ ७७ ॥ ( भुजङ्गप्रयातम् )—ततो रैवताऽद्रिं समायात एषः, ननामाऽत्र तीर्थाऽधिनाथं प्रभक्त्या । ततोऽसावुपेतो महातीर्थशङ्खे--श्वरं वीक्ष्य यातः क्रमाद्भोयणीं सः ॥ ७८ ॥

( शार्दूलविक्रीडितम् )—तारङ्गाऽभिधतीर्थमेष गतवान् ख्यातं महीमण्डले, सार्धं शिष्यगणैरुदारचरितश्चारित्रपूतीकृतः । विद्याचञ्चुरसावपारमहिमाऽम्भोधिः पतङ्गप्रभो, नत्वा तीर्थपतिं चकार सुचिरं तस्य स्तुतिं भूरिशः ॥ ७९ ॥

( उपजातिः )—ततोऽगमच्छ्रीविबडोदनाम--पुरं प्रसिद्धं गुणवद्गरिष्ठः । कृत्वा च यात्रां परमर्द्धिलोकैः, सुसत्कृतोऽदाद्वरदेशनां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सः ॥ ८० ॥ ततोऽप्यगात्सेमलियाऽभिधानं, ददर्श तीर्थेश्वरमद्भुतं सः । प्रणम्य संस्तुत्य जगत्प्रभुं हि, प्रबोधयामास जनांश्च भव्यान् ॥ ८१ ॥ ( विभावरीवृत्तम् )—अवन्तिकापुरीमगादसौ प्रभु--र्ददर्श तीर्थनायकं सुभक्तितः । नुनाव रम्य-गायनैर्जिनेश्वरं, पुपाव कायमात्मनः सुधीवरः ॥ ८२ ॥ ( उपजातिः )—ततोऽगमच्छ्रीमकसीप्रभृत्य--नेकांश्च तीर्थानतिभक्ति-युक्तः । आनम्य तीर्थेशमनेकजन्म--निकाचितैः कर्मदलैरमोचि ॥ ८३ ॥ अगात्तराणामथ कायथाऽऽख्यां, विशुद्ध--चारित्रध-रोऽतिधीरः । पुरद्वये पौरजनैरशेषैः, प्रावेशि चारूत्सव--संवितानैः ॥ ८४ ॥ ( वंशस्थवृत्तम् )—सुधोपमां तत्र ददौ च देशना-मधर्म--सद्धर्मविचार--कारिणीम् । अघौघ--वृक्षौघ--कुठाररूपिणी--मपार--संसार--समुद्रतारिणीम् ॥ ८५ ॥ श्रीमद्धुलेवावरतीर्थ-यात्रा--विधित्सया सङ्घमुपादिदेश । स कायथावासिजनैर्मिलित्वा, सहर्षमङ्गीकृत एतकस्य ॥ ८६ ॥ ततो वियद्द्वैर्दमितैः खभूँत-सुश्रावकाऽऽद्यैः सह सञ्चचाल । कृत्वा धुलेवाऽभिधतीर्थयात्रां, पुरं समागादुदयेन युक्तम् ॥ ८७ ॥

( शार्दूलविक्रीडितम् )—तत्राऽकारि महाजनैर्गुरुवरस्याऽमुष्य तेजस्विनो, बेण्डाऽऽदिश्रुतिसौख्यदायिनिनदैः सत्स्व-र्णयष्ट्यादिभिः । शङ्खध्वान--जयारवैश्च मधुरैः सुश्राविकागायनै--रश्वैर्भूषणभूषितैर्नृपभटैः पौरप्रवेशोत्सवः ॥ ८८ ॥

( इन्द्रवज्रा )—संघाऽऽग्रहात्पक्ष--शराङ्कचन्द्र[१९५२]--वर्षे चतुर्मास--निवासमेषः । शिष्यद्वयी-सेवितपादपद्म-स्तत्राऽकरोन्नि-र्जितवादिवृन्दः ॥ ८९ ॥ ( उपजातिः )—सुधामयीं धार्मिकदेशनां हि, ददज्जनानां हृदयाऽम्बुजानि । प्रफुल्लयन्नर्क इव प्रकामं, सम्यक्त्ववन्तं सकलं व्यधत्त ॥ ९० ॥ त्रिगुप्तियुक्तः (गुप्तः) समितीश्च पञ्च, दधन्मुनीशो वरखेडवाडे । चैत्यप्रतिष्ठां त्सवेन, चक्रे मनीषी गुणि--गण्यवर्यः ॥९१॥ इत्थं निजाऽऽचार--सुपालनैक--दार्ढ्यं वितन्वञ्जनताः प्रबोधन् ( धयन् ) । स देसुरी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माऽऽर सुमारजेता, सच्छिष्यवर्गैरवनीं पुनानः ॥९२॥ सुसत्कृतः पौरजनैश्च सर्वै--र्धर्मोपदेशैरमृतायमानैः । प्रबोध्य सर्वानय-मात्रवक्ता, गुणाऽनुरागी परिषत्सुवक्ता ॥ ९३ ॥ ( भुजङ्गप्रयातम् )—ततो गौडदेशं समेत्योपदेशै–रसौ नाडलाई--महापत्तना-ऽऽदौ । महाजीर्ण--चैत्योद्धृतिं संघवर्गैः, शुभंयुः समाचीकरच्चारुकीर्तिः ॥ ९४ ॥ ततो वह्नि--भूतां[१५५३]ऽङ्कपृथ्वीमिताऽब्दे, पुरीं देसुरीमेत्य संघाऽऽग्रहेण । चतुर्मासवासं ह्यकार्षीत्सशिष्यः, समश्रावयत्सर्वसंघं च सूत्रम् ॥ ९५ ॥ ( इन्द्रवज्रा )—प्रभावना-पूजन–सत्तपस्या, गुरावमुष्मिन्निवसत्यजस्रम् । प्रवृद्धभावैरखिलाः प्रचक्रुः, सत्स्वामिवात्सल्यमपि ह्यनेकम् ॥ ९६ ॥ ततो विहृत्याऽऽगतवांश्च योध–पुरे महापत्तन एष धीरः । तत्रत्यसंघः कृतवानपूर्व–पुरप्रवेशोत्सवमेतकस्य ॥ ९७ ॥ वेदेषु–रन्ध्रे[१५५४]–क्षितिसंमिताऽब्दे, बह्वाग्रहात्तत्र जनस्य चक्रे । प्रावृट्चतुर्मासमनेकशास्त्रा–ऽकूपार–पारीण उदारबुद्धिः ॥ ९८ ॥

( द्रुतविलंबितम् )—भगवतीवरसूत्रमशुश्रवत् , सकलसंघमसौ सुविदां वरः । जलद–नाद–गभीरतरै रवैः,परमपावनमव्ययधा-मदम् ॥ ९९ ॥ (उपजातिः)—अभूच्च तत्राऽधिकधर्मवृद्धि–स्तपोभिरुग्रैर्नियमोपवासैः । आष्टाहिकाऽनेकमहोत्सवाद्यै–रनाथ–पंग्वादिक–भूरिदानैः ॥ १०० ॥ अगात्ततो जेसलमेरनाम—पुरीं महर्द्धिं सह शिष्यवर्गैः । बाणेषु–नन्द–क्षितिहायने[१५५५]ऽत्र, वर्षर्तुकालं गमयाञ्चकार ॥ १०१ ॥ ( शार्दूलविक्रीडितम् ) व्याख्याने जनताऽऽग्रहाद्भगवतीसूत्रं पवित्रं मह–ज्ञाना–जन्म–सम-र्जिताऽघपटलीहारं श्रुतं प्राणिनाम् । जीमूताऽऽरव–सोदरेण वचसा श्रोतॄनसंख्याऽऽगतान् , वागीशस्त्रिदशानिव प्रतिदिनं प्राशिश्रवत्सद्गुरुः ॥ १०२ ॥ ( उपजातिः )—उपेयिवानेष ततो विहृत्य, नाम्ना फलोधिं नगरं समृद्धम् । संसार–कान्तार–जराऽऽदिदुःख–दावोपशान्त्यै जलदः सशिष्यः ॥ १०३ ॥ समागतस्याऽस्य पुरप्रवेशो, व्यधायि पौरैः सकलैः प्रशस्यः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सङ्घाऽऽग्रहादङ्ग-शराऽङ्कचन्द्र-संम्वत्सरे[१९५६] प्रावृषि स न्यवात्सीत् ॥१०४॥ ( द्रुतविलंबितम् )—भगवतीमखिलाऽऽग्रहतोऽसकौ, प्रतिदिनं समवाचयदत्रकि । मधुरया परया स्फुटया गिरा, घनरवोपमया बहुलाऽर्थया ॥ १०५ ॥ ( उपजातिः )—श्रद्धालवः श्राद्धगणा अशेषा, जाताः प्रबुद्धाः सकलं निशम्य । अगाधपाण्डित्यममुष्य नित्यं, प्राशंसिषुः सभ्यजनाः समस्ताः ॥ १०६ ॥ इतः समागात्सुरविक्रमादि-पुरेऽश्व-भूताङ्क[१९५७]महीमिताऽब्दे । सन्तस्थिवान् प्रावृषि निष्कषायः, स्थानाङ्गवृत्तिं समवाचयत्सः ॥ १०७ ॥ जेतारणे शैले[१९५७]-शर-ग्रहैक-वर्षेऽयमस्थाच्चतुरश्च मासान् । श्रीसंघबह्वाग्रहकारणेन, धर्माऽम्बुवृष्ट्यै जलदायमानः ॥ १०८ ॥ ( द्रुतविलंबितम् )—भगवतीमिह सूत्रमवाचयत्. सुजनता-विहिताऽऽग्रहहेतुना । उपचकार जनानतिभावुकान्, सकल-शास्त्रमहोदधिपारगः ॥ १०९ ॥ ( भुजङ्गप्रयातम् )—ततो गौडदेशे लघु-ज्येष्ठपश्च-प्रतीर्थी प्रकुर्वञ्जनान् बोधमानः । जगत्यां कुरीतिं कुबुद्धिं विलुम्पन्, सुबुद्धिं ददानः सदा चाऽऽर्हतानाम् ॥ ११० ॥ ( उपजातिः )—आहोर-जालोर-गुडा-पुरेषु, कोरण्टके पावटपत्तनादौ । गत्वा च यात्रां विधिवद्विधाय, शरीर-साफल्यममंस्त सद्यः ॥ १११ ॥ पापौघ-गोत्राऽश-निरेष लोके, भव्याऽऽत्म-चित्ताऽम्बुज-बोधभानुः । आनन्दनाम्ना मुनिना जयेन, सार्धं समागाच्छिवगञ्जपुर्याम् ॥ ११२ ॥ बेण्डाऽऽदिसद्वाद्य-विशेषनादैः, सीमन्तिनीनां मधुरैश्च गीतैः । जयध्वनिं ताररवेण कुर्वत्-सुश्रावकैः केतनधारिभिश्च ॥ ११३ ॥ इत्थं महाऽऽडम्बरतः समस्त-तत्पौरसंघैरचितोत्सवेन । प्रावेशि तत्राऽखिलसन्मुनीन्द्र-शिरोमणिः श्रीमुनिराज एषः ॥११४॥ ( युग्मम् ) सद्बोधिदायं भव-भीतिवारं, पापौघहारं श्रुतितृप्तिकारम् । धर्मोपदेशं ददिवान् किलैष, सुधाऽधरीकारमतुच्छबुद्धिः ॥ ११५ ॥ फलोधिपुर्याः फुलचन्दगोले-च्छेत्याख्यकस्याऽऽगमदत्र संघः । तेनैव सार्धं ह्यगमच्च षड्भिः, सिद्धाचलं शिष्यदलैः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहैषः ॥ ११६ ॥ ( मालिनी )—नव–शर–नव–भूमीमानसम्[१९५९]वत्सरेऽसौ, ह्यकृत परमभक्त्या पूर्णिमायां हि चैत्र्याम् । विमलगिरिसुयात्रां प्राप्तहर्षप्रकर्षः, तदनु स हि महूवाग्राम–दाठा–तलाजाः ॥ ११७ ॥

( उपजातिः )—आगत्य सर्वत्र विधाय यात्रां, श्रीपादलिप्तं पुनराजगाम । प्रावृट्चतुर्मासमिहैव कृत्वा, व्याख्यान-पीयूषमसौ ववर्ष ॥ ११८ ॥ ( युग्मम् ) ततो विहृत्याऽगमदुज्जयन्ताऽ–चलं महात्मा शमताऽम्बुराशिः । विलोक्य तीर्थेशमज-हृषीच्च, वनस्थलीमापदनन्तरं सः ॥ ११९ ॥ तत्रत्ययात्रामयमुच्चभक्त्या, विधाय चाऽऽर्छद्दरमांगरोलम् । प्रणम्य संस्तुत्य च तीर्थनाथ–मायिष्ट वेरावलपत्तनं सः ॥ १२० ॥ ददर्श तीर्थेश्वरमाप मोदं, प्रभासयुक्पट्टणमाजगाम । विधाय यात्रामयमैद्बलेच्चं, ततः समागाद्वर–पोरबन्दरम् ॥ १२१ ॥ तीर्थेशसन्दर्शनतः स्वकार्यं, पूत्वा ह्यगाद् भाणवडं पुरं सः । जिनेन्द्रबिम्बं प्रविलोक्य तत्र, प्रामोमुदीद्भावितभावनाभिः ॥ १२२ ॥ ( प्रियंवदा )—अथ स जामनगरं समागतः, प्रशम-भूषण-सुशोभिताऽऽत्मकः । प्रजित–मोहमदनादिशात्रवः प्रभुवरोऽकृत जिनेशदर्शनम् ॥ १२३ ॥ ( रथोद्धता )—पोरबन्दरपुरीमसौ पुनः, प्राप्तवान् प्रचुर–शिष्य–सेवितः । आदृतः सकलपौरवासिभि,–र्भानुमानिव सुतेजसा ज्वलन् ॥ १२४ ॥ व्योम–तर्क–नव[१९६०]–चन्द्रसम्मिते, वत्सरे न्यवसदत्र साऽऽग्रहः । प्रावृषि प्रथितविघ्नकः सको, देशनाऽमृतमपाययज्जनान् ॥ १२५ ॥ ( उपजातिः )—सूत्रं च जीवाऽभिगमाऽभिधानं, जैनानशेषानतिभक्तिभाजः । अश्रावयन्मेघ–रवस्य जेत्रा, रवेण सूत्रार्थपरिस्फुटेन ॥ १२६ ॥ सदैव पर्यूषण–पर्ववद्धि, प्रावर्तताऽनेकमहोत्सवोऽत्र । प्रभावना–दीनजनाऽऽदिदान–तपःप्रवृद्धिर्महती बभूव ॥ १२७ ॥ गते चतु-र्मास इतो विहृत्य, सिद्धाऽचलं रैवतकाऽचलं च । गत्वा सुखेनाऽकृत तत्र यात्रा–मगान्महूवाग्राममितो विहृत्य ॥ १२८ ॥ मही-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यसस्तस्य समागतस्य, पुरप्रवेशं महतोत्सवेन । बेण्डाऽऽदिनादैर्बधिरीकृताऽऽशः, सङ्घो ह्यकार्षीच्छुभभावयुक्तः ॥ १२९ ॥ सदेशनाभिर्गुरुरत्र लोकान्, भव्याननेकान् प्रतिबोध्य तस्मात् । सणोसराग्राममयाम्बभूव, प्रावेशि पौरैर्महता महेन ॥ १३० ॥

( भुजङ्गप्रयातम् )—ततः पालियादं पुरं सञ्जगाम, विनेयैरनेकैः श्रिताङ्घ्र्यब्जयुग्मः । अकारि प्रवेशः पुरे सर्वपौरै-रपूर्वैर्गरिष्ठैर्महैरेतकस्य ॥ १३१ ॥ ददौ देशना वारिधारासमाना, भवाऽम्भोधिताराः कृताऽघौघहाराः । महाबोधसारा निवाराः कुगत्याः, कषायाऽऽदिमारा दयासुप्रचाराः ॥ १३२ ॥ ( पञ्चचामरम् )—सुदामडापुरीमगादसौ परीषहाऽऽसहः, पुर-प्रधान-सज्जन-प्रवर्तितैर्महोत्सवैः । समस्त-वाद्य-वादनैर्जयाऽऽरवैश्च सद्भटै-श्चकार धीरधीरयं पुरप्रवेशनं मुदा ॥ १३३ ॥ अशेष-शास्त्र-सागर-प्रमन्थनैकमन्दरः, कुवादि-वृक्षकुञ्जरः प्रमुक्तिमार्गदर्शिनीम् । सुधामयीं सुदेशनामदादनल्पबुद्धिमान्, निपीय तत्कथाऽमृतं प्रबुद्धतां प्रपेदिरे ॥ १३४ ॥ ततो विहृत्य सायलाप्रधानसत्पुरीमगात्, सुपावनः क्षितेस्तलं महाविपश्चिदग्रणीः । प्रमोदिपौर-सज्जनैर्विरच्य भूरिसूत्सवं, प्रवेशितः पुरीमसौ प्रभाकर-प्रभासुरः ॥ १३५ ॥ अदायि धर्म-देशनाऽमुना सुशालिना गुणै-र्द्रुतप्रबोधकारिणी भवाऽब्धिपोतरूपिणी । पयोधर-प्रणादजिद्गिरा विशालपर्षदि, निशम्य सर्वसज्जना बभूवुरस्य रागिणः ॥ १३६ ॥

( उपजातिः )—थानाऽभिधानं नगरं ततोऽगात्, संघः समेतं विपुलोत्सवेन । प्रवेशयामास पुरं स्वकीयं, महान्तमेनं गुरुदेववर्यम् ॥ १३७ ॥ शशीव सौम्यो गुरुरप्यमुष्मिन्, व्याख्यानपीयूषमलम्प्रवृष्य । अदीधपद्भव्यजनानशेषान्, प्रावीविदच्चाऽऽर्हतधर्मसारम् ॥ १३८ ॥ ( शार्दूलविक्रीडितम् )—वांकानेरमुपाययौ गुरुवरः प्रख्यातिमद्भूतले, बेण्डाद्याङ्गलवादनैरुप-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गतं विद्यावतामादिमम् । अत्युच्चैर्जनताकृतैर्जयरवैस्तुङ्गैरनेकैर्ध्वजैः, श्रीसंघो गुरुराजमेनमनघं प्रावेशयत्स्वम्पुरम् ॥ १३९ ॥
( वसन्ततिलका )—आनन्दयन् सकलसंघमयं महात्मा, धर्मोपदेशमददाद्बहुलार्थसारम् । संश्रुत्य सर्वजनता मुदिता भवन्ती, त्यागाऽऽदिनैकनियमं जगृहे तदानीम् ॥ १४० ॥ ( उपजातिः )—ततः क्रमादायत मोरबीं स, श्रीसंघ एतं प्रचुरोत्सवेन । प्रावीविशत्स्वं पुरमादरेण, गुर्वागमेनाऽतिमुदं दधानः ॥ १४१ ॥ ( इन्द्रवंशा )—ओजस्विनीमेष ददौ सुदेशनां, सर्वस्य हृद्याऽऽखिल–शङ्कनच्छिदाम् । दुःपार–संसार–समुद्रतारिणीं, संश्रुत्य सम्यक्त्वमयुश्च सज्जनाः ॥ १४२ ॥
( भुजङ्गप्रयातम् )—रणं मालिकायाः समुल्लङ्घ्य कच्छे, पुरेऽञ्जारके यातवानेष धीरः । ददर्शाशु भद्रेश्वरस्थं जिनेन्द्रं, निजं जन्म धन्यं स मेने तपस्वी ॥ १४३ ॥ इतः कच्छमुन्द्रामयासीत्सशिष्यो, नदद्बेण्ड–शङ्खाऽऽदिकध्वान–गीतैः । पुरीय–प्रवेशे ततं सूत्सवं हि, प्रचक्रेऽस्य संघस्ततस्त्यः समस्तः ॥ १४४ ॥ (उपजातिः)—मही–रसौ[१९६१]ऽङ्क–क्षितिसम्मिताऽब्दे, वर्षर्तुवासं जनताऽऽग्रहेण । सच्छिष्यवृन्दैः परिजुष्यमाण–श्चक्रे महीयाञ्छ्रुतपारदृश्वा ॥ १४५ ॥ अत्रोत्तराऽऽध्ययनश्च सूत्रं, सभाऽऽसनाऽऽसीन–विलीनरागः । जीमूतनादाऽतिगभीरवाचा, संश्रावयामास जनानशेषान् ॥ १४६ ॥ ततोऽगमत्कच्छभुजं विहृत्य, ह्युपस्थितं तं नगरोपसीमम् । बेण्डाऽऽदिवाद्यैः सह सर्वसंघः, प्रवेशयामास पुरं प्रहृष्टः ॥ १४७ ॥ नेत्राऽङ्गनन्देन्दुमिते[१९६२] च वर्षे, पौराऽऽग्रहात्प्रावृषि तत्र तस्थौ । जोजुष्यमाणक्रमपङ्कजोऽसौ, शान्तस्वभावो यमिनां वरिष्ठः ॥ १४८ ॥
( मनोरमा )—भगवतीमिहाऽसकौ गुरुः, सुजनताऽऽग्रहादवाचयत् । घन–रवाऽनुकारिवाचया, मधुरया सुधा–समानया ॥ १४९ ॥ ( इन्द्रवंशा )—कच्छीयरम्यामथ माण्डवीपुरीं, सम्प्राप शिष्यैः सहितो महान् गुरुः । प्रावेशि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पौरैरधिकोत्सवेन स, रामर्तु–रन्ध्र–क्षितिमान[१९६३]वत्सरे ॥ १५० ॥ चक्रे चतुर्मासमिहाऽऽग्रहान्नृणां, प्राशिश्रवत्प्रज्ञपनाऽऽख्य-सूत्रकम् । तच्छ्रोतुमाजग्मुरसंख्यका जना, धर्मप्रवृद्धिर्महती ह्यजायत ॥ १५१ ॥ अनूपदेशे भिदडाऽभिधानं, पुरं जगामैष सहाऽऽत्मशिष्यैः । वितत्य भूर्युत्सवमेतमेनं, प्रवेशयामास समस्तपौरः ॥ १५२ ॥ श्रीमन्तमागृह्य समस्तसंघः, समुद्र–तर्क–ग्रह[१९६४]–भूमिवर्षे । अतिष्ठिपत्प्रावृषि संनिवस्तुं, प्रौढप्रतापात्तपनायमानम् ॥ १५३ ॥ ( द्रुतविलंबितम् )—भगवतीवरसूत्रमशुश्रव–दगणिताऽऽगत–सज्जनमण्डलीम् । प्रमुदमाप निशम्य जनोऽखिलो, गुरुममुं प्रशशंस दिवानिशम् ॥ १५४ ॥

( उपजातिः )—कच्छीयमञ्जारपुरं ततोऽसौ, पनीपदामास विशालबुद्धिः । बेण्डाऽऽदिवाद्यैर्महिमानमस्य, गायंश्च पौरः पुरमानिनाय ॥ १५५ ॥ अत्याग्रहाद्भूत–रसाऽङ्कपृथ्वी–प्रमाण[१९६५]वर्षे चतुरश्च मासान् । तस्थौ च तस्मिन् सह शिष्यजातैः, स उत्तराऽऽध्ययनं जगाद ॥१५६॥ ( द्रुतविलंबितम् )—अभवदेषु पुरेष्वपि पञ्चसु, प्रतिसमं ह्युपधानमहातपः । क्रमिकमस्य गुरोरुपदेशतो, विविधजन्मकृताऽघ–विघातकम् ॥ १५७ ॥ ( जलोद्धतगतिः )—अगाच्च सुथरीपुरीमभयदः, सतां प्रभुमुदीक्ष्य नष्टकलुषः । असावनलसन्निभः सुतपसा, प्रबोध्य जनता(तां) ततो विहृतवान् ॥१५८॥ (उपजातिः)—घृताऽऽदिकल्लोल-सुतीर्थमागात्, प्रैक्षिष्ट तीर्थेशमुदारभक्त्या । ततो जखाऊनगरीमुपेत्य, व्यालोकताऽसौ जिनराजबिम्बम् ॥ १५९ ॥ ततो नलीयापुरमाययौ हि, तत्रस्थतीर्थेशमपश्यदेषः । विहृत्य तस्मादयमाजगाम, तेरापुरीं तीर्थपतिं ननाम ॥ १६० ॥ कोठारपुर्यादिकभूरितीर्थ––यात्रां प्रकुर्वन् दश साधुसाध्वीः । प्रदीक्षयामास जगद्धितैषी, देशे ह्यनूपे विहरन्नजस्रम् ॥ १६१ ॥

(शार्दूलविक्रीडितम्)––वर्षे बाण–रसाऽङ्कचन्द्र[१९६५]तुलिते कच्छीयसन्माण्डवी–वासि–श्रेष्ठिगणाऽग्रगण्य–व्रजपालाऽङ्गप्रजन्मा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृती । नाथाभाइसुनामकः शुभमतिः सिद्धाऽद्रियात्राचिकीः, श्रीसङ्घं निरजीगमद्बहुमुदा षड्रीपमुच्चैस्तरम् ॥ १६२ ॥

( उपजातिः )—तेनैव सत्रा व्यचलत्किलाऽसौ, तुरङ्गदिङ्मानमुँनिप्रयुक्तः । शत्रुञ्जयं तीर्थमुदीक्षितुं हि, विशुद्धचारित्रपवित्रदेहः ॥ १६३ ॥ श्रीपादलिप्ते नगरे महीयान्, तर्काऽङ्गरन्ध्रक्षितिमाननवर्षे[१९६६] । तस्थौ च तस्मिन्महताऽऽग्रहेण, पयोदकालं व्यपनेतुकामः ॥ १६४ ॥ नन्दीश्वरद्वीपमरीरचच्च, श्रद्धालुकः संघजनः समुत्कः । द्विसाधुसाध्वीत्रयदीक्षणं च, महामहेनाऽभवदत्र पुर्याम् ॥ १६५ ॥ ( रथोद्धता )—उज्जयन्तगिरिमाययौ ततः, शिष्यवृन्दकलितः क्षमान्वितः । तीर्थनाथमवलोक्य हर्षित–श्चैच जामनगरं कृपान्वितः ॥१६६॥ आगतो गुरुवरो मुदाऽन्वितः, सर्वसंघरचितैर्महोत्सवैः । प्राविशत्पुरमथाऽऽग्रहात्स्थितः, प्रावृषं गमयितुं मुनीश्वरः ॥ १६७ ॥ ( प्रियम्वदा )—हय–रस–ग्रह–धरामितेऽब्दके[१९६७], भगवतीमिह जनाऽनुरोधतः । जलद–नादसमया सुवाचया, सदसि सर्वजनतामशुश्रवत् ॥१६८॥ (भद्रिका)—समवसरणमत्र सुन्दरं, व्यरचि सदुपधान-मप्यभूत् । विविध–रुचिर–सूत्सवोऽभवत्, परमगुरुवरोपदेशतः ॥१६९॥ ( वंशस्थम् )—प्रभावना नित्यमपूर्ववस्तुभि–रकारि पूजा विविधोपचारतः । तपांसि भूयांसि बभूवुरत्र हि, ददौ चतुर्भ्यो गुरुरेष दीक्षणम् ॥१७०॥ ( भद्रिका )—तदनु स हि जगाम मोरबीं, विविध–सुजनकारितोत्सवैः । पुरमविशदयं महातपाः, स्व–पर–निगमपारगो महान् ॥१७१॥ (रथोद्धता)—शैल–तर्क–नवचन्द्रवत्सरे[१९६८], प्रावृषेण्यवसतावबाचयत् । आग्रहाद्भगवतीमसौ गुरुः, पाययंश्च सुजनान् कथाऽमृतम् ॥१७२॥ (तोटकम्)—तत एष सुरैवतशैलवरं, सहशिष्य उपेत्य ददर्श जिनम् । विमलाऽचलतीर्थमगच्छदितः, प्रणनाम जिनेश्वरमादिविभुम् ॥ १७३ ॥

( उपजातिः )—शङ्खेश्वरश्रीप्रभुपार्श्वनाथं, ननाम गत्वा स हि भोयणीं च । विहृत्य तस्मादयमाजगाम, राजाऽऽदिकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तन्नगरं प्रशस्तम् ॥ १७४ ॥ ( इन्द्रवंशा )—नानद्यमानैर्वरबेण्डकाऽऽदिभिः, श्रीसंघकाऽऽरब्धमनोहरोत्सवैः । सुश्रावकाऽशेष–महर्द्धिकेभ्यकै–र्वावन्द्यमानः पुरमाविवेश सः ॥ १७५ ॥ नवाऽङ्कनन्द–क्षितितुल्यवर्षे[१९६९], वर्षर्तुवासं विपुलाऽऽग्रहात्सः । कोठारिपोल–स्थित–नव्यकोपा–श्रये ह्यकार्षीत्सह शिष्यवर्गैः ॥ १७६ ॥ सुधाऽधरीकारिमहोपदेशै–र्भवाऽब्धितारैरघराशिहारैः । श्रीसंघमत्यन्तमसौ प्रतर्प्य, प्रादिद्युतच्छासनमार्हतं सः ॥ १७७ ॥ ततो ययौ पानसरं सशिष्यः, पौरैश्च सर्वैरतिसत्कृतोऽभूत् । प्रबोधयामास जनांश्च तत्राऽ–मोघोपदेशैः सकलार्थसारैः ॥ १७८ ॥ स भोयणीपत्तनमेत्य चक्रे, शङ्खेश–पार्श्वप्रभुदर्शनं च । सच्चक्रुरेतं पुरवासिनश्च, श्रद्धालवः श्राद्धगणा अपीह ॥ १७९ ॥ ( वैश्वदेवी )—तारङ्गातीर्थं सङ्गतोऽसौ महात्मा, वन्दित्वा भक्त्या संस्कृतोक्त्या जिनेन्द्रम् । दत्त्वा भव्यानां सम्प्रबोधं यथेष्टं, दीनाऽनाथत्राता विजह्रे च तस्मात् ॥ १८० ॥

( वसन्ततिलका )—वीसाऽऽदिकं नगरमागतवान् क्रमात्सः, श्रीसंघ–रम्य–रचितोत्सवमीक्षमाणः । पुर्यां प्रवेशमकरोदनिलप्रभोऽसौ, धर्मोपदेशममृतं सकलानपिप्यत् ॥ १८१ ॥ ( प्रमुदितवदना )—वडनगरमितो विहृत्याऽगमत्, पुरजन–रचितोत्सवैरुज्ज्वलैः । अविशदयमनल्पधीस्तत्पुरं, जलद–रव–गिरा ददौ देशनाम् ॥ १८२ ॥ ( उपजातिः )—पथि क्रमादागतवांस्ततोऽयं, नाम्ना च लादोलपुरं गरीयान् । प्रवेशितः स्वम्पुरमादरेण, संघैरशेषै रचितोत्सवेन ॥ १८३ ॥ संसार–विस्तारहरीमघौघ–विद्राविणीं धार्मिकदेशनां च । प्रदाय सर्वान् भविकानतर्पीत्, सत्यप्रवक्ता भववार्द्धितारी ॥ १८४ ॥

( आख्यानकी )—इयाय बीजापुरमेष तस्मात्, कृत्वा विहारं सुधियश्च पौराः । वादित्रवृन्दैर्नगरप्रवेश–मकारयंस्तेन महीयसा हि ॥ १८५ ) ( उपजातिः )—जीमूतनादाऽनुकृता स्वरेण, श्रीवीतरागोदित–शुद्धधर्मान् । स्वर्गाऽपवर्ग–प्रतिपत्ति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हेतून्, उपादिशत्तत्र जनानुपेतान् ॥ १८६ ॥ ततः समेतः पुरि मानसायां, गुर्वागमाद्धृष्टतराश्च लोकाः । बेण्डाऽऽदिवाद्यैर्बहुभिश्च पौरै–रानिन्यिरे तं नगराऽन्तरेतम् ॥ १८७ ॥ ( इन्द्रवंशा )—तद्वक्त्र–चन्द्रच्युत देशनाऽमृतं, कामं च सम्पीय समस्त–सज्जनाः । निःसीमकाऽऽनन्दपयोनिधौ तदा, मग्नाः स्वकीयं सकलं विसस्मरुः ॥ १८८ ॥

( इन्द्रवज्रा )—शेश्रीयमाणः क्रमपद्मयुग्मो, लोकैरशेषैर्गतमोहपङ्कः । पीथापुरं सन्नगरं प्रपेदे, कुर्वन् विहारं गुरुराज एषः ॥ १८९ ॥ ( उपजातिः )—समागतं सीमनि पत्तनस्य, निशम्य तत्रत्यसमस्तपौरः । सद्वाद्य–गीतैर्जय–तार–नादैः, साम्मुख्यमागत्य पुरं निनाय ॥ १९० ॥ ( वंशस्थम् )—अदायि तेनाऽत्र विशेषदेशना, प्रभावनाऽर्चातपसां विवर्द्धनम् । प्रलेभिरे तत्त्वमशेषमार्हतं, प्रभावुकाः श्राद्धगणा विचक्षणाः ॥ १९१ ॥ ( उपजातिः )—देगाँवसंज्ञं नगरं ततोऽगात्, प्रावेशयत्तत्र पुरं च संघः । वितत्य बेण्डाऽऽदिकवाद्यजातै–र्महामहं गौरवभक्तिनिष्ठः ॥ १९२ ॥ व्याख्यानमोजस्वि ददौ च तत्र, स्याद्वाद–पीयूष–मशेषलोकान् । अदीधपद्भानुरिवान्धकार–मज्ञानमेषां समनीनशच्च ॥ १९३ ॥

( द्रुतविलंबितम् )—कपडवञ्जपुरं समुपागतः, सकलसंघजनैरतिसत्कृतः । उपदिदेश विशुद्ध–जिनोदितं, शिवसुखप्रद-धर्ममहिंसनम् ॥ १९४ ॥ ( उपजातिः )—ततोऽसकावागतवान् महूधां, प्रवेशितो भूरिमहोत्सवैः सः । प्रबोधयामास जनांश्च भव्यान्, विहृत्य तस्मादगमच्च खेडाम् ॥ १९५ ॥ महामहेनाऽखिलपौरलोकः, समागतं तं नगरं सुसज्जम् । प्रावेशयत् सोऽपि सुदेशनाभिः, सुधोपमाभिः सकलानतर्पीत् ॥ १९६ ॥ ( भुजङ्गप्रयातम् )—ततो मातराऽऽख्यं पुरश्चाऽऽजगाम, ददर्श प्रभक्त्या स सचाऽऽदिदेवम् । विनेयैः समग्रैर्युतस्तं नुनाव, चिरं रम्यपद्यैर्मृदुश्लोकपुञ्जैः ॥ १९७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





( उपजातिः )—ततो गतः स्तम्भनपत्तनेऽसौ, श्रीपार्श्वनाथप्रभुमूर्तिमुग्राम् । व्यलोकताऽसीमसुभक्तिचित्तः, तुष्टाव चैनं ललितैश्च पद्यैः ॥ १९८ ॥ ( इन्द्रवज्रा )—इत्थं विहारक्रमतः समागात्, सिद्धाऽद्रियात्रां सुचिकीर्षमाणः । व्योमाश्व-नन्देन्दुमिते [१९७०] 'च' वर्षे, तीर्थेशमालोक्य मुदं बभार ॥ १९९ ॥ तत्राऽऽगता सा रतलामवासि-श्रीचान्दमल्लाऽऽख्यमहेभ्य-पत्नी । आगृह्य नाम्ना फुलकूमरी त-मतिष्ठिपत् प्रावृषि संनिवस्तुम् ॥ २०० ॥ ( शार्दूलविक्रीडितम् )—माहात्म्यं विमलाऽ-चलीयमसकौ व्याचष्ट विद्याचण-स्तस्याश्चैव महाऽऽग्रहाद्भगवतीसूत्रं महापावनम् । सानन्दं ह्युपधानमत्र समभूत्पूजा प्रशस्या बहुः, वात्सल्यं सहधर्मिणां बहुविधं जातं तदीयं महत् ॥ २०१ ॥ ( उपजातिः )—प्रभावना श्रीफलशर्कराऽऽद्यैः, सद्धर्मवत्या विदधे सदैव । दीनाऽनुकम्पा बहुशस्तयाऽत्र, व्यतानि नित्यं तप आचरन्त्या ॥ २०२ ॥ सीहोरमार प्रभुरेष धीरः, पौरैरशेषैर्बहुसत्कृतोऽभूत् । सुधोपमं सोऽथ ददौ च धर्मो-पदेशमागाद्वरतेजपुर्याम् ॥ २०३ ॥ सम्मेनिरे तत्र सुविज्ञपौरा, उपादिशच्चाऽऽर्हतशुद्धधर्मम् । ववन्दिरे सर्वजना अथैनं, स भावयुक्तं नगरं ततोऽगात् ॥ २०४ ॥ पुरं प्रविष्टो रुचिरोत्सवेन, पापाऽद्रिवज्रां भवदुःखहारीम् । सुदेशनां सद्गुरुरत्र दत्त्वा, बहूपचक्रे सुजनाननीहः ॥ २०५ ॥ घोघापुरीमागतवांस्ततोऽसौ, ततान तत्रत्य-समस्त-पौरः । पुरप्रवेशाय महं गुरूणां, व्याख्यानमोजस्वि ददौ स जिष्णुः ॥ २०६ ॥ ( तोटकम् )—तणहामगमत्सकलर्द्धिमतीं, सुपुरीमथ संघकृतैः सुमहैः । प्रविवेश मुदा ददिवानसुकः, शिवसौख्यददं ह्युपदेशमलम् ॥ २०७ ॥ ( भुजङ्गप्रयातम् )—इतस्तापसग्राममायात एष, समारब्ध-नानाविचित्रोत्सवैः सः । तदन्तःप्रविष्टः पयोदस्वनेन, व्यदत्तोपदेशं भवाऽब्धि-प्रतारम् ॥ २०८ ॥ तलाजामयासीदितः श्रीमुनीन्द्रः, पुराऽशेष-लोक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवृत्तोत्सवौघैः। अविक्षत्तदन्तः सुधोद्गारिवाचा, ददौ देशनां श्रोत्रपीयूषधाराम् ॥ २०९ ॥ इतो जामवाडीपुरीमाससाद, भृशं सत्कृतः पौरलोकैरशेषैः। उपादेशि तत्राऽमुना शुद्धधर्मः, सुरेन्द्राऽऽदिलोकप्रदायी नराणाम् ॥ २१० ॥

( उपजातिः )—इतश्च शत्रुञ्जयतीर्थयात्रां, कृत्वा समागात्पुरवल्लभीं सः। साध्व्याश्च दीक्षामिह सम्प्रदाय, खम्भातनाम्नीं नगरीमयासीत् ॥२११॥ ( शार्दूलविक्रीडितम् )—रत्नाऽऽदिक्रय-विक्रयी भगुसुतः पानाऽभिधः श्रेष्ठिराट्, आगात् सूर्यपुरादमुं निजपुरं शीघ्रं निनीषुर्महान्। विज्ञप्तिं महतीं चकार वरधीस्तत्राऽऽशु गन्तुं गुरोः, शीघ्रं श्रीगुरुभिर्व्यहारि सकलैः शिष्यैश्च तस्यां दिशि ॥ २१२ ॥ (उपजातिः)—वटोदरं सत्पुरमेत्य तत्र, लोकांश्च भव्यानुपदिश्य धर्मम्। पालेजमागत्य जिनोरपुर्यां, सत्रा च शिष्यैः समुपागतोऽभूत् ॥ २१३ ॥ ( द्रुतविलंबितम् )—जगडियाऽभिध-सत्पुरमाययौ, ह्यकृत तीर्थपतेरवलोकनम्। पथि मुमुक्षुजनं समदीक्षयत्, उपगतः स हि सूर्यपुरं गुरुः ॥ २१४ ॥ ( वसन्ततिलका )—नानद्यमान-पटहाऽऽदिकवाद्यवृन्दैः, शङ्खान् धमद्भिरपरैर्जयमुच्चरद्भिः। सौवर्णयष्टि-वरकेतनधारिपुम्भिः, सुश्राविका-सलयगीतरवैश्च हृद्यैः ॥ २१५ ॥ श्रीसङ्घनिर्मितमहामहमीक्षमाणः, पोपूज्यमानचरणः प्रतिसद्म तत्र। अन्तः प्रविश्य सह शिष्यगणैरुदारो, गोपीपुरानव उपाश्रय एत्य तस्थौ ॥ २१६ ॥ संघाऽऽग्रहेण शशि-वाजि-[१९७१]नवेन्दुवर्षे, वर्षर्तुवासमकरोत्समवाचयच्च। श्रीनन्दिसूत्रमखिलाऽऽगमसारदर्शी, चैकस्य तत्र ददde गुरुरेष दीक्षाम् ॥२१७॥ ( भुजङ्गप्रयातम् )—चतुर्मासपश्चाद्विहृत्याऽऽगमत्स, कतारं प्रसिद्धं पुरं तत्र लोकैः। कृतां सत्कृतिं चोररीकृत्य भूरि, ददौ चोपदेशं महान्तं जनानाम् ॥ २१८ ॥ ( उपजातिः )—मार्गस्थितानेककठोरकाऽऽदि-पुराणि गत्वा प्रतिबोध्य लोकान्। सद्बोधिबीजं ददिवान्महीयान्, प्रहापयन्मोहमशेषमेषाम् ॥ २१९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





( द्रुतविलम्बितम् )—जगडियामथ शिष्यदलैः समं, समधिगम्य जिनेशमलोकत । विहरमाण इतः पुरमाण्डवी–मुपगतः प्रतिबोधमदान्नृणाम् ॥ २२० ॥ ( तोटकम् )––भृगुकच्छपुरीमयमागतवान्, प्रविलोकितवानिह तीर्थपतिम् । अभवच्च विशुद्ध-मतिर्मुदभा–गयमुज्ज्वल–शीलचरित्रधरः ॥ २२१ ॥ ( उपजातिः )––ततश्चलन्नेष समाजगाम, पालेजपुर्यामवनीं पुनानः । वावन्द्यमानः सकलैश्च पौरै–र्व्याख्यानमत्राऽददताऽतिरम्यम् ॥ २२२ ॥ आमोद–जम्बूसरपत्तनेऽगात्, पुरद्वयेऽशेषजनैरवन्दि । धर्मोपदेशाऽमृतपायनेन, सन्तर्पयामास जनानशेषान् ॥ २२३ ॥ आयिष्ट गन्धारपुरं ततोऽसौ, वेण्डाऽऽदिवाद्यैर्नगरीं प्रविश्य। प्रदत्तवान् धार्मिकदेशनां स, प्राबोधि तत्त्वं जनता ह्यशेषा ॥ २२४ ॥ कावीस्थसत्तीर्थमुपेत्य यात्रां, विधाय चागात्पुरि पादरायाम्। वितत्य रम्योत्सवमेनमन्तः, प्रावेशयत्संघजनोऽतिहृष्टः ॥ २२५ ॥ ( वंशस्थवृत्तम् )—सुधामयीमस्य सुदेशनामलं, ह्यसार–संसार–विरागकारिणीम् । मुनीन्द्रदुःप्रापविमुक्तिहारिणीं, प्रशंसयामास निशम्य सद्गुरुम् ॥ २२६ ॥ ( पञ्चचामरम् )––दरापराऽ-भिधां पुरीमसावियाय शिष्ययुक्, समागतं पुराद्बहिर्गुरुं ह्यमुं पुरीजनः । महानकाऽऽदिवादन-स्वनैर्जयोच्चरावकै–रवी-विशत्पुरान्तरं सुतोरणाऽऽदिसज्जितम् ॥ २२७ ॥ ददावसौ सुदेशनां घनाऽऽरवोपमस्वनै–रिहाऽऽगतं गुरुं ज्वरस्त-मासु गाढमग्रहीत् । अतो विहर्तुमक्षमः कियद्दिनानि तस्थिवान्, अचीकरद्भिषग्वरैस्तदौषधं महाजनः ॥ २२८ ॥ ( शार्दूलविक्रीडितम् )—शास्त्रार्थस्य चिकीरदादिह तदा पन्न्यासशाली सक, आनन्दाऽऽदिकसागरस्तदवधिं पौर्षीं परां पूर्णि-माम् । एतस्मात्तदवस्थ एष चलितः श्रीमद्वडोदापुरः, पञ्चक्रोशविदूरवर्तिनगरीमागत्य तस्थौ गुरुः ॥ २२९ ॥

( उपजातिः )—शास्त्रार्थ–पाम–व्यथितस्य तस्या–ऽऽनन्दोदधेरागमनप्रतीक्षाम् । कुर्वन् स्थितस्तत्र समस्तवादि–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विपेन्द्रपञ्चानन एष सोत्कः ॥ २३० ॥ भ्रष्टप्रतिज्ञो वितथाऽभिमानी, नैवाऽऽगतस्तत्र दिने च तस्मिन् । क्रोष्टेव बिभ्यद्द्रुरितो न जाने, कस्मिन्नरण्ये प्रविलीय तस्थौ ॥ २३१ ॥ गतेऽवधौ नोपगते च तस्मि–ञ्छ्रीमान् गुरुर्वैद्यगणाऽऽग्रहेण । ततो विहृत्याऽऽगतवान् वडोदां, शरीरनैरुज्यविधातुकामः ॥ २३२ ॥ चिकित्सकास्तत्र वरेण्यमेनं मासैस्त्रिभी रोगविमुक्तकायम् । सदौषधीभिर्व्यदधुर्महान्त, ऐच्छत्ततो मोहमयीं प्रयातुम् ॥ २३३ ॥ ( शार्दूलविक्रीडितम् )—इत्याचार्यशिरोमणेर्जिनकृपाचन्द्रस्य सूरीशितुः, सूरिश्रीजयसागरेण रचिते काव्ये चरित्राऽऽत्मके । सामान्यव्रति–नैकपत्तनकृत–ग्लौ–वाजिसंख्याऽन्वित–चातुर्मास–सुवर्णनः समभवत्सर्गो द्वितीयोऽप्यसौ ॥ २३४ ॥

॥ इति द्वितीयः सर्गः ॥

## ( अथ तृतीयः सर्गः )

( उपजातिः )—अथाऽसकौ माधवरम्यमासे, वटोदरात्सन्नगराद्विहृत्य । विनेयवृन्दैर्जगदेकजिष्णु–र्डभोइसंज्ञं नगरं समागात् ॥ १ ॥ वादित्रवृन्दैर्जयरावकारि–सुश्रावकौघैः प्रणदत्सुशङ्खैः । पुरं प्रविश्याऽखिललोकमान्यो, धर्मोपदेशं ददिवाङ्गनानाम् ॥ २ ॥ सीनोरमागत्य ततो विहृत्य, प्रवेशितश्चारुकृतोत्सवेन । वारीव मेघो जनतोपकृत्यै, व्याख्यानधारां सुचिरं ववर्ष ॥ ३ ॥ ( द्रुतविलंबितम् )—जगडियानगरीमयमीयिवा–नुपदिदेश जिनेशनिरूपितम् । परमधर्ममहिंसनलक्षणं, सकल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सौख्यसुनायकमुज्ज्वलम् ॥ ४ ॥ तदनु सूर्यपुरं परमर्द्धिकं, ह्युपगतः पुरवासिजनार्चितः । अदित शाश्वतधर्मसुदेशनां, विविध–जन्म–महागदहारिणीम् ॥ ५ ॥ विहरमाण इतो नवसारिकां, शुभपुरीमसदत्करुणालयः । सकल–पौरिकसज्जन-सत्कृतो, भवनिवारकधर्ममुपादिशत् ॥ ६ ॥ ( शालिनी ) बिल्लीमोरापत्तनं चापि गत्वा, लोकैः सर्वैश्चारुसत्कारमाप्तः । धर्माऽधर्मौ तत्फलं चोपदिश्य, भव्याँल्लोकान् रञ्जयामास धीरः ॥ ७ ॥ ( तोटकम् )––वरसाडपुरीं सह शिष्यगणै–रुपयात इतो विहरन्नसुकः । परमाऽऽदरमाप्य कृतं सुजनैः, शिवमार्गमदीदृशदेष जनान् ॥ ८ ॥ ( वसन्ततिलका )––वापीमितः परिययौ विबुधाग्रगन्ता, पौराः समेतगुरुराजममुं प्रहृष्टाः । बेण्डादिवाद्यनिनदैरनयन् पुरान्त–श्चारूपदेशमददादयम-प्यभिज्ञः ॥ ९ ॥ ( इन्द्रवज्रा )––श्रीग्राममस्माद्विहरन्नुपेतः, पौरव्रजैर्विहितमुत्सवमेष पश्यन् । कृत्वा प्रवेशमददिष्ट महोप-देशं, लोकाः प्रसेदुरधिकं विविदुश्च धर्मम् ॥१०॥ (नन्दिनी)––समगादितः प्रथितदेणुसंज्ञकं, सुपुरं समं निजसुशिष्यमण्डलैः । विपुलोत्सवैः सकलसंघनिर्मितैः, समविक्षदेष ददिवांश्च देशनाम् ॥ ११ ॥ ( उपजातिः )––अगादगासीनगरीमथाऽसौ, पौराश्च निन्युर्नगराऽन्तरेनम् । वाद्यैश्च गीतैर्जय–तारनादै–रुपादिशच्चैष जिनोक्तधर्मम् ॥ १२ ॥ अथाऽऽयताऽसौ नगरं भयण्डरं, प्रावेश्यताऽशेषजनैर्महेन । अदायि चानेन महोपदेशः प्रामोमुदीत्तेन समस्तपौरः ॥ १३ ॥ ( प्रहर्षिणी )––अन्धेरीनगर-मुपागते च तस्मिन्, सत्पौरा विविधमहोत्सवं वितेनुः । आनिन्युर्दिनमणिभासुरं विभासा, व्याख्यानं रुचिरमदात्स बोधिदा-यम् ॥ १४ ॥ ( इन्द्रवंशा )––माहीसमागत्य पुरं ततोऽसकौ, भव्यांश्च जीवान् प्रतिबोध्य सद्गुरुः । मुम्बापुरीभायखलामु-पाययौ, शिष्यैर्गरिष्ठैः परिजुष्टपत्कजः ॥ १५ ॥ ( उपजातिः )––इतो महेभ्याः सकलाः समेत्य, बेण्डाऽऽदिवाद्यैर्जयमुच्चरन्तः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौवर्णयष्टि–ध्वज–शङ्खनादैः, सुश्राविकामण्डल–हारिगीतैः ॥ १६ ॥ श्राद्धैरसंख्यैर्गुरुराजमेनं, स्वानीय मुम्बापुरि लालबागम् । सुसज्जितं तोरणबन्धनाद्यैः, प्रावीविशंश्चारुमहामहेन ॥१७॥ प्रमथ्यमानाऽर्णव–निस्वनाऽनु–कार्या गिरा प्रावृषि मेघवत्सः । सद्देशना–सौध–रस–प्रधारां, प्रवृष्य पिप्राय च सर्वसङ्घम् ॥ १८॥ सहेतुकं तत्र गुण–द्वि–सप्त–नवेन्दुवर्षे (१८७२–७३–) जनताऽऽग्रहात्सः । वर्षर्तुकालं गमयाञ्चकार, साधव्य–निश्शेष–गुण–प्रशोभः ॥ १९ ॥ ( वैतालीयम् )––भगवतीमशिश्रवद्गुरुः, सह वृत्त्या जनताऽऽग्रहादयम् । वारिवाहगर्जितोपमै–र्निस्वनैः सुमधुरैः स्फुटाऽर्थकैः ॥ २० ॥ ( मालती )––अभयकुमारचरित्रमुत्तमं, विविधकथारससुन्दरं वरम् । अचकथदेष सुपावनो गुरु–र्मधुमधुराऽक्षरया गिरा मुदा ॥२१॥ (उपजातिः)––मनोरमाऽऽश्चर्यकथाऽभिरामं, पुण्यप्रदं पाण्डवसच्चरित्रम् । स वाचयाञ्चक्र उदारकीर्ति–रानन्दयन् सर्वजनस्य चित्तम् ॥ २२ ॥

( इन्द्रवज्रा )––चन्द्राच्चकोरा इव सद्गुरूणा–मेषां शरत्पार्वणचन्द्रजेतुः । वक्त्रात्क्षरद्धर्म्यकथामृतानि, सुश्रावकाः स्वैरमलं निपीय ॥२३॥ ते तत्क्षणं प्राच्यगरिष्ठसूरि-मस्मार्षुरानन्दपयोधिमग्नाः । ततस्त्विहत्यः परिमृश्य संघः, क्रमाऽऽगताऽऽम्नायिकशुद्धरीत्या ॥ २४ ॥ विद्यासमुद्राय गुणाऽऽलयाय, तेजोभिरस्मै तपनप्रभाय । दातुं तदाऽऽचार्यपदं चकाङ्क्ष, ततान चैतन्महमुज्ज्वलं सः ॥ २५ ॥ ( त्रिभिर्विशेषकम् ) मासे च पौषे तिथिपूर्णिमायां, नक्रे शुभाऽनेकखगप्रदृष्टे । सत्पुष्यतारे शुभवासरे हि, जयावहेऽनेकसुयोगलग्ने ॥ २६ ॥ श्रीमाञ्जिनाऽऽदिः शुभधीर्महीयां–श्चारित्रसूरिः, सह संघवर्गैः । गरिष्ठमाचार्यपदं प्रदाय, समासयत्सूरिवरीयपट्टे ॥ २७ ॥ ( युग्मम् ) अभूत्ततः श्रीजिनकीर्तिसूरिः, कृपादिचन्द्रो जिनपूर्वकश्च । नाम्नोभयेनैष समस्तलोके, गतः प्रसिद्धिं जयिनां वरिष्ठः ॥ २८ ॥ ( शार्दूलविक्रीडितम् )––चक्रे षोडशवासरं भगवतीसूत्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रपूर्त्येतयो-रर्थे भूरिमहोत्सवं सुरुचिरं श्रीपञ्चतीर्थ्युत्सवे। पश्चाऽद्रीन् निरमीमपत् प्रतिदिनं श्रीसंघभोज्यं महत्, दीनाऽनाथ-जनाऽऽदिरक्षणकृते दानं बभूवाऽधिकम् ॥२९॥ ( शिखरिणी )—महेऽमुष्मिन् रम्ये कति नगरलोका उपगता, निपीयैतच्छ्री-मद्गुरुवरमुखाब्ज-प्रपतितम् । सुधापूर्णं धर्म्यं वचनमतिहृद्यं ह्यघहरं, भवाटव्याः पारं परमिह यियासोरतिसुखम् ॥३०॥

( उपजातिः )—श्रीमद्गुरोरस्य महोपदेश-मपूर्वमङ्क्षुप्रतिबोधकारम् । संसारकान्तारकुठारधारं, निशम्य सर्वे प्रशशं-सुरेनम् ॥ ३१ ॥ विहृत्य तस्मात्तपसि प्रपेदे, श्रीमानगासीं जिनकीर्तिसूरिः । सीमोपयातं तमुपेत्य पौरा, बेण्डाऽऽदिरावैर्बधिरी-कृताऽऽशाः ॥ ३२ ॥ प्रवेशयाञ्चक्रुरतिप्रहृष्टाः, सूरीश्वरोऽप्यत्र महाजनानाम् । प्रबोधयामास महोपदेशैर्दृष्टान्त-दार्ष्टान्तिक-भावपूर्णैः ॥३३॥ ( युग्मम् ) ( शार्दूलविक्रीडितम् )—आयातस्तत एष देणुनगरीमातोद्यवृन्दैः पुरं, प्राविक्षद् घनगर्जितोपम-गिरा धर्मं चतुर्धा मुदा। धी-श्री-कीर्ति-जयप्रदं जनिजुषां स्वर्गापवर्गप्रदं, सद्दृष्टान्तमचष्ट धीरधिषणः सूरीश्वरो भासुरः ॥ ३४ ॥ वापीमापमितः क्षमानिधिरसौ सच्छिष्यवर्गाऽनुगः, श्रीसंघैरतिसत्कृतो बहुविधाऽऽरब्धोत्सवैरुत्तमैः । सानन्दं [1]जनतामनःसरोजनिकरं प्रोल्लासयन् भानुवत्, जीवाऽजीवविचारसारमनघं धर्मोपदेशं ददौ ॥ ३५ ॥

(द्रुतविलम्बितम् )—दमणनामकसत्पुरमागतः, सकल-नागर-भक्ति-सुतोषितः। विषय-वैमुख-नायक-देशना-मददता-ऽखिलपापहरीमसौ ॥ ३६ ॥ ( तोटकम् )—बलसारविशालपुरीमसुकः, प्रभुरागतवानतिदीप्तिधरः । उपदेशमनल्पमसावददाज्, जनता प्रतिबोधमवाप भृशम् ॥ ३७ ॥ अभियात इतो गणदेविपुरीं, सुमनःपुरवासिजनैर्महितः । सकलाऽऽगमसारदयावि-

१ छन्दोभङ्गनिवृत्त्यर्थं—" सानन्दं नृमनःसरो० " इति ज्ञेयम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षये, ह्युपदेशममोघमदत्त गुरुः ॥ ३८ ॥ ( उपजातिः )—इतोऽगमत्सूरतमण्डलं सकः, पथि त्रयाणामथ साधुदीक्षाम् । अदात्त-दानीं कमलागुलाब–नाम्नी सुशीला सुरताऽधिवासा ॥ ३९ ॥ नाम्ना बुहारीनगरीमुपेतुं, विज्ञापयामास गुरुं गरिष्ठम् । विज्ञप्तिमस्या अभिमत्य सूरि–स्ततो व्यहार्षीत्सह शिष्यवृन्दैः ॥ ४० ॥ ततोऽष्टकग्राममुपाजगाम, चक्रे प्रवेशोत्सवमस्य पौरः । अघौघ नाशं भवराशिवारं, धर्मोपदेशं कृतवानुदारम् ॥ ४१ ॥ अगात्ततः सातमपत्तनं च, महामहेनास्य पुरप्रवेशः । अकारि संघैरथ सूरिराजो, महोपदेशं ददिवानपूर्वम् ॥४२॥ ( मालती )—कडसलियानगरं जगाम वै, परमकृपालुरशेषपापहा । अदित सुपर्षदि देशनामसौ, गुणिगणगण्यजनाऽग्रणीर्गुरुः ॥४३॥ (उपजातिः)—श्रीमद्गुरूणामुपदेशधारा–प्रभावयोगादिह धर्मवृद्धिः । जाता प्रशस्या जनताऽप्यशेषा, सम्यक्त्वमाप्ता गुरुदेवभक्ताः ॥ ४४ ॥ पुर्या बुहार्याः कियदध्यलोका, आगत्य विज्ञप्तिमिह प्रचक्रुः । स्वीकृत्य तामेष ततो विहृत्य, पुरीं बुहारीमयमाजगाम ॥ ४५ ॥ सदुन्दुभिध्वान–विशिष्टबेण्ड–शङ्खाऽऽदिनादैर्मह-मुज्ज्वलं हि । विरच्य संघो गुरुमानिनाय, सुसज्जितं पौरमुपाश्रयं तम् ॥ ४६ ॥ ( द्रुतविलंबितम् )—निरतिचारसुसंयमपालको, भवगदौषधमच्युतलोकदम् । अमृततुल्यगिरा द्रुतबोधिदं, ह्युपदिदेश समागतसद्गुरुः ॥ ४७ ॥ ( उपजातिः )—त्रिभूमिकश्री-प्रभुवासुपूज्य–सौधालये शीतलनाथकाऽऽदेः । बिम्बत्रयं सा कमला सुशीला, ह्यतिष्ठिपच्छ्रीगुरुणाऽमुना हि ॥ ४८ ॥

( शिखरिणी )—अभूच्छान्तिस्नात्रं कृतविविधपापक्षयकरं, धियः कीर्तेर्लक्ष्म्याः सदनमतिरम्यं सुविधिना । प्रदायि श्रीमुक्तेरनघगुरुवर्यस्य कृपया, ह्यविघ्नं सम्पेदे सकलमिह कृत्यं सुविदुषः ॥ ४९ ॥ ( उपजातिः )—बाजीपुरायामयमेक-पुंसः, संसारपाथोनिधिसन्तितीर्षोः । संवेगिनोऽत्यन्तविरक्तिभाजः, प्रादत्त दीक्षां करुणैकसिन्धुः ॥ ५० ॥ श्रीसङ्घबहूवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रहतो बुहारी–पुर्येव वेदाऽश्व–नवैक [१८७४] वर्षे । स तस्थिवान् प्रावृषि शिष्यवर्गैः, सत्रा प्रबोधञ्जनता असङ्गः ॥ ५१ ॥ चक्रुश्च लोका बहुधा तपांसि, बभूवुरत्यन्तविवृद्धभावाः । जहुश्च सावद्यमशेषकृत्यं, सम्यक्त्वमापुर्गुरुराजभक्त्या ॥ ५२ ॥

( शिखरिणी )—चतुर्मासेऽतीतेऽभवदुभयदीक्षाऽत्र सुगुरो–रसङ्गस्याऽमुष्य प्रवर–कर–कञ्जेन विदुषः । अविद्यागाढाऽन्ध-प्रचयमपहन्तुं दिनमणेः, कषायैर्निःशेषैरहितमनसो भूरियशसः ॥ ५३ ॥ ( मालती )—कृतसुविहार इतः समागमत्, कडसलियानगरीं सुधीवरः । रविरिव दीप्रतरोऽवनीतले, भविकसरोजविबोधकृत्सदा ॥५४॥ (उपजातिः)—सनातनं शाश्वतसौख्यहेतुं, धर्मं विशुद्धं ह्युपदिश्य तत्र । समाययौ सातमपत्तनं स, प्रादीदृशन्मुक्तिपथं सुभव्यान् ॥५५॥ अथाऽष्टकग्राममभिप्रपद्य, सुश्रावकाऽशेषविशेषधर्मान् । व्याख्याय लोकानकरोत्स्वधर्म–विचक्षणान्देवगुरुप्ररक्तान् ॥ ५६॥ नवाऽऽदिसारीनगरीमुपेतः, प्रणम्रलोकाऽतिशयप्रणूतः । दूरीकृताऽशेषजनाऽघराशिः, प्राबोधयच्छ्रूरिजनानिहाऽपि ॥५७॥ ततः समायिष्ट जलालनाम–पुरं सुपर्वाऽचलवत्सुधीरः । विशुद्धचारित्रविपूतवर्गः, सद्देशनाभिर्जनतामपावीत् ॥ ५८ ॥ महर्द्धिकश्रावकसद्मशालं, प्रख्यातिमत्सूर्यपुरं ततोऽगात् । श्रीसंघ एतत्पुरसम्प्रवेशे, प्रशस्यचारूत्सवमैदिधच्च ॥५९॥ भेरीमहाकाहल-बेण्डशङ्खा–ऽऽतोद्योत्थनादैर्बधिरीकृतेषु । दिङ्मण्डलेषूच्चतमध्वजैश्च, जयध्वनिं कुर्वदमेयसंघैः ॥ ६० ॥ ( युग्मम् ) इत्थं पुराऽन्तः प्रविवेश सैष, चक्षुःसहस्रैः परिपीयमानः । वावन्द्यमानो नरनारिकाभि–रुद्गीयमानः स्तुतिपाठकाद्यैः ॥६१॥ सद्धार्मिकाऽनेकविशेषहेतो–स्तर्केषु–वाजि–ग्रहभू [१९७५–७६] मिताऽब्दे ॥ संघाऽग्रहात्प्रावृषमध्युवास, विद्याचणश्रीजिनकीर्तिसूरिः ॥ ६२ ॥ (उपजातिः)—मुमुक्षवः पञ्च नराश्च नार्या–वुभे ललुः श्रीगुरुराजपाणेः । दीक्षां वयस्यां दुरवापमुक्तेः, संसारघोरार्णवपोतभूताम् ॥६३॥ महार्हसद्रत्नविभूषणादि–व्यापारिमुख्यो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भगुभाइसूनुः । पानाऽभिधः श्रेष्ठिवरः सुधर्मा, स वोथरागोत्रनभोदिनेशः ॥ ६४ ॥ संवील्य तर्क-त्रि ३६००० सहस्र-मुद्रा, उपाश्रयं शीतलवाटिकास्थम् । समुद्दधाराऽधिकजीर्णभूतं, महोपदेशात्सुगुरोरमुष्य ॥ ६५ ॥ ( युग्मम् ) ज्ञानाऽऽलयं रम्यतरं विशालं, प्रभावकश्रीजिनदत्तसूरेः । नाम्ना तदीयस्मृतये प्रचक्रे, सुश्रावकीयाऽखिलसद्गुणाऽऽढ्यः ॥ ६६ ॥ श्रीप्रेमचन्द्राऽभिध-केसरी-घ-म्माऽभिख्य-मंछूप्रमुखा धनाऽऽढ्याः । उद्यापनं चक्रुरनल्प-चारु-महोत्सवैस्तत्र गुरूपदेशात् ॥६७॥ सूरीश्वरस्याऽस्य महोपदेशात्, स भूरियाऽऽख्यः शुभधीरपीह । सद्धर्मशालां निरमीमपद्धि, स्थातुं समस्ताऽऽगतयात्रिकाणाम् ॥ ६८ ॥ ततस्ततो भूरिमहोत्सवेन, कृत्वा विहारं समुपागमत्सः । कतारमत्रत्यसमग्रसंघैः, प्रावेशि चारूत्सवतः पुराऽन्तः ॥ ६९ ॥ विशुद्धधर्मानुपदिश्य लोकान्, स्वधर्मदाढर्यं समनीनयच्च । मेघो मयूरानिव पौरलोकान्, प्रामूमुदत्सूरिवरः प्रविद्वान् ॥७०॥

( द्रुतविलंबितम् )—जगडियाऽऽख्यपुरं तत आयया-वृषभजन्ममहोत्सववासरे । प्रभुमुदीक्ष्य जिनेश्वरमादिमं, निजजनुः कृतकृत्यममन्यत ॥ ७१ ॥ सुकलतीर्थमितः परिपेदिवान्, व्यनमदत्र मुदा जिननायकम् । भविकवृन्दमिहत्यमपायय-जिन-निरूपितधर्मकथाऽमृतम् ॥७२॥ ( उपजातिः )—इतो विहृत्याऽऽप जिनोरमेष, सुसत्कृतश्चारुमहेन पौरैः । व्याख्यानमोजस्वि बभूव चाऽस्य, स्त्रीपुंसकानां बहुलाभकारि ॥ ७३ ॥ पाछापुराऽऽख्यं नगरं समेत्य, सद्बोधदात्रीं भवभीतिहर्त्रीम् । निःश्रेयस-प्रापणकारयित्रीं, सद्देशनामेष ददौ जनानाम् ॥७४॥ पालेजसत्पत्तनमाससाद, वितत्य चारूत्सवमाशु संघैः । प्रवेशितः श्रीगुरु-राज एषो-ऽमोघोपदेशं ददिवान् सुवाचा ॥७५॥ इत्वा मियाग्राममसौ वशिष्ठः, सच्चर्कृतः पौरजनैर्गरिष्ठः । धर्मोपदेशैर्जनतास्ततर्प, संसार-दुष्पारसमुद्रतारैः ॥ ७६ ॥ विहृत्य तस्माच्छुचिकृष्णपक्षे, तिथ्यां दशम्यां भृगुरेवतीभे । वटोदरं रम्यपुरं समागात्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सच्छिष्यजुष्टक्रमवारिजन्मा ॥ ७७ ॥ पुरोपकण्ठं समुपेयिवांसं, श्रीमन्तमेनं जिनकीर्तिसूरिम् । महाऽऽनकै–र्दुन्दुभिबेन्डवाद्यैः,
प्रवेशयामास पुरं हि संघः ॥ ७८ ॥ श्रीसंघविज्ञप्तिवशादिहैव, सप्तर्षि–नन्दैकमिताऽब्दकीयम् । प्राचर्करीच्छिष्यदलैःसहाऽसौ,
वर्षानिवासं मुनिपालवर्यः ॥ ७९ ॥ ( द्रुतविलंबितम् )—कलुषराशिहरं जयकारकं, ध्रुवपुमर्थचतुष्टयदायकम् । गुरुरिहाऽखि-
ललोकमहाऽऽग्रहा–द्भगवतीश्रवणं समकारयत् ॥८०॥ ( वसन्ततिलका )—छाणीपुरीमुपगतः सकलाऽऽर्यनुत्यः, पौराऽतुल–
प्रकृत–चारुमहामहेन । प्राविक्षदेष नगरं वरतोरणाऽऽद्यैः, सज्जीकृतं सकलराजपथाऽऽपणाऽऽदि ॥ ८१ ॥ व्याख्यानमेष ददद्
श्रुतितृप्तिकारि, पापाऽपहारि सकलाऽऽगमसारहारि । जीवोपकारि भवसन्तति–मूलशारि, तत्त्वाऽवधारि निखिलाऽऽधिनिवारि
तारि ॥ ८२ ॥ ( तोटकम् )—विहरंस्तत एष समागतवान्, अधिवासदमिभ्यवरा मुदिताः । प्रणिपत्य गुरोः पदपद्मयुगे,
नगराऽन्तरनेषत भक्तिभरैः ॥ ८३ ॥ उपदेशमदाद् गुरुराज इहाऽ–खिल–सभ्य–जन–श्रवसो रतिदम् । भव–सागर–पोत-
मघौघहरं, जगदुज्ज्वल–कीर्ति–विकाशकरम् ॥ ८४ ॥ ( वसन्ततिलका )—आनन्दनाम नगरं तत आजगाम, पौराः प्रहृष्ट-
मनसः प्रचुरोत्सवैस्तम् । आनिन्यिरे पुरमगाधधियं यतीन्द्रं, कारुण्यकूपमनघं कनकायिताऽङ्गम् ॥ ८५ ॥ ( उपजातिः )—
सुधामयीं तत्र ददौ स सूरिः, सद्देशनां सर्वजनोपकर्त्रीम् । सम्यक्त्वतूर्णप्रतिपत्तिकर्त्रीं, मोहान्धकारक्षतिसूर्यरश्मिम् ॥ ८६ ॥
( भुजङ्गप्रयातम् )—नलीयादसंज्ञं पुरं सम्प्रयातः, पुरीभव्यलोकैर्भृशं सत्कृतः सन् । उपादिश्य पुंसः स्त्रियश्चाऽपि धर्मान्,
व्रताऽभिग्रहाऽऽदीन् बहुभ्यो ह्यचच्छत् ॥ ८७ ॥ ततो मातराऽऽख्यं पुरं सोऽभ्यगच्छ–त्समारब्धचारूत्सवैराविशच्च । अदत्तो-
पदेशं हृदाकर्षणाऽर्हं, समेषां सदादेयधर्म्यं सभायाम् ॥ ८८ ॥ ( स्रग्धरा )—सच्चादेवाख्यखेडाप्रमुखकतिपुरं चाऽऽगतः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीजिनानां, बिम्बान्यालोकमानः प्रतिनगरमसौ शुद्धधर्मोपदेशम् । कुर्वाणोऽखण्डशीलो जिनपदकमलध्यानलीनो महात्मा, शान्तो दान्तः प्रधूताऽखिलमलपटलः सच्चरित्रः पवित्रः ॥ ८९ ॥ ( वैतालीयम् )—राजनगरमागतस्ततः, प्रविवेश पुरीं चारुसूत्सवैः । व्याजहार धर्मदेशनां, धर्ममूर्तिरिव पापनाशिनीम् ॥ ९० ॥ ( उपजातिः )—विहृत्य तस्मात्सह शिष्यवृन्दै- रागान्नरोडानगरं महीयान् । संघस्तदीयं कृतवान् प्रशस्यं, पुरप्रवेशं महतोत्सवेन ॥ ९१ ॥ चरित्रनेता कमनीयमत्र, धर्मो- पदेशं कृतवान् समित्याम् । प्रमाणवर्जं जनता समेता, निशम्य लेभे बहुबोधिबीजम् ॥ ९२ ॥ ( द्रुतविलंबितम् )—कपड- वञ्जपुरीमित आययौ, पटह–काहल–दुन्दुभि–वेण्डकैः । गुरुवरं पुरमानयताऽऽदरान्, मुदित एतमशेषपुरीजनः ॥ ९३ ॥ अददताऽघकदम्बविनाशकं, जननमृत्युभयच्छिदमुत्तमम् । कुमतिवारकसन्मतिदायकं, सदुपदेशमसौ सदसि प्रभुः ॥ ९४ ॥ ( उपजातिः )—इतः समागात् पुरि गोधरायां, प्रावेश्यताऽसौ महता महेन । संसार–चक्र–भ्रमणाऽपहारीं(रां), सद्देशनां धीरगिराऽददिष्ट ॥ ९५ ॥ स दोहदग्राममथाऽऽगमच्च, वादित्रनादैर्बधिरीकृताऽऽशैः । पुर्यन्तराविश्य महोपदेशं, प्रादादुदारं भवमुक्तिकारम् ॥ ९६ ॥ कृत्वा विहारं तत आजगाम, रम्भापुरं भावुकसद्गृहस्थाः । आनीतवन्तो नगराऽन्तरेतं, वपुः–प्रभा– भासित–दिग्विभागम् ॥ ९७ ॥ आकर्ण्य रम्यां घनघातिकर्म–निश्शेषकर्त्रीमभयप्रदात्रीम् । तद्देशनां स्त्रीपुरुषाऽऽदिलोका, आपुः प्रबोधं भवमोहमोचम् ॥ ९८ ॥ ( स्रग्विणी )—झाबुबाराजधानीमितश्चाऽऽययौ, सत्कृतः पौरलोकैरशेषैर्भृशम् । हारिणीमा- पदां दायिनीं सच्छ्रियः, सन्ददौ देशनां सद्गुरुः सूरिराट् ॥ ९९ ॥ ( उपजातिः )—विहृत्य राणापुरमेष तस्मा–दायिष्ट भूयिष्ठ- गरिष्ठवाद्यैः । प्रविश्य लोकानमृतायमान–धर्मं जिनेन्द्रोदितमाचचक्षे ॥ १०० ॥ ( तोटकम् )—पिटलादपुरीं सकलर्द्धिमतीं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत एष विहृत्य सुधीरगमत् । अतिभावुकसंघकृतै रुचिरैः, सुमहैरविशन्नगरीं मुनिराट् ॥ १०१ ॥ अतिमञ्जुलमत्र गुरुर्ददिवा-नुपदेशमपूर्वमघौघहरम् । भवबन्धनकृन्तनकारितरं, ह्यविनाशि-सुखाऽच्युतलोकगमम् ॥ १०२ ॥ ( उपजातिः )—सुकर्म-दीपत्तनमाजगाम, श्रीसंघजातोत्सवमीक्षमाणः । पुराऽन्तराविक्षदनल्पतेजा, गम्भीरवाण्या समुपादिशत्सः ॥ १०३ ॥ श्रुत्वो-पदेशं सुगुरोरपूर्वं, जहुः कियन्तो लशुनाद्यभक्ष्यम् । दार्ढ्यं स्वधर्मे बहवः समीयु-रभिग्रहं केऽपि ललुः समुत्काः ॥ १०४ ॥ प्रभावना-पूजन-सत्तपांसि, नानाप्रकाराणि बभूवुरत्र । इत्थं स भव्यानुपकृत्य सूरी-श्वरो व्यहार्षीदतुलप्रभावः ॥ १०५ ॥

( तोटकम् )—-अधिमालवरत्नललामपुरं, स हि शुक्र-गणेशतिथावसिते । समियाय सुशिष्यदलैः सहित-स्तपसां मह-साऽधिकदीप्तिधरः ॥ १०६ ॥ ( शार्दूलविक्रीडितम् )—-पुर्याः सीम्नि समागतस्य सुगुरोरेतस्य सूरीशितु-रागत्याऽभिमुखं महर्द्धिजनता सद्बेण्डभेर्यादिभिः । चन्द्राऽऽशङ्कितडिच्छटाधरमुखीसुश्राविकागानकै-रानिन्ये नगराऽन्तरेनमघदं सत्पूज्य-पादाऽम्बुजम् ॥ १०७ ॥ ( वसन्ततिलका )—सत्तोरणाऽऽदिपरिबन्धनशोभमाने, प्रत्यापणे नृपपथे च महेभ्यवर्गैः । पोपूज्य-मानगुरुराजममुं प्रद्रष्टु-माबालवृद्धजनतापरिमर्द आसीत् ॥ १०८ ॥ अत्याग्रहाद्धविकसंघजनस्य तत्र, भूभृत्तुरङ्ग-नव-चन्द्र-मिते च वर्षे । वर्षर्तुवासमकरोत्सह भूरिशिष्यैः, श्रीमानचिन्त्यमहिमा गुरुराज एषः ॥ १०९ ॥

( द्रुतविलंबितम् )—-भगवतीमिह सूत्रमवीवचत्, जलधरस्वनजेतृगिरा गुरुः । वृजिनराशि-निराकृतिकारकं, परमभक्ति-परिश्रुतमङ्गिनाम् ॥ ११० ॥ सदुपधानमहातप आदराद्, भविकवृन्द इहाऽकृत भावुकः । त्रिपुरुषा ललनाद्वितयी गुरोः, शुभ-करेण ललुश्च महाव्रतम् ॥ १११ ॥ ( भुजङ्गप्रयातम् )—चतुर्मासपूर्त्तौ ततः संविहृत्य, जिनाऽऽदिः कृपाचन्द्रसूरीश्वरोऽयम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अगाद् बाङ्कडोदं ह्यपूर्वोत्सवेन, स्वविक्षत् पुराऽन्तः समं भूरिलोकैः ॥ ११२ ॥ प्रबोधं जनानामपूर्वं व्यदत्त, सदादेयधर्मोपदेशैर्महद्भिः । पयोमुक्निनादानुकर्त्रा रवेण, कुतर्काऽऽदिशङ्कासमुच्छेदकर्ता ॥ ११३ ॥ ( स्रग्विणी )—सद्गुरुर्भूरिशिष्यस्ततः प्रस्थितः, सेमलीयाऽभिधं पत्तनं सङ्गतः । नागराऽशेषलोकैर्भृशं सत्कृतो, देशनां सर्वलोकोपकारीं ददौ ॥ ११४ ॥

( तोटकम् )—सरसीनगरीमयमागतवान्, विहरन् क्रमशः करुणानिलयः । बहुमानपुरस्सरमानयत, नगरान्तरमुं पुरवासिजनः ॥ ११५ ॥ ददिवानुपदेशममोघमसौ, कृतवान् प्रतिबुद्धतरान् सुजनान् । परिहापितवान् व्यसनं सकलं, जिनशासन–काननचारिहरिः ॥ ११६ ॥ ( भुजङ्गप्रयातम् )—ततो जावराख्यां पुरीमार मार–विजेता सुवक्ता प्रदाता सुबुद्धेः । समस्तः सुसंघो महाऽऽडम्बरैस्तं, प्रणिन्ये पुरान्तः समं शिष्यजातैः ॥ ११७ ॥ ददौ चोपदेशं भवाम्भोधितारं, सुरेन्द्राऽऽधिपत्यप्रदातारमेषः । जगत्यन्धकूपे पतज्जीवजात–समुद्धारकारं स्वधर्मप्रचारम् ॥ ११८ ॥ ( शार्दूलविक्रीडितम् )—रोजाणानगरीमगच्छदनघश्चारित्रदीप्त्योल्लसन्, सद्धर्मद्रढिमानमत्र सुजनैरानीनयत्सूरिराट् । सद्बोधाऽमृतपायकः श्रुतधरः शीतांशुवच्छीतलो, निर्धूताऽखिलकल्मषः सुतपसा प्रध्वस्तमोहाऽऽदिकः ॥ ११९ ॥ ( वसन्ततिलका )—दिग्णोदनाम नगरं समुपेत्य तत्र, बह्वादरेण सुजनैरतिसत्कृतः सन् । धर्मोपदेशसुधया परितर्प्य लोकान्, सद्धर्मसारमखिलान् समबूबुधत्सः ॥ १२० ॥

( उपजातिः )—विहृत्य तस्माद्गुणदीमयासी–दलब्ध सत्कारमशेषलोकैः । सद्देशनां ज्ञानकरीं प्रदाय, सोऽजहरीत्सर्वजनस्य मोहम् ॥१२१॥ तालं विशालं नगरं सहाऽसौ, सच्छिष्यवृन्दैः समयाम्बभूव । महोत्सवैस्तत्र पुरीनिवासी, पुरप्रवेशं कृतवानमुष्य ॥१२२॥ संसारदुष्पारमहासमुद्रे, नानाऽऽधियादोगणदुस्तरेऽस्मिन् । जराविपत्त्रासमहातरङ्गे, पोतायितं धर्ममुपादिशत्सः॥१२३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आलोटमागान्नगरं ततोऽयं, चक्रे प्रवेशोत्सवमत्र संघः । श्रीवीतरागोदितशुद्धधर्मं, सदस्यसौ चारुगिरा चचक्षे ॥ १२४ ॥ ततो ह्यसौ माधवकृष्ण–सूर्य–तिथ्यामुपेतो रिगणोदपुर्याम् । विधाय यात्रामयमाजगाम, सीतामऊनामपुरं विशालम् ॥१२५॥ समागतं सूरिगणाऽग्र्यगण्यं, भेर्यानकाऽऽतोद्यजयाऽऽरवाऽऽद्यैः । प्रवेशयाञ्चक्रुरशेषपौरा, ददौ च सोऽप्यत्र महोपदेशम् ॥१२६॥ अध्वक्रमान्मानपुरं ततोऽगा–त्तोष्टूयमानः पुरवासिलोकैः । धर्मोपदेशैरुपकृत्य लोकान्, अजीहपद् दुर्व्यसनानि सर्वैः ॥१२७॥ तालाऽऽदिनानानगराणि गत्वा, प्रबोध्य लोकान् रुचिरोपदेशैः । समाययौ सूरिवरो महीन्द्र–पुरं विशालं बहुभिः सुशिष्यैः ॥१२८॥ पुरोपकण्ठाऽऽगतमादरेण, नानाविधाऽऽतोद्य–सुगीतनादैः । पुराऽन्तरानेषत पौरलोकाः, प्रभावनां चाऽदिषताऽतिहृष्टाः ॥ १२९ ॥ भवाऽटवीदावनिभं ह्यनन्त–जन्माऽत्ययत्रासनिरासकारम् । महोपदेशं सुचिरं प्रदाय, चैकां सुशीलां समदीक्षयत्सः ॥ १३० ॥ इतो विहृत्याऽऽगतवानवन्तीं, श्रीपार्श्वनाथं समपश्यदत्र । सूरीश्वरस्तत्र विधाय यात्रां, प्राबोधि (?) लोकान्निजदेशनाभिः ॥ १३१ ॥ ( तोटकम् )—मकसीवरपत्तनमाप सक–स्तत एष विहृत्य गुरुः प्रभुकः । समदर्शदिहस्थसुतीर्थपतिं, भविकानुपदिश्य ततो व्यहरत् ॥ १३२ ॥ ( इन्द्रवंशा )—देवासमागात्सुजनैः प्रवेशितः, प्रौढाऽतिहृद्याऽतुलसूत्सवेन सः । कल्याणकारीमघताविनाशिनीं, सद्देशनामेष ददौ मुनीश्वरः ॥ १३३ ॥ ( उपजातिः )—आषाढकृष्णे दशमी सुतिथ्याम्, इन्दोरपुर्यामयमभ्युपेतः । पुरोपसीमं गुरुराजमेतं, प्रशस्यसूरिव्रजमौलिरत्नम् ॥ १३४ ॥ ( शार्दूलविक्रीडितम् )—तत्रत्यः सकलो महर्द्धिसुजनो हर्षोल्लसन्मानसो–ऽभ्यागच्छत्परिवन्दितुं सुविहितैश्चारूत्सवैरुज्ज्वलैः । बेण्डाऽऽदि–प्रचुर–प्रवाद्य–निनदैर्बाधिर्यमापादयन्, सर्वेषां श्रवसोर्मुदा जयजयेत्याघोषयन्नुच्चकैः ॥१३५॥ ( युग्मम् ) इत्थं रम्यमहोत्सवैर्नृपपथे यान्तं गुरुं वीक्षितुं, मीनाक्ष्यो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धनिकाऽङ्गनाः सुनयनाः पीयूषधामाऽऽननाः। विद्युत्पुञ्जसमप्रभाः पथिगतप्रासादमूर्धस्थिता, वैमानिक्य इवाऽऽगताः सुरपुराल्लोकैस्तदा मेनिरे ॥ १३६ ॥ ( उपजातिः )—अथाऽऽग्रहात्पौरजनस्य तत्र, नन्दाऽश्व–रन्ध्रैकमिते चं[१९६९] वर्षे। सन्तस्थिवान् प्रावृषि सूरिराजः, सच्छिष्यवृन्दैः सह संयताऽऽत्मा ॥ १३७ ॥ ( द्रुतविलंबितम् )—भगवतीवरसूत्रसवृत्तिकं, गुरुवरः समवाचयताऽसकौ । सदुपधानमहातप उत्सवै–रिह बभूव सुपावनमुज्ज्वलम् ॥ १३८ ॥ ( उपजातिः )—सज्ज्ञानकोशालय आविरासीत्, चिकाय तस्मिन् बहुपुस्तकानि । समग्रहीचाऽपि कपाटकाऽऽदि, श्रीमद्गुरोरस्य महोपदेशात् ॥ १३९ ॥

( शिखरिणी )—महोपाध्यायं श्रीसुमतिजलधीत्याख्यमुनये, पदं प्रादाच्छ्रीमानुदधिरिव गाम्भीर्यनिलयः। विनीतश्रीराजाऽऽदिकजलधये वाचकपदं, गुरुः पन्न्यासाऽऽख्यं मणिजलधिनाम्ने पदमदात् ॥ १४० ॥ ( इन्द्रवज्रा )—एकः सुशीलः सुविनीतधीरः श्रीमद्गुरूणां करपल्लवेन । संसारवार्द्धिं तरितुं सुखेन, दीक्षामलासीदतितीक्ष्णबुद्धिः ॥ १४१ ॥

( भुजङ्गप्रयातम् )—ततो माण्डवाऽऽख्यं गढं सूरिराजः, समेत्याऽकरोत्तीर्थयात्रां सशिष्यः। ततो धारनाम्नीं पुरीमाजगाम, पुरि प्राविशद्भूरिचारूत्सवेन ॥ १४२ ॥ उपादिक्षदत्रत्यलोकानशेषान्, विशुद्धाऽऽर्हताशेषधर्मं प्रकामम् । भवोच्छेदि–कल्याणविस्तारकारं, विपद्धारि–संसारदुःखाऽपहारम् ॥ १४३ ॥ ( पञ्चचामरम् )—अमीजरापुरीमितो विहृत्य सूरिराडसौ, समाजगाम सादरं चकार नागरोऽखिलः। पुरप्रवेशसद्ध(त्स)वं सुबेण्डकाहलाऽऽदिभि-र्ददौ मुनीश उत्तमां सुदेशनां श्रवःसुखाम् ॥१४४॥

( वंशस्थम् )—विहृत्य भोपावरमीयिवांस्ततः, पुरीजनैर्भूरिमहोत्सवः कृतः । महोपदेशैः सकलः प्रबोधितः, प्रतिष्ठितेनाऽतुलकीर्तिनाऽमुना ॥ १४५ ॥ ( उपजातिः )—विलोक्य तत्र प्रभुशान्तिनाथं, समागतो राजगढाख्यपुर्याम् । श्रीत्रैश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लेयं प्रभुमत्र दृष्ट्वा, देशाइनाम्नीं नगरीमयासीत् ॥ १४६ ॥ ( वंशस्थवृत्तम् )—महामहेनाऽत्र पुरं प्रवेशितः, सुदेशनां सत्वरबोधदायिनीम् । सनातनाऽसीमसुखाऽनुभाविनीं, ददौ च संसारसमुद्रतारिणीम् ॥ १४७ ॥ ( पृथ्वी )—कणोदनगरीमियाय सकलाऽऽर्तिहारी गुरुः, समस्त–पुरवासिभिः प्रकृतचारु–नानोत्सवैः । प्रवेशमकरोदसौ सकलशिष्यवर्गैः समं, स्वदाच्च वरदेशनामखिलपापनोदक्षमाम् ॥ १४८ ॥ ( मालिनी )—तखतगढमयासीद्वादिवृन्दाऽटवीषु, सततविहरमाणः केसरी विश्वपूज्यः । जन–महितपदाऽब्जः सत्कृतः सर्वपौरै–रददत कमनीयं शुद्धधर्मोपदेशम् ॥ १४९ ॥ ( तोटकम् )—वदनावरपत्तनमैयरसौ, नगरीजनसत्कृत ईड्यवरः । उपदेशमदत्त सतामघदं, भुवि भुक्तिविमुक्तिददं समितौ ॥ १५० ॥

( प्रमुदितवदना )—वडनगरमथाऽऽययौ सूरिराट्, पुरजनकृतसत्कृतिं पेदिवान् । वृजिनततिविनाशिनीं देशना–मदित सदसि संसृतेर्मोचिनीम् ॥ १५१ ॥ ( भुजङ्गप्रयातम् )—ततः सूरिराडाययौ खाचरोदं, पुरं प्राविशच्चाऽतिचारूत्सवैस्तत् । जनानार्हताञ्छुद्धधर्मं यतात्मा, चचक्षे महात्मा सदा शान्तमूर्तिः ॥ १५२ ॥ ( इन्द्रवज्रा )—ओलीमकार्षीदिह माधवीं स, धर्माद्यनुष्ठानमभूदपूर्वम् । श्रद्धालुसुश्रावकवृन्दजुष्ट–पादारविन्दद्वय उत्तमौजाः ॥ १५३ ॥ ( उपजातिः )—आगच्छदस्मात्स हि सेमलीया–पुरं प्रधानं सकलैश्च पौरैः । प्रवेशितश्चारुमहामहेन, व्याचष्ट धर्मं भवभीतिवारम् ॥ १५४ ॥ स नामलीनाम पुरं ततोऽगात्, उच्चैः प्रवेशोत्सवतः प्रविश्य । सद्बोधिबीजप्रदधर्ममत्र, प्रोपादिशत्पर्षदि संघमेषः ॥ १५५ ॥

( इन्द्रवज्रा )—पञ्चेडमागाद्विहरंस्ततोऽयं, चक्रुः प्रवेशोत्सवमस्य पौराः । श्रुत्वोपदेशं सुगुरोरमुष्य, धर्मे च सर्वे द्रढिमानमापुः ॥ १५६ ॥ ( उपजातिः )—ततः सलानानगरीमियाय, नोनूयमानः पुरवासिलोकैः । राजानमत्रत्यमबोधयच्च,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सद्धर्मवाक्यैरमृतायमानैः ॥ १५७ ॥ (भुजङ्गप्रयातम्)—ततः पीपलोदाऽभिधग्राममागाद्, गरिष्ठः प्रवेशोत्सवोऽकारि पौरैः । ददे तत्र सूरिर्जनाऽशेषमोह–समुच्छेदिधर्मोपदेशं प्रशस्यम् ॥ १५८ ॥ सुखेडापुरीमाश्वदाप्तोपदेष्टा, समेतं तमेनं दिनेश-प्रकाशम् । प्रणेमुः प्रचक्रुर्जनाः सूत्सवं ते, समूचे च सूरिर्जिनोक्तं प्रधर्मम् ॥ १५९ ॥ (उपजातिः)—अथाऽरुणोदं नगरं प्रपेदे, समुत्सवं पौरजना वितत्य । तमानयन् गौरवभक्तिभाजः, सूरीश्वरोऽदत्त महोपदेशम् ॥ १६० ॥ प्रतापपूर्वं गढमाजगन्वान्, श्राद्धा वितेनुः परमोत्सवं हि । तदीक्षमाणो नगरं प्रविश्य, व्याचष्ट धर्मं भवमूलघातम् ॥ १६१ ॥ कृत्वा विहारं तत एष सूरि–र्बईपुरीतीर्थमयादनंहाः । ददर्श तत्र प्रभुपार्श्वनाथ–बिम्बं मनोवाञ्छितसिद्धिदायम् ॥ १६२ ॥ कृतप्रयाणः क्रमशस्ततोऽसौ, पुरं दशादिं समुपाजगाम । बेण्डाऽऽदिवादित्रगणप्रणादैः, समस्तसंघः पुरमानिनाय ॥ १६३ ॥ श्रीसंघविज्ञप्तिवशादिहाऽसौ, बिन्द्वष्टनन्दक्षितिसंख्य[१९८०]वर्षे । समध्यवात्सीच्चतुरश्च मासान्, घनैः सुशिष्यैः सह सूरिराजः ॥ १६४ ॥ श्रीनन्दिसूत्रं सह वृत्तिकेन, माहात्म्यमप्येष महाविपश्चित् । शत्रुञ्जयस्य स्तनयित्नुनादी, संवाचयामास गुरुर्गरीयान् ॥ १६५ ॥ आगाद्बईपत्तनमेष तस्मात्, तीर्थेशमालोक्य ननाम भक्त्या । स कर्णगेटीनगरीमगच्छत्, तत्रोपदेशैः सुजनानतर्पीत् ॥ १६६ ॥ (वंशस्थम्)—ततोऽगमज्जीरणनामपत्तनं, सुदेशनाभिर्जनता उपाकरोत् । समागतो नीमचनामसत्पुरी–मतानिषुः पौरजना महोत्सवम् ॥ १६७ ॥ (उपजातिः)—धाराधराऽऽरावगिराऽत्र लोकान्, सभाऽऽसनाऽऽसीन उपादिशत्सः । प्रस्थाय तस्मात्स हि जावदाऽऽख्यं, शिष्यैरदभ्रैः श्रितपादपद्मः ॥ १६८ ॥ (वैतालीयम्)—केसरपुरमागतस्ततः, सच्चक्रुः पुरवासिनः समे । उपदिदेश सूरिराडसौ, शाश्वतं धर्ममुज्ज्वलं जनान् ॥ १६९ ॥ (प्रहर्षिणी)—नीबाडानगरमुपागमत्सशिष्यः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चक्रुस्ते परममहोत्सवं सुपौराः । व्याचख्यौ सदसि सुतारकं भवाऽब्धेः, सद्धर्मं सकलजनोपकारिणं सः ॥ १७० ॥

(वैतालीयम्)—शतखण्डापत्तनं ततः, सह शिष्यैर्गुरुराययौ महान् । परिणूतः सर्व–सज्जनै–रूचिवान् धर्मदेशनामलम् ॥ १७१ ॥ (भुजङ्गप्रयातम्)—ततश्चित्रकूटं गढं सञ्जगाम, व्यतानीदतुच्छं पुरीवासिलोकः । प्रवेशोत्सवं तस्य सूरीश्वरस्य, ददे भव्यवृन्दं(न्दे) स धर्मोपदेशम् ॥१७२॥ (उपजातिः)—सिङ्गापुरं चागतवांस्ततोऽयं, तेनेऽथ सत्संघ उदारमेषाम् । पुरप्रवेशोत्सवमेष सूरिः, सुदेशनां चाऽत्र ददावपूर्वाम् ॥ १७३॥ कपासणाऽऽख्यं नगरं ततोऽगात्, समागतांस्तान् (तं तं) बहुनाऽऽदरेण । सर्वो हि संघः पुरमानिनाय, ततोऽसकौ धर्ममुपादिशत्तान् (त्तम्) ॥ १७४ ॥ इतः करेडाऽभिधतीर्थमित्वा, मैनुप्रमाणैः श्रमणैः सहाऽसौ । श्रीपार्श्वनाथप्रभुमालुलोके, विहृत्य तस्मात्सणवाडमागात् ॥ १७५ ॥ तत्रत्यसंघो महता महेन, पुराऽन्तरानेष्ट घनाऽऽदरेण । श्रीसूरिराजोऽप्यददिष्ट तत्र, वैराग्यपूर्णं रुचिरोपदेशम् ॥ १७६ ॥ (भुजङ्गप्रयातम्)—ततो मावलीपत्तनं सञ्जगाम, जनाः सादरं तं पुरं चाऽऽनयन्त । कषायप्रमुक्तो गुणाऽम्भोनिधिः स, महामोह–भृ(भू)भृत्पविं धर्ममाख्यत् ॥ १७७ ॥ (उपजातिः)—ततश्चलित्वा पलहाणमागात्, पौराऽतुलाऽऽरब्धमहोत्सवैः सः । पुरप्रवेशं कृतवान्महीयान्, प्रदत्तवांस्तत्र महोपदेशम् ॥ १७८ ॥ (आर्या)—देवलबाडामागात्, सह शिष्यैः संविहृत्य सूरीन्द्रः । पौरैः सत्कृतिमाप्तो, धर्मोपदेशं समारभत ॥ १७९ ॥ (उपजातिः)—ययौ पुरं नागदहाऽभिधानं, श्रीसंघ एतस्य पुरप्रवेशे । वाद्याऽऽदिभी रम्यमहोत्सवं हि, चक्रे ददौ सोऽथ महोपदेशम् ॥ १८० ॥ (रथोद्धता)—एकलिङ्गशिवसन्निधौ महा–श्यामलां परमसुन्दराऽद्भुताम् । शान्तिनाथविभुसच्छविं परा–मागतो गुरुरलौकताऽसकौ ॥ १८१ ॥ (मालिनी)—उदयपुरमगच्छत्सूरि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्यैः सुजुष्टः, पुरजनकृतबेण्डाऽऽद्युत्सवं प्रेक्षमाणः । अदित सदसि रम्यां देशनां सूरिराजः, परमसुखविधात्रीं कर्मनिश्शेषकर्त्रीम् ॥ १८२ ॥ ( इन्द्रवज्रा )—कालं कियन्तं स हि तत्र तिष्ठन्, मेघो मयूरानिव पौरलोकान् । आनन्दयन् धर्मकथाऽमृतानि, सम्पाययामास गुरुर्गरिष्ठः ॥ १८३ ॥ श्रीकालिकातानगरीनिवासि–सच्छ्रेष्ठि–चम्पाऽऽदिकलालमुख्य–प्यारेसुयुक्लालमहेभ्यकाऽऽदेः, सुखेन संघः समुपागतोऽत्र ॥ १८४ ॥ श्रीसंघपत्याग्रहतो महीयान्, प्रभावकश्रीजिनकीर्तिसूरिः । सशिष्यकस्तेन समं चचाल, कर्तुं तदा केसरियाजियात्राम् ॥ १८५ ॥ ( युग्मम् ) संघेन सार्धं समुपागतोऽत्र, श्रीमत्प्रभुं केसरियाजिनाथम् । प्रैक्षिष्ट भक्त्याऽतुलया सशिष्यः, संस्तुत्य मोदं ह्यधिकं समाप ॥ १८६ ॥ मासद्वयं तत्र सुहेतुतोऽस्थात्, विधाय भूयिष्ठपरिश्रमं सः । सिताऽम्बरीयाऽखिलजैनसंघ–स्वामित्वमत्रत्य–सुचैत्यकेऽस्ति ॥ १८७ ॥ एतच्छिलालेखमलब्ध तत्र, यो गुह्य आसीदुपरिस्थितत्वात् । तल्लेखमुर्वीपतिरप्यपश्यत्, श्राद्धाऽऽदिलोका अपि दद्दशुश्च ॥ १८८ ॥ ततो विहृत्योदयपुरं हि, पुनः समागात्सह शिष्यवर्गैः । महोत्सवं संघकृतं स पश्यन्, लग्ने शुभे तत्पुरमाविवेश ॥ १८९ ॥ अत्याग्रहात्संघकृताच्च तत्र, चन्द्रेऽष्ट–नन्देन्दुमिते च वर्षे । श्रीसूरिराजो जलदर्तुवासं पञ्चद्विशिष्यैः सहितः प्रचक्रे ॥ १९० ॥ सद्धर्मपीयूषमपिप्यदेष, श्रीसंघमत्रत्यमनारतं हि । तपांसि भूयांसि जना अकार्षुः, प्रादिद्युतच्छासनमार्हतं सः ॥ १९१ ॥

( आर्या )—गोविन्दसिंहमहता–सराये न्यवसदसौ तुर्यदिनानि । तस्मात्कृतप्रयाणो, वेदलानगरमाजगाम सः ॥१९२॥

( उपजातिः )—पुरप्रवेशं विततोत्सवेन, विधाय लोकान् प्रतिबोध्य तत्र । मादारमागादुपदिश्य लोकान्, विशुद्धधर्मं समतीतृपच्च ॥ १९३ ॥ ( प्रहार्षिणी )—गोगुन्दानगरमुपाययौ सशिष्यः, सत्पौरा व्यदधुरमुष्य सत्प्रवेशम् । सूरीशः सदसि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुधामयोपदेशैः, सल्लोकं सकलमवेदयत्स्वधर्मम् ॥ १९४ ॥ (इन्द्रवंशा)—नन्देसमा–ढोल–कमोल–सायरा–भाणापुरा–राणकपूर्षु सङ्गतः । यात्रां विधायैष जनान् प्रबोध्य वै, कृत्वा विहारं समुपैच्च सादडीम् ॥ १९५ ॥

(शार्दूलविक्रीडितम्)—घाणेरावपुरं समेत्य कृतवान्छ्रीत्रैशलेयप्रभो–र्यात्रामेष महामतिर्मुनिपतिर्वीरां पतिस्तेजसाम् । लोकाऽज्ञानतमिस्रराशिहरणे प्रोद्यत्प्रभोऽहस्करः, संयातस्तत उज्ज्वलाऽतुलयशास्तां देसुरीं सत्पुरीम् ॥ १९६ ॥ तत्रत्यैः सकलैः सुभावुकजनैरारम्भि चारूत्सवः, सम्पश्यन् महमुज्ज्वलं गुरुवरः पुर्यां प्रवेशं व्यधात् । प्रारेभे वरदेशनां हितकरीं सत्प्राणिनां बोधिदा–मागच्छत्तत एष धीरधिषणः सोमेसराऽऽख्यं पुरम् ॥ १९७ ॥ (भुजङ्गप्रयातम्)—ततो णादलाईपुरं रम्यमस्मिन्, प्रयाते शरण्ये कृपालौ महिष्ठे । अकार्षीत्सुसंघः प्रवेशोत्सवं च, ह्यदाद्देशनां तत्र सूरिः सभायाम् ॥ १९८ ॥

(इन्द्रवज्रा)—नाडोलमागात्कृतसंविहारः, सम्मानितः पौरजनैरशेषैः । श्राद्धस्य धर्मं सकलं चचक्षे, सूरीश्वरः पर्षदि विश्ववन्द्यः ॥ १९९ ॥ (वैतालीयम्)—वरकाणामाजगाम सः, पार्श्वनाथविशुदर्शनं व्यधात् । राणीपुरमेतवांस्ततः, सुसत्कृतोऽदाद्धर्मदेशनाम् ॥ २०० ॥ (उपजातिः)—खीमेलमाप्तो जनताकृतेन, महोत्सवेनैष पुरं प्रविष्टः । चिरं ददौ धार्मिकदेशनां स, संसार–मोहाऽन्धदिनेशकान्तिम् ॥ २०१ ॥ (शार्दूलविक्रीडितम्)—सांडेरावमहापुरीमुपययौ लोका अनल्पोत्सवै–र्भेरी–काहल–बेण्डकादिनिनदैर्बाधिर्यकारैर्दिशाम् । गीताऽऽद्यैरमितैर्जनैश्च सुगुरुं प्रावेशयन् स्वं पुरं, सूरीन्द्रो भवतारकं सुभविनां धर्मोपदेशं ददे ॥ २०२ ॥ (भुजङ्गप्रयातम्)—सुजाणाऽभिधानं समागात्पुरं स, पुरीलोकचारूत्सवैः सम्प्रविष्टः । ददौ देशनां सर्वपापौघलोप्त्रीं, महीयाञ्जिनाऽऽदिः कृपाचन्द्रसूरिः ॥ २०३ ॥ (उपजातिः)—खिमाणदीपत्तनमाजगाम, प्रबोध्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकान् वरदेशनाभिः । ऐन्द्वारुदीनामपुरं ततोऽसौ, सद्धर्ममत्रोपदिदेश सूरिः ॥ २०४ ॥ ( मालिनी )—तखतगढमुपेतः प्राप्तलोकप्रतिष्ठो, दिनमणिरिव दीप्रः कल्पवृक्षाऽवभासः । अकृषत पुरलोकाः सत्कृतिं तस्य गुर्वी–मदित वरममोघं शुद्धधर्मोपदेशम् ॥ २०५ ॥ ( द्रुतविलम्बितम् )—तदनु पादरलीं नगरीं ययौ, पुरजनैः कृतचारुमहोत्सवैः । अविशदेष पुराऽन्तरथोपदे–शममृतं जनताः समपाययत् ॥ २०६ ॥ ( उपजातिः )—स चांदराईपुरमध्यगच्छत्, सम्मानमेतस्य गरिष्ठमत्र । तत्पौरलोकः कृतवान् सुभक्त्या–ऽदाद्देशनां सौधरसप्रवाहाम् ॥ २०७ ॥ चूडाऽभिधं पत्तनमेष गत्वा, प्रावेशि पौरैरुचितो(रो)त्सवैस्सः। श्रीसूरिराजोऽप्यथ देशनां तां, संसार–दुर्गोदधिपोतकल्पाम् (?) ॥२०८॥ स शङ्खवालीनगरीमपावी–त्सच्छिष्यवृन्दैर्गुरुराजवर्यः । सद्बोधिदानैर्जनताः सुभव्या, उपाकरोदार्यमतिर्गरीयान् ॥ २०९ ॥ ( इन्द्रवज्रा )—आहोरसंज्ञं नगरं ततोऽगात्, प्राप्तप्रमोदाः सुजनाः प्रणिन्युः । बेण्डाऽऽदिकाऽऽतोद्य–निनादगीतैः, सूरीश्वरोऽदादुचितोपदेशम् ॥ २१० ॥

( रथोद्धता )—गोदणाऽऽख्यनगरीमथाऽऽगमद्, विस्तृतैः प्रकृत–सज्जनोत्सवैः । प्राविशत्तदनु देशनामदा–च्छ्रोतृजीवबहुबोधदायिनीम् ॥ २११ ॥ ( उपजातिः )—जालोरदुर्गं तत आययौ स, बेण्डाऽऽदिवाद्यैर्नगरप्रवेशम् । व्यचीकरत्संघमहेभ्यवर्गो, यथोचितं धर्ममुपादिशत्सः ॥ २१२ ॥ ( वैतालीयम् )—भमराणीमेतवानितो, जिनकृपाचन्द्रसूरिराडसौ । सम्मेनेऽशेषसङ्घकः, सदसि सञ्जगौ धर्ममार्हतम् ॥ २१३ ॥ ( वसन्ततिलका )—राज्यस्थलाऽऽख्य–रमणीयमहापुरं स, आगात्सुशिष्यनिकरैर्गुणवान् यशोवान् । तत्रस्थ–सर्वजनता नगरप्रवेशा–ऽपूर्वोत्सवं गुरुवरस्य चकार भक्त्या ॥ २१४ ॥

( वैतालीयम् )—मोकलसरमायताऽसकौ, विविध–वाद्य–गीतोत्सवैरमुम् । प्रावीविशत्सज्जितं पुरं, श्रीसंघः सकलः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुभक्तितः ॥ २१५ ॥ ( उपजातिः )--सीवाणदुर्गं तत एष ऐयः, महामहं तन्वदशेषसंघः । पूर्यां समानेष्ट ददौ च देश-नामेष सूरिर्घनधीरनादैः ॥ २१६ ॥ कुशीवनाम्नीं नगरीं ततोऽगात्, कुर्वन् विहारं शमताऽम्बुराशिः । सत्कृत्य पुर्यामनयच्च संघो, धर्मोपदेशैरुपचकृवान् सः ॥२१७॥ आओतराग्राममथो जगाम, सहर्षमेनं विविधोत्सवेन । प्रावीविशत्स्वं पुरमत्र संघः, सूरिस्ततो धर्ममशेषमाख्यत् ॥ २१८ ॥ विहृत्य तस्मादयमाजगाम, बालोत्तरानामपुरीमपूर्वाम् । प्रावेश्यताऽसौ महता महेन, सद्धर्मपीयूषमलं ववर्ष ॥ २१९ ॥ ( द्रुतविलंबितम् )--नगरवीरमपूरमथैत्य स, ह्यकृत पार्श्वविभोरवलोकनम् । जलधिसंख्यमनेकविनेययुक्, दहनतप्त-सुवर्णसुवर्णधृक् ॥ २२० ॥ ( विभावरी )--जसोलरम्यसत्पुरीमथाऽययौ, पुरस्थ-संघसत्कृतो भृशं सकः । तडित्त्वतः स्वनोपमै स्वैरदात्, सभासु धर्मदेशनामघौघदाम् ॥ २२१ ॥ ( उपजातिः )--बालोत्तरामाप ततो विहृत्य, नानद्यमानैः पटहाऽऽदिवाद्यैः । प्रविश्य तत्राऽप्यददिष्ट धर्मो-पदेशमेष क्षितकाममोहः ॥ २२२ ॥

( भुजङ्गप्रयातम् )--ततः पञ्चभद्रापुरीमाससाद, ससत्कारमेनं पुरि प्राणयन्त । प्रचक्रे स तस्मिन्नपूर्वोपदेश-मयं ज्ञानविज्ञानदानप्रदक्षः ॥२२३॥ ततो विहृत्याऽऽगतवांश्च सूरि-र्वालोत्तरां पक्ष-वसु-ग्रहेन्दौ । वर्षेऽत्र पौराऽऽग्रहतः स तस्थौ, प्रावृष्यनेकैः सह शिष्यवर्गैः ॥२२४॥ ( शार्दूलविक्रीडितम् )--इत्याचार्यपदस्थितस्य मतिमच्छ्रीमज्जिनाऽऽदेः कृपा-चन्द्रस्यैष विनिर्मिते वरगुरोः काव्ये चरित्रात्मके । श्रीआचार्यजयाऽभिधनामविदुषा तत्पादपद्माऽलिना, चातुर्मासविहारवर्णनमयः सर्गस्तृतीयो गतः ॥ २२५ ॥ ॥ ३ ॥

॥ इति तृतीयः सर्गः समाप्तः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथ चतुर्थः सर्गः

(उपजातिः)——अथाऽसकौ श्रीजिनकीर्तिसूरि–र्युग्माऽष्टनन्देन्दुमिते (१९८२) सुवर्षे । वालोत्तरायां पुरि निश्चिकाय, कर्तुं चतुर्मासमनेकशिष्यैः ॥ १ ॥ आसीत्तदा दुःसह उष्णकालः, समाप्तकल्पस्थितकर्तुकामः । वारं कियच्चाऽऽगत एष नाको–डातीर्थयात्राकृतये च तत्र ॥ २ ॥ मार्गे जसोलाऽभिधपत्तनेऽसौ, तस्थौ कियन्तं समयं महात्मा । विलुम्पकाऽऽवासकदम्बपूर्णे, मनोरमं चैत्यमसावपश्यत् ॥ ३ ॥ (वसन्ततिलका)——आलोक्य तच्छिखरशोभितभव्यचैत्यं, चाऽन्तः प्रविश्य जिनबिम्बमुदैक्षताऽसौ । आशातना बहुविधा जिनमन्दिरस्य, कुर्वन् प्रदक्षिणमथाऽस्य गुरुर्लुलोके ॥ ४ ॥ तासां निराकृतिचिकीः सुगुरुर्महीयान्, तत्रोपदिश्य बहुधा जनताः समेताः । देवाऽऽलयेऽनुचितकृत्यमुदीक्ष्य भव्या, निघ्नन्ति नो नियतदुर्गतिमियूरतिह ॥ ५ ॥ अज्ञानिनां जनिमतां हृदि चिन्तनार्थ–मावश्यकी जिनवरच्छविरागमोक्ता । छद्मस्थिता य इह तद्विमुखा भवन्ति, तेऽधः पतन्ति न हि तस्य कदाऽपि मुक्तिः ॥ ६ ॥ एतद्विमृश्य सकला उचितप्रबन्धं, धर्माऽभिमानि–सुजनाः सधना महान्तः । पुण्यं महच्चिनुत चैत्यमिदं दयध्वं, न्यायोपपन्नकमलामचलां कुरुध्वम् ॥ ७ ॥ पीयूषतुल्यगुरुराजमहार्थवाक्य–माकर्ण्य सादरममुष्य गुरोः समक्षम् । वालोत्तरापुरनिवासिजना जसोल–ग्रामाऽधिवासिजनता उभये मिलित्वा ॥ ८ ॥ चन्दां विधाय परिलब्धधनैस्तदैव, तस्योद्धृतिं विदधिरे प्रतिमार्चनाऽऽदि । कर्तुं जनश्च विनियुज्य जना महेभ्या, आशातनां च सकलां गमयाञ्चकार(म्बभूवुः) ॥९॥ (युग्मम्) लाभाऽतिशायमवगत्य ततो विहृत्य, मासे शुचौ शुभदिने समुपैच्च तत्र । वर्षर्तुवासकृतये सकलाश्च पौरा, विज्ञप्तिमस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बहुधा विनयेन चक्रुः ॥ १० ॥ ( मौक्तिकमाला )––वाहडमेराऽऽगत इह संघो, विज्ञपयामास तइव(?) सूरिम् । योधपुराच्चाऽऽगतकतिसंघाः, प्रार्थितवन्तश्च सुगुरुमेनम् ॥ ११ ॥ ( उपजातिः )––इत्थं त्रिविज्ञप्तिविबोधितोऽसौ, विबुध्य चाऽत्राऽधिकलाभयोगम् । वालोत्तरायां कतिभिः सुशिष्यैः, स्वयं स्थितः श्रीजिनकीर्तिसूरिः ॥ १२ ॥ श्रीमांस्ततः श्रीसुखसागराऽऽदीन्, योग्यांस्त्रिसाधून् किल तैश्च सत्रा । संप्राहिणोद्योधपुरे सुखेन, श्रीसंघसन्तोषविधित्सयाऽसौ ॥ १३ ॥ ( आर्यागीतिः )––तत उवाच सूरीन्द्रो, वाहडमेर–जेसलमेरश्रावकान् । नैकटिकत्वाद्यूयं, प्रतिदिनमिहाऽऽगत्य सुखेन लाभयत ॥ १४ ॥ लप्स्यथ लाभं यूयं, कार्तिक्याः पूर्णिमायाः परमवश्यम् । अधुना भज(?) सन्तोषं, सम्प्रति मत्पार्श्वे नाऽस्ति तादृङ्मुनिः ॥ १५ ॥ सन्त्यन्ये द्वित्रिमुनयः, साम्प्रतं तेऽपि विहरन्ति देशान्तरे । शास्त्रेषु तेऽतिकुशलाः, पृथगपि चतुर्मासं कर्तुमर्हन्ति ॥ १६ ॥

( आर्या )––एकस्तेषां ज्यायान्, मदन्तेवासी सदुपाध्यायश्च । जयसागरगणिनामा, शास्त्राऽकूपारपारीणः ॥ १७ ॥

( उपजातिः )––स श्रावकाणां बहुनाऽऽग्रहेण, पालीपुरे मद्वचसा चिकीर्षुः । वर्षर्तुवासं विचकास्ति तत्र, धर्माऽम्बुधारां घनवद्विवर्षन् ॥ १८ ॥ सिद्धान्तवेत्ता सदसद्विवेक्ता, मरालवत्पद्मसरित्पतिश्च । दिल्ल्यां सुपुर्यामधुना स वर्तते, ददत्समेषां परिबोधमालाम् ॥ १९ ॥ विवेकयुक् सागरनामधेयः, सुधीस्तृतीयो मुनिरस्ति योग्यः । कर्ता चतुर्मासमसौ सिरोह्या–मतोऽस्म्यशक्यः प्रहितुं सुसाधुम् ॥ २० ॥ भवन्त आगत्य सुखेन चाऽत्र, पर्यूषणाऽऽदौ पुरुषाः स्त्रियश्च । कुर्वन्तु सर्वेऽवसरे तदस्मिन्, धर्माऽऽदिकृत्यं शुभभावयुक्ताः ॥ २१ ॥ इत्थं सुधासोदरसद्वचोभिः, सर्वान् समभ्यागतभव्यलोकान्, सन्तर्पयामास ततः प्रहृष्टा, निजं निजं पत्तनमागमंस्ते ॥ २२ ॥ ( भुजङ्गप्रयातम् )––ततश्चन्द्रताराऽऽद्यशेषाऽनुकूले, सुघस्रे सुयोगे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलिष्ठे च लग्ने । विवाहप्रयुगुज्ञसिस्त्रं पवित्रं, महत्यां सभायां समारब्धवान् सः ॥ २३ ॥ ( तोटकम् )--हरिविक्रम-रम्य-चरित्रमपि, स्तनयित्नु-रवोपमया सुगिरा । जनता अमिताः समुपेतवती-रनघः सुगुरुः समवोचदसौ ॥ २४ ॥

( द्रुतविलंबितम् )--प्रतिदिनं क्रमशो जनताऽऽगमः, शशिकरः सितपक्ष इवाऽवृधत् । प्रववृधे जिनबिम्बसमर्चनं, विविध-सत्तपसामपि वर्द्धनम् ॥ २५ ॥ ( वंशस्थम् )--अथाऽऽगते पर्युषणे सुपर्वणि, दिनाऽष्टकं भूरिविशेषसूत्सवैः । सहैष आचार्य उदारशक्ति-श्चतुष्प्रकारैः सकलैश्च संघकैः ॥ २६ ॥ (गीतिः )--तत्र स्थित-खरतरगच्छीयबृहदुपाश्रयश्रीपूज्येन । उपाध्याय-श्रीमदन-चन्द्रप्रमुखैः सद्भिः सानन्दम् ॥ २७ ॥ ( उपजातिः )--प्रवर्धमानाऽधिकशुद्धभावै-राराधयामास विशुद्धचेताः । श्राद्धैश्च सर्वैरयमाद्य एवाऽ-त्राऽपूर्वलाभाऽवसरो बभूव ॥ २८ ॥ ( कुलकम् ) मासाऽर्धमासक्षपणं तथाऽष्टा-ऽह्नीनं तपोऽजायत भूरिशोऽत्र । अभूत्तपस्या नव-पञ्चरङ्गी, बेला च तेला कियती प्रशस्या ॥ २९ ॥ स्वधर्मिवात्सल्यमभूदनेकं, जिनेन्द्रपूजा विविधोपचारैः । प्रभावनाः श्रीफल-शर्कराऽऽद्यैः, श्रद्धालवः पौरजना व्यधुस्ते ॥ ३० ॥ नानाविधं दानमशेषजीव-रक्षाकृते पौरजना अकार्षुः । अखण्डितं शीलमपुश्च सर्वे, जहुश्च साऽवद्यमशेषकृत्यम् ॥ ३१ ॥ आगांसि जातानि मिथः समस्ताः, क्षान्त्वा परैः संक्षमयाम्बभूवुः । कृत्येन तेनाऽपुनत स्वकार्यं, वैशुद्ध्यमापुः परमार्हता हि ॥ ३२ ॥ इत्थं गुरोरस्य महोपदेशै-र्विचारशक्तिं प्रतिपद्य बुद्धाः । प्रश्नोत्तराण्यप्यधिकानि कृत्वा, नराः खवेदैप्रमिताः स्त्रियश्च ॥ ३३ ॥ द्वात्रिंशतः शाश्वत-जैनधर्म-प्रकीर्तितामार्हतबिम्बपूजाम् । स्वीचक्रिरे नित्यमुखाऽपिधान-मौज्झन्नचित्तं जलमेव पेयम् ॥ ३४ ॥ ( युग्मम् ) अशुद्धमुच्छिष्टजलं सदैवाऽ-पेयं तथा पर्युषिताऽन्नकादि । न भक्षणीयं करणीयमर्चा-सन्दर्शनं श्रीभगवत्सुमूर्तेः ॥ ३५ ॥ इत्यादि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नानानियमांश्च सर्वे, ते लुम्पकाः साग्रहमाग्रहीषुः । एतद्गुरूणामुपदेशमाला, तत्राऽकरोच्छासनदीप्तिमित्थम् ॥ ३६ ॥ इत्थं प्रबोधञ्जनताः प्रविद्वान्, आरब्ध सूत्रं परमं पवित्रम् । चरित्रमप्येष समाप्य कार्ति-क्यां पूर्णिमायां विजहार तस्मात् ॥ ३७ ॥ देशीय-वैदेशिकलोकपुञ्जैः, चातुर्विधैः संघजनैश्च सत्रा । चित्रोत्सवैरेष समस्त-शिष्यै-र्जलोलनाम्नीं नगरीं पुनानः ॥ ३८ ॥ पुरातनाऽपूर्वसुतीर्थनाम्ना-डापार्श्वनाथं क्रमिकप्रवृद्धैः । भावैरुदैक्षिष्ट समस्तसंघै-र्धन्यं च मेने निज-कायमेषः ॥ ३९ ॥ तत्राऽऽगमिष्यत्कियतां प्रतीक्षां, कुर्वन् महीयान् गुरुभक्तिभाजाम् । तस्थौ दशाऽष्टाऽहमगाधबुद्धि-राचार्यवर्यो जिनकीर्तिसूरिः ॥ ४० ॥ विहृत्य तस्मात्तलवाडनाम-पुरं समागान्महिमाऽम्बुराशिः । पौराश्च सर्वे मुदिता वितत्य, महोत्सवं तं पुरमानयन्त ॥ ४१ ॥ तद्देशना-सौधरस-प्रवाहे, निमग्नतामापुरशेषलोकाः । विसस्मरुः स्वीयमशेषकृत्य-महासिषुर्मोहमयम्प्रपञ्चम् ॥ ४२ ॥ ततो विहृत्याऽऽगतवांश्च गोल-पुरीमनल्पैः सह शिष्यवर्गैः । बेण्डाऽऽदिवाद्याऽऽदिभि-रागतं तं, प्रवेशयामासुरशेषपौराः ॥ ४३ ॥ जीमूत-सन्नाद-सम-स्वनेन, सूरीश्वरस्तत्र ददौ सभायाम् । महोपदेशं कतिजन्म-जात-पापाऽपहारं शिवसौख्यकारम् ॥ ४४ ॥ प्राप्तस्ततो वायतुनामपुर्या-माडम्बरैर्दीर्घितैश्च पौराः । प्रावेशयन्ताऽधिककीर्ति-मन्तं, त्वेषोऽपि धर्मं समुपादिशच्च ॥ ४५ ॥ ततो वणिग्ग्राममुपाययौ स, भेर्यानकाद्यैर्विविधैः सुवाद्यैः । प्रविश्य सम्यक्त्व-सुदार्ढ्यकर्त्रीं, सद्देशनां पापहरीमदाच्च ॥ ४६ ॥ समागतो वाहडमेरपुर्यां, सूरीश्वरोऽसौ सह भूरिशिष्यैः । तदागमोत्थ-प्रमुदा सुपौराः, प्रावीविशंस्तं ह्यधिकोत्सवेन ॥ ४७ ॥ भवाऽब्धिपोतायितशुद्धधर्म-मुपादिशन्मेघगभीरनादैः । आचार्यवर्यः सदसि प्रकाम-मनन्तनिःश्रेयसलब्धिहेतुम् ॥ ४८ ॥ अत्याग्रहात्पौरजनस्य तत्र, सन्तस्थिवान्मासमसौ सुखेन । सन्धापयन्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मसुधां सुभव्यान्, अनारतं श्रीजिनकीर्तिसूरिः ॥ ४९ ॥ चैत्यत्रयी गौरवसद्म चैक–मुपाश्रयौ द्वाविह धर्मशाला । चैका विशाला वरिवर्ति रम्या, ह्येकं सरायो रमणीयपुर्याम् ॥ ५० ॥ सदोशवंशीयमहाजनानां, शतं गृहाः पञ्च समुल्लसन्ति । सर्वा च संख्या वसतेः सहस्रं, दिग्वा तिथिर्वा परिकीर्तिताऽस्ति ॥ ५१ ॥ सा तालुमालाऽभिधयाऽपि लोके, प्रख्यातिमाप्ता नगरी किलैषा । इतः प्रयाणं कृतवान् स जेश–लमेरुदुर्गे पुरलोद्रवे च ॥ ५२ ॥ प्राचीनचिन्तामणिपार्श्वनाथ–यात्राचिकी–र्भूरिजनैः सहाऽसौ । आगत्य ढाणीनगरं स तस्थौ, ततो विशालामथमाजगाम ॥ ५३ ॥ ततोऽभियातः पुरि कोटडायां, सुसत्कृतः पौरजनैस्ततोऽगात् । शिवाऽभिधानां नगरीमितोऽपि, जराइसंज्ञं नगरं समागात् ॥ ५४ ॥ स मानकूँवामभि-गत्य देई–कोटं ययौ सूरिवरः सशिष्यः । इतो विहृत्याऽऽगमदेष चोकी–मितो ययौ जेशलमेरमीड्यः ॥ ५५ ॥ प्रतीयते भट्टनृपालराज-धानी पुराऽस्ति प्रथिता पृथिव्याम् । इह प्रवेशोत्सववाद्यनादै–र्बाधिर्यमापुः सकला दिशोऽपि ॥ ५६ ॥ सुसज्जिता वाजिगणा जविष्ठाः, सिताऽऽतपत्रं शशिमण्डलाऽऽभम् । सुवर्णबद्धोज्ज्वलचामरा हि, ध्वजा अनेका गगनं लिहन्तः ॥ ५७ ॥ जयाऽऽरवं तन्वदशेषपौरा, ग्रामान्तरीया अमिता उपेताः । सुश्राविका भूषणभूषिताऽङ्गा, जगुः कलं मङ्गलरम्यगीतम् ॥ ५८ ॥ इत्थं महाऽऽडम्बरतः प्रविश्य, पुर्यामसौ श्रीजिनकीर्तिसूरिः । जन्नाणियोपाश्रयमेत्य तस्थौ, विनिर्जिताऽशेष-विपक्षपक्षः ॥ ५९ ॥ सुधोपमां श्रीगुरुराज एष, सद्देशनां भूरि विबोधदात्रीम् । जन्माऽऽदिवित्रासविनाशकर्त्री–मुपादिश-त्पापततिप्रहन्त्रीम् ॥६०॥ श्रद्धालवः श्राद्धगणा निपीय, तद्देशना-सौधरसं यथेच्छम् । नूनं गुरो ! त्वम्भववार्द्धि-पोता–यितोऽसि साद्गुण्यसरित्पतिस्त्वम् ॥ ६१ ॥ न त्वादृशः कोऽपि विशुद्धधर्मो–पदेशकः सर्वकषायमुक्तः । वर्वर्ति लोके ह्यपरो मुनीशः, प्रसह्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्तारय नः प्रपन्नान् ॥ ६२ ॥ इत्थं स्तुवन्तो गुरुराजमेनं, हृष्टाः समग्राः सुजना उपेताः । आप्तप्रबोधा गुरुराजरक्ता, निजं निजं वासमुपाययुस्ते ॥ ६३ ॥ (त्रिभिर्विशेषकम्) अन्येद्युराचार्यवरो महीयां-स्तत्रत्यदुर्गोपरि चारुरोह । चतुर्विधैः संघजनैः समेतो, जिनेशयात्राकृतये सहर्षः ॥ ६४ ॥ अष्टौ वसह्यः परिषन्ति तत्र, पुर्यामधस्तादपि रम्यमेकम् । विशालचैत्यं गगनावलेहि, सुपार्श्वनाथीयमपूर्वमस्ति ॥ ६५ ॥ एतच्च लोका नवमीं सुरम्यां, जल्पन्ति सर्वे वसहीमिहत्याः । दुर्गोपरिस्थाऽऽदिमसद्वसह्यां, श्रीत्रैशलेयो भगवान् विभाति ॥ ६६ ॥ श्रीआदिनाथो वसहीं द्वितीयां, श्रीमान् सदाऽलङ्कुरुते जिनेशः । चन्द्रप्रभाख्यो भगवांस्तृतीयां, तुर्यां तथाऽष्टापद एव नित्यम् ॥ ६७ ॥ तां पञ्चमीं सम्भवनाथनामा, विभ्राजते शीतलनाथबिम्बम् । षष्ठ्यां वसह्यां सदभीष्टदोहि-चिन्तामणिश्रीप्रभुपार्श्वनाथः ॥ ६८ ॥ विद्योतते सप्तमसद्वसह्यां, सीमन्धराऽदिर्जिनविंशतिश्च । तदन्तिमायां विचकास्ति नित्यं, सुपार्श्वनाथो नवमाऽभिधायाम् ॥ ६९ ॥ सन्त्यष्टरन्ध्रप्रमितानि तत्र, सद्गेहचैत्यान्य-पराणि तेषु । सर्वेषु गत्वा जिनराजबिम्बं, व्यलोकत श्रीगुरुराज एषः ॥ ७० ॥ अस्ति द्वितीया वसही द्विभूमि-स्तृतीयिका सा त्रिधरा ज्वलन्ती । शेषा वसह्यः परिषन्ति तत्रै-कभूमिका रम्यतरा महत्यः ॥ ७१ ॥ वेण्डाऽऽदिनानाविधवाद्यनादैः, सुश्रा-विकाणां कलगीतनादैः । विधाय यात्रां परया सुभक्त्या, ससंघ एषोऽधिजगाम वासम् ॥ ७२ ॥ कियद्दिनाऽनन्तरमेष तस्माद्, गव्यूतिदूरे दिशि चोत्तरस्याम् । तटाक एकोऽमरसागराऽऽख्यः, प्राच्यां प्रतीच्यां दिशि सन्ति तस्मात् ॥ ७३ ॥ भव्यत्रि-चैत्यानि महान्ति भान्ति, श्रीमद्गुरूणामतिमञ्जुलानि । त्रीण्येव सद्मानि महत्तराणि, ह्युपाश्रयाणां त्रितयी विशाला ॥ ७४ ॥

(तोटकम्)––वनखण्डमनेकमिहाऽस्ति बृहत्, सकलाऽऽर्तवसौख्य-विशेषददम् । अखिलाऽऽगत-यात्रिकचित्तहरं, बहुधा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहगोत्कर-रम्यरुतम् ॥ ७५ ॥ इह यात्रिकवृन्दनिवासकृते, परमर्द्धिककारितधर्मगृहाः । कमनीयतमा अतिदीर्घतमा, न्यवसत्रि दिनानि सुधीरनघः ॥ ७६ ॥ (उपजातिः)—त्रिक्रोशदूरे तत एष सूरि–र्वायव्यकोणे पुरलोद्रवाऽऽख्यम् । प्राचीनतीर्थं फलदं हि सद्यो, वेविद्यते पावनकारि लोके ॥ ७७ ॥ फणासहस्राऽधिकशोभमान–श्चिन्तामणिश्रीप्रभुपार्श्वनाथः । नवाम्बुद-श्यामलकान्तिकान्त–स्तत्तीर्थनाथो विलसत्यजस्रम् ॥ ७८ ॥ (वसन्ततिलका)—तन्मूलमन्दिरसमक्षविशोभमानः, सन्दीप्र एकतिलकाऽभिधतोरणोऽस्ति । सत्पीतरम्यदृषदारचितोऽतिभव्यः, सूक्ष्मप्रशिल्पनिकरैरतिसुन्दरो हि ॥ ७९ ॥ वीयाय लक्ष्म-मुकस्य विनिर्मितो हि, स्तम्भद्वये वसुजिनच्छवयो ललन्ति । साक्षादिवाऽऽकृतिमिता अतिहारिरूपाः, सम्पश्यतां मनसि तोष-विशेषकर्त्र्यः ॥ ८० ॥ (उपजातिः)—प्रदक्षिणायाः पथि मन्दिरस्य, प्राच्यं सुचैत्यं प्रथमाऽर्हतश्च । याम्यां दिशायामजित-प्रभूणां, सच्चैत्यमेवं दिशि पश्चिमायाम् ॥ ८१ ॥ श्रीमत्प्रभोः सम्भवनाथकस्य, कौबेरिकायामपि भव्यचैत्यम् । वामेयचिन्ता-मणिसत्प्रभूणां, मूर्द्धस्थशेषाऽखिलसत्फणानाम् ॥ ८२ ॥ (क्षमा)—त्रितयललितवप्राऽतिशोभोल्लसत्, सुरविटपिघनच्छायमत्यु-ज्ज्वलम् । समवसरणमेतस्य पार्श्वप्रभो–र्विलसति निकटे सर्वचेतोहरम् ॥ ८३ ॥ (स्रग्धरा)—तन्मध्येऽशोकवृक्षो विलसति रुचिरो द्वौ ततः प्राचि संस्थौ, याम्यां चत्वार ईड्या वरुणदिशि तथाऽष्टौ जिनेन्द्रा लसन्ति । कौवेर्यां भान्ति तद्वद्दश जिन-पतयः सर्वकर्मप्रमुक्ताः, प्रोच्चप्राकार एतज्जिनभवनबहिर्वर्तुलो वर्वृतीति ॥ ८४ ॥ (उपजातिः)—वप्राद्बहिर्मन्दिरसम्मुखीनः, सुचत्वरो दीर्घतरोऽभितश्च । तत्राऽस्ति सत्सौधविशालपङ्क्ति–र्वामे च दक्षे रुचिराऽऽनुपूर्व्या ॥ ८५ ॥ उपाश्रया देवगृहा गुरूणां, सद्मानि रम्योपवनानि तत्र । वाप्यस्तटाका बहुशो लसन्ति, सरांसि कुण्डानि च पावनानि ॥ ८६ ॥ सद्द्रव्यवृन्दैः

For Private And Personal Use Only

परिषेव्यमानो, विमानतुल्यो विलसत्प्रभावः । पापौघनाशी सदभीष्टदायी, जागर्ति सत्पावनतीर्थ एषः ॥ ८७ ॥ समश्च
संघेन चतुर्विधेन, श्रीसूरिराजः समुपेत्य तत्र । प्रवृद्धभावेन विधाय यात्रां, दिनाऽष्टकं सोऽत्र सुखेन तस्थौ ॥ ८८ ॥
त्रिक्रोशदूरे वरिवर्ति तस्मात्, पुरं रुपस्यावरमीसरश्च । प्रायस्ततः क्रोशमितान्तराले, संस्थापिते श्रीगुरुपादुके स्तः ॥ ८९ ॥
कुण्डश्च तत्राऽस्ति यदीयवारि, ग्रीष्मे समुच्छल्य वहत्यजस्रम् । खगा मनुष्याः पशवश्च तद्धि, सुशीतलं मिष्टतरं पिबन्ति
॥ ९० ॥ महाचमत्कारिकतीर्थकेऽस्मिन्, जिनेश्वराणां गुरुपादुकाऽऽदेः । सन्दर्शनं तत्स्तवनं विधाय, भक्त्या ससंघस्तत
आजगाम ॥ ९१ ॥ सूरीश्वरो लोद्रवयुक्पुरं हि, समागमच्चाऽमरसागराऽऽरव्यम् । महातटाकं सह सर्वसंघै–र्माघेऽसिते
शैलसुतासुतिथ्याम् ॥ ९२ ॥ चक्रे गुरुर्जेशलमेरतीर्थ–यात्रामपूर्वामयमाद्यवारम् । निःसीममानन्दमतश्च लेभे, श्रीमान्मही-
यान् जिनकीर्तिसूरिः ॥ ९३ ॥ पुर्याश्चतुर्दिक्षु महान्ति सन्ति, क्रोशार्धदूरे गुरुमन्दिराणि । प्रायोऽत्र वर्षं जनताऽऽग्रहेण,
सच्छिष्यवर्गैः सह तस्थिवांश्च ॥ ९४ ॥ स वर्जयित्वा चतुरश्च मासान्, शेषेषु मासेषु च मासकल्पीम् । सत्पद्धतिं पातु-
मनेकयात्रां, विधातुकामो व्यहरत्पुराऽऽदौ ॥ ९५ ॥ चिन्तामणिश्रीप्रभुपार्श्वनाथ–यात्राचिकीर्लोद्रवयुक्पुरे हि । गमा-
ऽऽगमौ शिष्यदलैश्च सत्रा, कुर्वाण आसीद्गुरुराजवर्यः ॥ ९६ ॥ चतुर्दशी तावदुपाजगाम, तस्मादसौ सर्वजनाऽऽग्रहेण ।
त्र्यष्टाऽङ्क[१९८३]–चन्द्रप्रमिते च वर्षे, तत्र स्थितः प्रावृषि सूरिराजः ॥ ९७ ॥ सर्वर्द्धिमज्जेशलमेरपुर्यां, कुर्वंश्चतुर्मासमसौ महीयान् ।
उपादिश्य (आदिश्य) संघं जिनभद्रसूरि–संस्थापितानां बहुपुस्तकानाम् ॥ ९८ ॥ सत्तालपत्रोपरिलेखितानां, सुजीर्णतां प्राप्तवतां
समेषाम् । समुद्दिधीर्षुर्जिनकीर्तिसूरिः, प्राजूहवल्लेखकवर्गमेषः ॥ ९९ ॥ (युग्मम्) नानाप्रतीस्तैर्बहुलव्ययेन, प्रालेखयच्छुद्ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तराः सुयत्नात् । तान्यागमीयानि च पुस्तकानि, तत्रत्यकोशे समतिष्ठिपच्च ॥ १०० ॥ अवाचयत्सूत्रकृताङ्गमत्र, तथा चरित्रं हरिविक्रमस्य । नानाविधान्युज्ज्वलसत्तपांसि, स्त्रियः पुमांसश्च सुखेन चक्रुः ॥ १०१ ॥ देशादनेकादतिदूरतो हि, तद्देशिनां चाऽत्र समागतानाम् । तत्तीर्थयात्राकृतये गुरूणा-मालोकनार्थं बहुसज्जनानाम् ॥ १०२ ॥ उपस्थितिर्भूरितराऽत्र जज्ञे, सुधा-सदृक्षामघताऽपहर्त्रीम् । सद्देशनामस्य गुरोर्निशम्य, हर्षप्रकर्षं दधिरेऽप्यशेषाः ॥ १०३ ॥ ( युग्मम् ) समागते पर्युषणे क्रमेण, पर्वाऽधिराजे मनआदिशुद्ध्या । सद्दान-शीलाऽधिक-सत्तपोभि-राराधयामासुरविघ्नमेतत् ॥ १०४ ॥ तथाऽऽश्विने शुक्ल-दले सुखेन, चाऽऽयम्बिलौलीत्यभिधानपर्व । सद्दीपमालाऽभिधपर्वसौभा-ग्यपञ्चमीपर्वमहामहेन ॥ १०५ ॥ ऊर्जे च शुक्ला-ऽष्टमिकासुपर्व, यथाक्रमं सर्वजनाः सुभक्त्या । समारराधुर्दुरवापबोधि-बीजं समापुर्गुरुराजयोगात् ॥ १०६ ॥

( इन्द्रवंशा )—चक्रुश्चतुर्मासिकसम्प्रतिक्रमं, सानन्दमानन्दघनं प्रपित्सवः । सार्धद्विमासाऽवधि सर्वसाधवः, सन्तापतप्ता अभवन्ननारतम् ॥ १०७ ॥ तस्माच्चतुर्मासपरेऽपि साधवः, साध्व्यश्च तत्रैव पुरेऽधिसंस्थिताः । शक्तिं विहर्तुं ह्यलभन्त नैतके, पौषेऽसिते पक्षतिकाऽवधिं यतः ॥ १०८ ॥ ( इन्द्रवज्रा )—एकादशीं साहसमौननाम्नीं, सत्पर्वरूपां दशमीं च तैषे । आराध्य पौषाऽसितसद्दशम्यां, तल्लोद्रवीयामकरोच्च यात्राम् ॥ १०९ ॥ पुनस्ततो जेशलमेरमेत्य, सहस्य शुक्ले कतिथौ ततोऽसौ । सूरिश्चतुर्धात्मकसंघयुक्तः, सह व्यहार्षीन्निजशिष्यवर्गैः ॥ ११० ॥ ( आर्यागीतिः )—मोकलसर-बासणपी-र-पीरचौकी-चांदण-सोढा-कोरम् । लाठि-धोलिया-ओडा-णीयो-पोकरणाऽऽदिका नव ग्रामाः ॥ १११ ॥ ( आर्या )—चम्पावतराजपुत्र-श्रीराम-देवाऽभिधठक्कुराणाम् । प्रधाना राजधानी, कथ्यते प्राक्तनैः पुम्भिः ॥ ११२ ॥ ( इन्द्रवंशा )—सन्ति त्रयोऽस्मिन् सुजिनेश्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राऽऽलया–स्तावन्त एवाऽत्र लसन्त्युपाश्रयाः । प्राचीन एकोऽस्ति तडाग उज्ज्वल–स्तस्योपरिष्टाद् गुरुराजमन्दिरम् ॥ ११३ ॥ अस्त्येष सदेवविनिर्मितो महान्, सुस्वादुपानीयसुपूर्णतां गतः । तस्मिन् पयोमानमवाप नो हि ना, माहात्म्यमस्याऽधिकमस्ति कीर्तितम् ॥ ११४ ॥ (द्रुतविलंबितम्)—प्रथितलोद्रवपत्तनसंस्थितं, दशयुतं वरकुण्डमपि स्फुटम् । महति पोकरणे नगरेऽपि च, य उदितो बहुदीर्घतडागकः ॥ ११५ ॥ (तोटकम्)—अजमेरपुराऽनतिदूरगते, बहुपावनपुष्करनाम्नि पुरे । रमणीयतडागवरो गदितः, प्रथितो जगतीतलके सकले ॥ ११६ ॥ (उपजातिः)—प्रभावती नाम सुरी किलैका, चक्रे च तांस्त्रीनपि दिव्यशक्तिः । दुष्कालके घोरतरेऽपि जाते, न हीयते वारि कदापि तेषाम् ॥ ११७ ॥ श्रद्धालवो धर्मरताश्च लोका, गार्हस्थधर्मानखिलानवन्तः ' देवे गुरौ चापि सुभक्तिमन्तो, वसन्ति तस्मिन् कमलाविशालाः ॥ ११८ ॥

(शार्दूलविक्रीडितम्)—वाप्याली-वनखण्ड-कूप-रुचिराऽऽरामा अमुष्यां पुरि, वर्तन्ते परितः सुवप्रपरिखा सत्तोयपूर्णा सदा । अम्भोजानि लसन्ति तत्र विविधाऽऽकाराणि फुल्लानि वै, भृङ्गाऽऽलीपरिषेवितानि विहगश्रेणीसुजुष्टान्यपि ॥ ११९ ॥ एतस्यां पुरि चागतं गुरुवरं संघश्चतुर्धाऽऽत्मकः, सद्ढेण्डाऽऽनक-काहलाऽऽदिविविधाऽऽतोद्यप्रणादैरमुम् । शङ्खाऽऽराव-सुझल्लरी-खरमुखीत्याद्यर्कतूर्यस्वनै–रागत्याऽभिमुखं प्रणम्य विधिवच्चारूत्सवैरानयत् ॥ १२० ॥ गच्छन्तं पुरि सूरिराजमनघं सच्छिष्यवर्गैः श्रितं, सानन्दाः पुरवासिनः प्रतिपथं सद्भाववृद्ध्याऽऽदरात् । माङ्गल्याय शुभाऽक्षतैरतितरां संवर्द्धयन्तो गुरुं, साम्भःश्रीफलकैश्च तेऽधिकमुदाऽपूर्वोत्सवं चक्रिरे ॥ १२१ ॥ (उपजातिः)—इत्थं महीयान् बहुलब्धकीर्तिः, सञ्जातचारूत्सवतः समेत्य । उपाश्रयं सूरिवरः सुवाचा, प्रारब्धवांश्चारुसुदेशनां सः ॥ १२२ ॥ समस्तदुःखाऽऽशुनिराकरिष्णुं, निःशेषमाङ्गल्य-



For Private And Personal Use Only

वितानकर्त्रीम् । सुधोपमां संसृतिनीरराशौ, पोतायमानां द्रुतबोधदात्रीम् ॥ १२३ ॥ ( युग्मम् ) आकर्ण्य सर्वे सुजनाः प्रसेदुः, सम्पीय सूरीश्वरवक्त्रचन्द्रात् । धर्मोपदेशाऽमृतसद्रसं ते, कामप्यपूर्वां परितृप्तिमापुः ॥ १२४ ॥ सञ्जातमार्गश्रममेष सूरी– श्वरोऽपनेतुं दिवसं द्वितीयम् । व्यत्यैच्च तत्रस्थजिनेशचैत्या–न्यालोकताऽशेषजनैरुपेतः ॥ १२५ ॥ स्थितं तटाकोपरि गौरवं यत्, सुमन्दिरं दृश्यतरं प्रसिद्धम् । आलोक्य तच्चेतसि मोदभारं, बभार निःसीममसौ प्रविद्वान् ॥ १२६ ॥ चक्रे विहारं दिवसे तृतीये, तस्याः पुरः श्रीजिनकीर्तिसूरिः । तत्पश्चपीरं नगरं समेत्य, धर्मं विशुद्धं समुपादिशत्सः ॥ १२७ ॥ ततो विहृ- त्याऽऽगतवांश्च पीप–लीपत्तनं पौरजनोऽप्यमुष्य । पुरप्रवेशोत्सवमुत्तमं हि, व्यधाद्ददौ सोऽथमहोपदेशम् ॥ १२८ ॥ क्षोणीपुरं प्रापदितो विहृत्य, विधाय संघोऽथ समुत्सवं हि । पुराऽन्तरानेष्ट गुरुस्ततोऽसौ, धर्मोपदेशैः सकलं ततर्प ॥ १२९ ॥

( इन्द्रवंशा )—आगच्छदस्मात्फलवार्द्धिपत्तनं, संघश्चतुर्धा ह्यवगत्य सङ्गतम् । तत्रत्य आगत्य ततोऽस्य सम्मुखं, बेण्डाऽऽदि- काऽऽतोद्यलसन्महोत्सवैः ॥ १३० ॥ तं भूरिभक्त्या विधिनाऽभिवन्द्य, सर्वो हि पौरः प्रथितप्रभावम् । प्रावीविशत्सूरिगणेन्द्र- सेनं, प्रेक्षावतामादिममद्वितीयम् ॥१३१॥ ( युग्मम् ) अटाट्यमानस्त्रिचतुष्पथाऽऽदौ, चेक्रीयमाणो जिनदर्शनं सः । ईर्यासमित्या परिशोधयन् हि, मार्गं समागच्छदुपाश्रयं च ॥ १३२ ॥ ( वंशस्थवृत्तम् )—ततश्च पीयूषसमानदेशनां, भवाऽब्धिपोतायित- कर्णतृप्तिदाम् । अघौघ-कुध्रोत्करवज्ररूपिणीं, ददौ गुरुर्मुक्तिविलासिनीसखीम् ॥ १३३ ॥ ( उपजातिः )—महीयसश्चाऽस्य विशेषधर्मो-पदेशमाकर्ण्य समस्तसभ्याः । असीमसन्तोषमलप्सतैतन्, माघे सिते धातृतिथौ बभूव ॥ १३४ ॥ परेद्युराचार्य- वरोऽवशिष्ट–जिनेश्वरीयाऽखिलचैत्यकानाम् । सद्गौरवाणामपि मन्दिराणा-मालोकनं सम्यगसौ चकार ॥ १३५ ॥ कालं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कियन्तं गमयाञ्चकार, तत्रैव तिष्ठन् प्रतिबोधयन् हि। जीवांश्च भव्यान् गुरुदेवभक्ता–ञ्छ्रीत्रैशलेयोदितशुद्धधर्मम् ॥ १३६ ॥
कियद्दिनाऽनन्तरमिभ्यकृष्ण-लालाभिधः संपतलालसूनुः। लूनावतीयो महता महेन, रथोत्सवं रम्यतरं विधाय ॥ १३७ ॥
सार्धं चतुर्धात्मकसंघकेना-ऽऽचार्यं गरिष्ठं जिनकीर्तिसूरिम्। अत्यन्तमागृह्य खिचन्दनाम्नि, सत्पत्तने सादरमानिनाय ॥ १३८ ॥
(युग्मम्) तत्राऽस्ति भव्यं जिनचैत्यमेकं, स्नात्राऽर्चनं तत्र यथाविधानम्। आष्टाह्निकश्चाऽभवदुत्सवो हि, सत्स्वामिवात्सल्यम-भूदजस्रम् ॥१३९॥ प्रभावना श्रीफल-शर्कराद्यै-र्नानाप्रकारी(रा) जिनराजपूजा। अकारि तेनेभ्यवरेण भक्त्या, दानं यथावित्त-मपि प्रचक्रे ॥ १४० ॥ पुनः ससंघैः सह शिष्यवृन्दैः, शेश्रीय्यमाणाऽमलपादपद्मम्। श्रीमन्तमाचार्यवरं च तत्रै–वाऽऽनीत-वान् रम्यपुरे सुखेन ॥ १४१ ॥ अथैकदा मासिककल्पपूर्णे, विहर्तुमुद्युक्तगुरुं गरिष्ठम्। व्यजिज्ञपच्चैत्य मुदा गुलेच्छा-गोत्री-यसुश्रावकभावपूर्णः ॥ १४२ ॥ माणिक्यलालोऽप्यथ सम्पताऽऽदि–लालाऽनुगः श्रीगुरुराजवर्य !। श्रीकृष्णलालाऽभिध इभ्यवर्यो, लूनावतीयो भवदाज्ञया हि ॥ १४३ ॥ सार्धं सहस्रं द्रविणं स्वकीयं, संवीत्य रम्यां रथकीययात्राम्। निष्काश्य लेभे बहुलाभमेष, ततान कीर्तिं महतीं पृथिव्याम् ॥ १४४ ॥ (त्रिभिर्विशेषकम्) तदन्यमप्येष यथाऽऽत्मशक्ति, लब्धुं प्रयत्नं कुरुतेऽतिवेलम्। ममाऽपि चित्ते समुदेति भावः, सद्भाग्ययोगाद्यदुपागतस्य ॥ १४५ ॥ कषायमुक्तस्य परोपकर्तुः, संसार-घोरार्णव-तारकस्य। तवेदृशाऽमोघमहोपदेश–माकर्ण्य नित्यं सुविदां वरिष्ठ ! ॥ १४६ ॥ चतुर्विधैः संघजनैः सहाऽहं, सत्तीर्थयात्रां चरिकर्तुमीहे। तस्यां त्वयाऽवश्यमशेषशिष्यै–र्गन्तव्यमित्यस्ति मनोरथो मे ॥ १४७ ॥ (त्रिभिर्विशेषकम्) अनुग्रहं मय्यपि संविधेहि, पिपूर्हि मे काममम्ुं ध्रुवं त्वम्। पुनीहि मे कायमिदं च वित्तं, श्रीमन् ! गुरो ! ते शरणं गतोऽ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मि ॥ १४८ ॥ तदीयविज्ञप्तिमसौ निशम्य, तमब्रवीत्सूरिवरस्तदेत्थम् । धर्मिष्ठ ! सुश्रावक ! तावकीनोऽ-त्यन्तप्रशस्योऽस्ति मनोरथोऽयम् ॥ १४९ ॥ न्यायेन सम्पाद्य धनं घनं यः, सद्धर्मकृत्यं कुरुते स धन्यः । आराधितोऽयं किल धर्मकल्प–तरुः समस्तं ददते नराणाम् ॥ १५० ॥ तवानुरोधात्सह शिष्यवर्गै–रवश्यमैतास्मि सुकृत्यकेऽस्मिन् । पूर्णे च मासे विजिहीर्षुरस्मि, ह्येका क्रिया द्व्यर्थकरी किलैवम् ॥ १५१ ॥ कियांश्च यातः समयो ममाऽपि, श्रीओशियातीर्थविलोकनाय । अतो भवद्भिः सह गन्तुमिच्छा, जागर्ति सम्प्रत्यनघा ममाऽपि ॥ १५२ ॥ तस्मिन् किलैवं ब्रुवति प्रहृष्टः, श्रीसूरिराजे जिनकीर्तिसूरौ । सम्पाद्य सर्वामचिरं तदीयां, सामग्रिकां संघमचीचलत्सः ॥ १५३ ॥ माणिक्यलालाऽभिध-सम्पताऽऽदि–लालप्रमुखो निरगाच्छुभेऽह्नि । संघश्चतुर्था दिशि दक्षिणस्या–मागत्य तस्थौ चिखलानगर्याम् ॥ १५४ ॥ ततश्चलन् संघदलः सुखेन, लोहावटाऽऽख्यं पुरमाजगाम । तस्मिंश्च पूर्वाऽपरसंविभागौ, तदन्तरे गौरवमन्दिरं हि ॥ १५५ ॥ इष्टेशनं चाऽपि सुरम्यमस्ति, सद्भूमयानस्य महाविशालम् । पूर्वो विभागः प्रथितश्च जाटा–वासेतिनाम्ना सकलप्रदेशे ॥ १५६ ॥ परश्च भागो विसनोयिवास–नाम्ना प्रसिद्धिं गतवानिहाऽस्ति । तत्रत्यपूर्वीयविभागवासी, श्रीसंघमे(ए)तं परमाऽऽदरेण ॥ १५७ ॥ बेण्डाऽऽदिवाद्यैः पुरमानिनाय, श्रीमांस्ततः सूरिवरः सभायाम् । सङ्घद्वयीमण्डलमण्डितायां, विनिर्जिताऽम्भोद–निनादरावैः ॥ १५८ ॥ संसार-दुष्पार-समुद्रतारं, सद्धर्मभेदस्फुटताऽभिरामम् । सुधोपमं श्रोतृमनःप्रसादं, धर्मोपदेशं ददिवानपूर्वम् ॥ १५९ ॥ (युग्मम्) सुदेशनामस्य गुरोर्निशम्य, शिरो धुनानाः सकला हि सभ्याः । अपूर्वमश्रौष्म गुरोरमुष्य, मुखारविन्दादिति सञ्जजल्पुः ॥ १६० ॥ ततश्च सर्वे त्रिचतुर्दिनानि, स्थातुं किलाऽत्रैव समाग्रहीषुः । उवाच सूरिः सकलांस्तदानीं, नैवाऽधुना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थातुमलम्भवामि ॥ १६१ ॥ ततः परावृत्य सुखेन चाऽहं, कालं कियन्तं स्थितिमत्र कृत्वा । मनोरथं वः परिपूरयिष्ये, तावच्च धर्मं सकलाः कुरुध्वम् ॥ १६२ ॥ (इन्द्रवज्रा)—तानेवमाख्याय ससंघसूरिः, प्रस्थाय तूर्णं तत आजगाम । घाणी-पुरं किन्तु समस्तसंघ–स्थानाद्यसत्त्वात्पुरतश्चचाल ॥ १६३ ॥ गव्यूतियुग्मोपरि हारलाया–मागत्य संघो न्यवसद्विरात्रम् । ततश्चलित्वा पुनरेष पञ्च–क्रोशोपरिष्टाद्विककोरमागात् ॥ १६४ ॥ इतः शरक्रोशिकमोशियाख्यं, सत्तीर्थमासादयदेष संघः । विलोक्य तीर्थेशमशेषसंघो, विधाय यात्रां प्रमुदं प्रलेभे ॥ १६५ ॥ पूर्वं हि तत्तत्समये बभूवुः, श्रीनाभिसूनुप्रमुखा महिष्ठाः । वामेयपार्श्वाऽन्तिमकाश्च सिद्धा, जिनास्त्रयोविंशतिसंख्यका हि ॥ १६६ ॥ तेष्वस्य पार्श्वादिकनाथकस्य, सत्पूरुषाऽऽदेयतरस्य गच्छाः । अष्टौ गणेशा अपि तत्प्रमाणाः, काले च तस्मिन्नभवन् सुवन्द्याः ॥ १६७ ॥ यथा शुभंयुः शुभदत्त आर्य–घोषो वशिष्ठः प्रभुब्रह्मचारी । सौम्यस्तथा श्रीधर-वीरभद्रौ, यशोधरश्चाऽष्टगणाऽधिनाथाः ॥ १६८ ॥ कर्तार एते पृथगेव ते स–माचा-रिकायाः सकला गणेशाः । मिथो विभिन्नाऽऽचरणा ह्यभूवन्, पृथक् पृथक् ते रचयाम्बभूवुः ॥ १६९ ॥ ते द्वादशाङ्गीमथ वाचनाऽपि, जाता ह्यमीषां पृथगेव लोके । तस्याश्च भेदे ह्यभवन् हि गच्छा, अष्टौ प्रसिद्धा अवनीतलेऽस्मिन् ॥ १७० ॥ श्रीपार्श्वनाथप्रभुतश्चतुर्थ–पट्टावधिं मोक्षमुपेयिवांसः । युगान्तकृद्भूमिमिदं वदन्ति, पराऽवरज्ञा ऋषयो महान्तः ॥ १७१ ॥ श्री-पार्श्वनाथप्रभुकेवलज्ञा–नोत्पत्तिपश्चात्तृतयाऽब्दतो हि । मोक्षः प्रवृत्तोऽभवदेष पर्या–यान्तप्रकृद्भूमिरुदीर्यते तत् ॥ १७२ ॥ अमुष्य शिष्यः शुभदत्त आद्यो, द्वितीयशिष्यो हरिदत्तनामा । केशी तृतीयोऽभवदार्ययुक्त–समुद्रनामा समभूच्चतुर्थः ॥ १७३ ॥ स्वयम्प्रभोऽभूदथ पञ्चमश्च, रत्नप्रभश्चाऽभवदेष षष्ठः । निशम्यतेऽनेकचिरन्तनाऽऽस्या–द्वृत्तं किलैतद्बहुधा मया हि ॥ १७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राऽनुसारात्तु विनिश्चिनोमि, केशीकुमारः श्रमणो महीयान्। नाऽन्तेसदस्येति परम्परातो, यद्गौतमाऽन्तेसदयं बभूव ॥१७५॥ श्रावस्तिकायां पुरि सङ्गतौ तौ, केशीकुमारो मुनिगौतमश्च । प्रश्नोत्तराभ्यां सुचिरं कृताभ्यां, श्राद्धाऽऽदिवर्गाऽश्रितसत्सभायाम् ॥ १७६ ॥ ( वसन्ततिलका )—स्वस्वाऽन्तवासिमुनिवृन्दमनःस्थ-शङ्का, उत्सार्य गौतममुनिं प्रणिपत्य केशी। तुर्यात्मकव्रतमयं परिहाय धर्मम्, पञ्चव्रताऽऽत्मकमुरीकृतवांश्च धर्मम् ॥ १७७ ॥ इत्थं जगाम भगवत्प्रभुगौतमीय–शिष्यत्वमेष मुनिराट् श्रमणः स केशी। वद्धर्धमानजिनशासन–वर्तमानो, लात्वा निदेशमथ गौतमसद्गुरूणाम् ॥ १७८ ॥ ( उपजातिः )—केशीकुमाराऽभिधसन्मुनीन्द्र–स्ततोव्यहार्षीत्सह शिष्यवर्गैः । देशे ह्यनेके विहरन् ( देशेष्वनेकेषु चरन् ) सुभव्यान्, प्रबोधमानः समवाप्तवान्सः ॥ १७९ ॥ ( इन्द्रवंशा )—कैवल्यविज्ञानमनन्तमुज्ज्वलं, त्रैकालिकाऽशेषसदर्थदर्शकम् । भूतं भविष्यत्सकलं ततोऽसकौ, जानन्नजस्रं विजहार सर्वतः ॥ १८० ॥ (त्रिभिर्विशेषकम्) ( उपजातिः )—जैने च धर्मे जनताममोघ-स्वदेशनाभिः समतिष्ठिपत्सः। प्रान्ते च कृत्वाऽनशनं स केशी, हृत्वा (हत्वा)चतुष्कर्म गतश्च सिद्धिम् ॥ १८१ ॥ तदीयपट्टावलिकाक्रमोऽयं, श्रीवर्द्धमानप्रभुपट्टकेऽस्थात् । श्रीगौतमस्वामिवरो हि सिद्धः, पट्टे तदीये निषसाद केशी ॥ १८२ ॥ तदासने चाऽऽर्यसमुद्र आसीत्, तत्पट्टमेरावुदियाय भानुः। इव प्रदीप्रः कमनीयमूर्तिः, स्वयम्प्रभाचार्यवरो महीयान् ॥ १८३ ॥ अमुष्य पट्टे सममूच रत्न–प्रभाऽभिधाचार्यवरो गरीयान् । आसन् किलैते दश-तुर्यपूर्व–वेत्तार ईड्या जगदद्वितीयाः ॥ १८४ ॥ वीराच्च पञ्चाशति सप्ततौ वा, वर्षेऽस्य सत्ता स्थविरावलीषु । कृत्वा शरीरद्वयमेककाले, चक्रे प्रतिष्ठां नगरद्वयेऽसौ ॥ १८५ ॥ महोपकेशाऽभिधपत्तनं स, पमारगोत्रोपलदेवनामा । दिल्लीस्थ–मौहम्मद–साधुसाहि–युक्सेनसाहस्यमहीशितुर्हि ॥ १८६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साहाय्यमासाद्य कुमारकोऽसौ, संवासयामास गरिष्ठयत्नात् । पूर्वाऽपरीयं किल मानमस्य, समीरितं योजनषट्कमेव ॥१८७॥ (युग्मम्) याम्योत्तरीयं तदभून्नवक्रो-शमात्रकं सर्वगुणाऽभिरामम् । रत्नप्रभाचार्यमहोपदेशात्, सुवासितेऽस्मिन्नगरे मनुष्याः ॥ १८८ ॥ लक्षत्रयत्रि-द्विसहस्रसंख्या, वसन्ति सर्वे धन-धीलसन्तः । सत्कृत्य रक्ता गुरुदेवभक्ताः, सज्जैनधर्मं परिदीपयन्तः ॥ १८९ ॥ (युग्मम्) आचार्यवर्यप्रतिबोधितानां, तत्पत्तनीयाऽखिलजैनिकानाम् । गोत्राणि चाऽष्टादशसंख्यकानि, यातानि लोके सकले प्रसिद्धिम् ॥ १९० ॥ तेषां समेषां महती सुरी चा-मुण्डेति नाम्ना जगति प्रसिद्धा । कुलप्रपूज्या सकलेष्टकर्त्री, पोपूज्यमाना च्छगलादिभिः सा ॥ १९१ ॥ हिंसानिवृत्त्या जनतासुखाय, रत्नप्रभस्तां वशगां विधाय । स्वमन्त्रशक्त्या कुल-देवतां हि, छागादिहिंसां समजीहपत्सः ॥ १९२ ॥ साऽवक् तदा सूरिवर! त्वयाऽहं, यद्वञ्चिता तेन जना हि जैनाः । नैवाऽत्र वत्स्यन्ति न चेह वृद्धिं, यास्यन्ति शापं कुपिता ददौ सा ॥ १९३ ॥ पौरास्ततो भूरिसुमिष्टभक्ष्य-पेयाऽऽदिभिस्तां परिपूज्य भक्त्या । रक्तं कनिष्ठाऽङ्गुलिकीयमस्यै, दातुं प्रलग्ना अथ सा प्रसन्ना ॥ १९४ ॥ जगाद भव्या! न हि वश्मि रक्तं, विगर्हितं तन्न हि मे प्रदेयम् । जाता तदारभ्य विशेषभक्ता, रत्नप्रभाऽऽचार्यगुरोरमुष्य ॥ १९५ ॥

(इन्द्रवंशा)—सम्यक्त्वधात्री सकलाऽनुकम्पिनी, जाता ततः श्रीपरमेष्ठिमन्त्रिणी । मांसाद्यभक्ष्यं मनसाऽपि सा सुरी, नाऽचीकमज्जातु महाऽऽर्हता सती ॥ १९६ ॥ (तोटकम्)—तदनूपलदेवकुमारवरो, हरिमन्दिरमत्र चिकीर्षुरभूत् । दिवसे कृतकुड्यममुष्य निशि, न्यपतत्कतिवारमशेषमपि ॥ १९७ ॥ (उपजातिः)—तदद्भुतं वीक्ष्य कुमारको हि, समेत्य शीघ्रं गुरुराजमेतत् । पप्रच्छ कस्माद्धरिमन्दिरस्य, विनिर्मितौ मे बहुविघ्न एति? ॥ १९८ ॥ आचार्य आख्यत् क्षितिपाऽङ्गज!



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वं, श्रीमत्प्रभोर्वीरजिनस्य चैत्यम् । कुरुष्व नारायणमन्दिरं हि, जहाहि तस्मिन्न हि तेऽस्ति विघ्नः ॥ १९९ ॥ तद्वाक्यमाकर्ण्य कुमारवर्यः, प्रारब्ध वीरप्रभुचैत्यमेव । नाऽभूच्च तस्मिन् पतनाऽऽदिविघ्न–लेशोऽपि सूरीश्वरसत्प्रभावात् ॥ २०० ॥ इतश्च सा शासनदेवताऽपि, भूमेरधस्तात्किल मासयुग्मात् । प्रागेव तद्योग्यसुमूर्तिमेकां, निर्मातुमारब्ध सुखेन भव्याम् ॥२०१॥

(इन्द्रवंशा)—तत्स्थापनारम्यमुहूर्त्त आगतेऽ–प्यैत्याऽवदच्छासनदेवता हि सा । स्वामिन्निदानीं प्रतिमासुनिर्मितौ, कालो लगिष्यत्यधुना करोमि किम् ? ॥ २०२ ॥ तामूचिवान् सूरिवरः किलेत्थं, हे देव्यवश्यं प्रविनिश्चितेऽस्मिन् । शुभे मुहूर्त्ते प्रतिमा त्वया हि, समर्पणीया न विलम्बयेथाः ॥ २०३ ॥ यतः प्रतिष्ठादिवसो द्वितीयो, न हीदृशः सम्भवतीह वर्षे । अतस्त्वया सत्वरमेव मह्यं, समर्प्यतां तत्प्रतिमां विधाय ॥ २०४ ॥ सूर्यादिसंघाऽऽग्रहमेषिका सं–विलोक्य भाव्यश्च तदित्थमेव । मत्वेति देवी पृथिवीतलाऽधः, सञ्जायमानां प्रतिमामपूर्वाम् ॥ २०५ ॥ गोदुग्धसिक्तामयिकां तदैव, श्रीत्रैशलेयस्य जिनेश्वरस्य । निष्काश्य तस्मै वरसूरयेऽदा–दुवाच तं शासनदेवतैवम् ॥ २०६ ॥ ( युग्मम् ) उरस्यमुष्याः परिदृश्यते यो, ग्रन्थिर्विरूपो न हि जातुचित्सः । छेद्यो भवद्भिर्भ्रमतोऽपि यस्मा–च्चमत्कृतेयं प्रतिमा किलाऽस्ति ॥ २०७ ॥ अवध्यपूता बहिरागतत्वाद्, उरःस्थितो ग्रन्थिरसौ विरूपः । भविष्यतीयं भुवि सप्रभावा, व्याहृत्य सैवं सममूदहश्या ॥ २०८ ॥ रत्नप्रभाऽऽचार्यवरः किलैक–लग्ने प्रशस्ये युगपद्द्विरूपः । कोरण्टपुर्यामयमोशियायां, चक्रे प्रतिष्ठाममितप्रभावः ॥ २०९ ॥ कालं कियन्तं स हि शासनस्य, प्रद्योतनं भूरितरं विधाय । प्रान्ते च कृत्वाऽनशनं समाधि–ना यातवान् देवपतेर्नगर्याम् ॥२१०॥

( शार्दूलविक्रीडितम् )—चामुण्डा निजदत्तवाचि सततं स्थास्नुस्ततः सच्चिका–नाम्ना ख्यातिमुपागताऽखिलपुरे भक्ता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गुरोश्चाऽभवत् । अर्हद्धर्मपरायणा जनिमतां कल्याणकर्त्री सदा, सर्वोपद्रवनाशिनी पुरि जनानन्दप्रदात्री सुरी ॥ २११ ॥

( उपजातिः )—कदाचिदेतत्प्रतिबिम्बवक्षः–स्थलस्थितं ग्रन्थिमतिप्रमूढः । शस्त्रेण चिच्छेद विरूपकृत्त्वाद्, रक्तस्य धारा निरगच्छदस्मात् ॥ २१२ ॥ छेत्ताऽपि तत्रैव विमूर्च्छितः स–न्नवाङ्मुखो भूमितले पपात । आलोक्य तच्छ्राद्धजनाः समेत्य, श्रीयक्षदेवाऽभिधसूरिमूचुः ॥ २१३ ॥ रत्नप्रभाऽऽचार्य–महाप्रभाव–पट्टस्थितः सूरिवरः स ऊचे । श्राद्धा ! महाऽनिष्टकरं किलैत–ज्ज्ञातं समेषामिति वित्त सत्यम् ॥ २१४ ॥ भाव्यं भवत्येव न रुध्यते तत्, कदाऽपि काले महताऽपि पुंसा । अतस्तदर्थे न हि शोचनीयं, तच्छान्त्युपायं चरिकर्मि शीघ्रम् ॥ २१५ ॥ निगद्य तानित्थमयं तदैव, ध्यानस्थितः शासनदेवतां ताम् । आकार्य चाऽऽख्यद्भविके ! किलैकाऽ–नभिज्ञपुंसा तदकार्यनिष्टम् ॥ २१६ ॥ आकस्मिकाऽज्ञानकृतं तदीयं, मन्तुं क्षमित्वा झटिति प्रसीद । नो चेदनिष्टं महदेव नूनं, भविष्यतीहाऽत्र न संशयीथाः ॥ २१७ ॥ आकर्ण्य सूरीश्वरवाक्यमेतद्, देवी समूचे भगवंस्त्वदीयः । कुश्रावकोऽज्ञानतयाऽप्यसह्यं, मन्तुं प्रचक्रे भगवज्जिनस्य ॥ २१८ ॥ तेनौशवंशीयमहाजनानां, नामाऽपि न स्थास्यति पत्तनेऽस्मिन् । तयैवमुक्ते सति सूरिराजः, साऽस्ति प्ररुष्टेति विदाञ्चकार ॥ २१९ ॥ ततोऽनुकूलैर्मधुरैर्वचोभिः, प्रसाद्य देवीं तमुपद्रवं सः । प्राशीशमद्देवतया तयैव, रक्तप्रधारामपि तत्क्षणं हि ॥ २२० ॥ अजीवयच्छ्रावकमप्यसौ हि, कृतागसं मूढधियं कृपालुः । सम्पाद्य सर्वं सुमनास्ततोऽयं, स्वस्थानमागत्य सुखेन तस्थौ ॥ २२१ ॥ साधुद्वयेनैव पुरा महीयान्, रत्नप्रभाचार्य इह न्यवात्सीत् । वर्षर्तुकाले नगरे महिष्ठे, भविष्यदग्राऽधिकलाभहेतोः ॥ २२२ ॥

( भुजङ्गप्रयातम् )—शतं पञ्च तस्याऽवनौ भान्ति शिष्याः, समेषाञ्च तेषामिहाऽऽहारलब्धेः । अयोगः किलाऽऽसीदत-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ताननेक–प्रदेशे चतुर्मासमाकारयत्सः ॥ २२३ ॥ ( इन्द्रवज्रा )—अम्बाऽभिधाना किल शासनस्य, देवी प्रधाना वरिवर्ति याऽत्र । तस्याश्च वाचा बहुलाभमग्रे, जानन्नतिष्ठन्मुनिपुङ्गवः सः ॥ २२४ ॥ ( उपजातिः )—आहारदुष्प्राप्तिमवेक्ष्य तत्र, श्रुतोपयोगादथ जैनजातौ । कुलादिकस्थापनसत्प्रसङ्ग–मित्वा पुरीवासिजनानशेषान् ॥ २२५ ॥ गरिष्ठयत्नैः प्रतिबोध्य सूरि–र्लक्ष[३२३०००]त्रिक-त्रि-द्विसहस्रसंख्यान् । कृत्वा स्वकीयानथ गोत्रकाणि, तेषां तदाऽष्टादशधा न्ययुंक्त ॥ २२६ ॥ ( युग्मम् ) येषां बुभुत्सा ह्यधिकस्य तस्य, महाजनानां खलु सज्जनानाम् । ग्रन्थान्तराचैरतिविस्तृतैषा, कथाऽवगम्या सकला सुधीभिः ॥ २२७ ॥ अथौशियातो दिशि सूर्यसूनोः, षट्क्रोशदूरे तिवरी पुरी या । पुरश्चौशियायाः किल साऽपि तेली–वाडेति नाम्ना प्रथिता पुराऽस्ति ॥ २२८ ॥ कर्षच्च केदारमिहैव पुर्यां, भूमेरधः संस्थितमन्दिरस्य । कुम्भेऽवरुद्धे हल एत्य तूर्णं, मृदं खनित्वा कलशं ददर्श ॥ २२९ ॥ ततोऽप्यधः सोऽथ निखन्य रम्यं, स हालिकस्तच्छिखरं लुलोके । ततः स आगत्य जनानुवाच, तदद्भुतं वृत्तमतीव हृष्टः ॥ २३० ॥ श्राद्धास्तदाकर्ण्य समेत्य तत्र, ह्यामूलमुत्खान्य तदैव यत्नात् । तत्कृत्यदक्षैर्बहुकर्मकृद्भि–र्जिनेशचैत्यं तदखण्डितं हि ॥ २३१ ॥ ( इन्द्रवंशा )—निष्काशयामासुरतीव सुन्दरं, सद्दुर्गमास्थानिकमण्डपाऽन्वितम् । उद्घाट्य तद्द्वारमपूर्वमन्दिरे, पद्मासनस्था जिनमूर्तिरैक्षि तैः ॥ २३२ ॥ ( युग्मम् ) ततः सहर्षं सकलाश्च जैना, बिम्बार्चनं भक्तिभरेण चक्रुः । प्रभावनाऽऽद्यैर्महिमानमस्य, प्रवर्तयामासुरनेकदेशे ॥ २३३ ॥ तन्मन्दिरं चाऽहमपि स्वदृष्ट्या, सम्प्रेक्ष्य निःसीममुदं बभार । तीर्थेशमालोक्य बभूव सद्यः, कृती विपापः परमप्रहर्षः ॥ २३४ ॥ अद्याऽपि तन्मन्दिरमस्ति तत्र, पुराऽन्तिकस्थानविवर्तमानैः । चिह्नैरनेकैः पुर उक्तमानं, सत्यं तथैवाऽस्ति पुरा हि काले ॥ २३५ ॥ श्रीवर्धमानप्रभुमुख्यशिष्यः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगौतमस्वामिवरः पुरा हि । श्रीमालवंशं प्रतिबोध्य सर्वान्, संस्थापयामास यथा महीयान् ॥ २३६ ॥ प्रख्यातिमागात्पुरमेतकस्मा–च्छ्रीमालनाम्ना तत एव यस्मात् । धर्मिष्ठलोका धनधान्यपूर्णाः, सत्कीर्तिमन्तः सकलाः किलाऽऽसन् ॥ २३७ ॥ तथा प्रसिद्धः किल पौरवाल–वंशोऽप्यसौ पौरवकौलिकत्वात् । श्रीमालपुर्या रमणीयपूर्वो–द्याने स्थितत्वादिति च प्रसिद्धिः ॥ २३८ ॥ स्वयम्प्रभाचार्यवराऽऽदिका हि, तेषां समेषां प्रतिबोधकाराः । तथैव रत्नप्रभसूरिमुख्यः, सदोशवंशं समतिष्ठिपत्सः ॥ २३९ ॥ त्रिंशत्सहस्राऽधिकमेकलक्षं, कौटुम्बिकान् भव्यजनान् प्रबोध्य । स ओशवंशाऽधिकवृद्धिकर्ता, युगप्रधानो जिनदत्तसूरिः ॥ २४० ॥ आसीच्च दादाऽभिधया प्रसिद्धः, सर्वत्र लोकेऽतुलशक्तिशाली । सिताम्बराऽऽचार्यवरैरनेकैः, प्रबोधिता जैनजना लसन्ति ॥ २४१ ॥ प्रभावकाऽशेषसिताम्बरीयाऽऽ–चार्योपकर्त्र्या नगरोपकण्ठे । नगोपरिष्ठादतिशक्तिचामु–ण्डासच्चिकाया वरमन्दिरं हि ॥ २४२ ॥ पञ्चयष्टगोत्रीयमहाजनाना–मिष्टप्रदात्र्याः कुलदेवतायाः । दूराद्बहोर्दृश्यतरं सुरम्यं, चमत्कृताया अतितुङ्गमस्ति ॥ २४३ ॥ ( युग्मम् ) ग्रामस्य मध्यादथ पूर्वभागे, कुलेश्वरीमन्दिरमस्ति रम्यम् । तद्दक्षिणस्यां दिशि नाऽतिदूरे, शैलोपरि श्रीगुरुचैत्यमस्ति ॥ २४४ ॥ श्रीसच्चिकायाः कुलदेवतायाः, सुमन्दिरात्पश्चिमदिग्विभागे । ग्रामान्तिके श्रीजिनचैत्यमस्ति, प्राकारशालं तिलकायमानम् ॥ २४५ ॥ ततः प्रतीच्यां दिशि धर्मशाला, भूमित्रिका गुर्वितराऽतिरम्या । यात्राऽऽगतानामतिसौख्यदात्री, श्राद्धैः सुभव्यै रचिता विभाति ॥ २४६ ॥ गौरीतिथौ फाल्गुनशुक्लपक्षे, विलेशयस्याऽपि तिथौ जयन्त्याः । महोत्से(त्सवे) तत्र विधाय दर्शनं, तीर्थेशितुः प्रीतमना अभूवम् ॥२४७॥ आकर्ण्य वृत्तान्तमिदं स संघ, आमूलमाश्चर्यकरं समेषाम् । निश्शेषपापौघहरं जनानां, चतुर्विधोऽसीममुदं प्रपेदे ॥ २४८ ॥ मार्गेण येनाऽऽगतवान् स



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं, पथा च तेनैव विहृत्य तस्मात् । लोहावटाऽऽख्यं नगरं ससङ्घः, समाययौ श्रीजिनकीर्तिसूरिः ॥ २४९ ॥ चतुर्विधैः संघदलैः समेतं, सूरीश्वरं तत्पुरवासिसंघः । बेण्डाऽऽदिनानाविधवाद्यनादै–रानीतवान् सादरमात्मपुर्याम् ॥ २५० ॥ सोपाश्रयं प्राप्य सनीरमेघाऽऽ–रावाऽनुकारेण महास्वनेन । प्रारब्धवान् सद्गुरुरेष धर्मो–पदेशमानन्दकरं जनानाम् ॥ २५१ ॥ तत्राऽसकौ शील-तपः प्रदान–सद्भावभेदाच्चतुरश्च धर्मान् । अदर्शयत्सज्जनसभ्यवृन्दं, विस्तारपूर्वं सदसि प्रकामम् ॥ २५२ ॥

(भुजङ्गप्रयातम्)––विशेषप्रभावं ह्यपूर्वोपदेशं, निशम्याऽतिहृष्टाः प्ररोमाञ्चिताऽङ्गाः । नरा नारिकाद्याः समस्तास्ततश्च, स्वकीयं स्वकीयं गृहं तेऽधिजग्मुः ॥ २५३ ॥ स्वस्वाऽवतारस्थलमागुरेवं, संघीयलोका अपि चाऽऽद्यघस्रे । इत्थं द्वितीये दिवसे तृतीये, विश्रम्य तस्माद्विजहार संघः ॥२५४॥ (उपजातिः)—तदाऽयमाचार्यवरो यियासुं, समस्तसंघं फलवर्द्धिपुर्याम् । प्रैषीन्मुनिश्रीसुखसागराऽऽदीन्, सहाऽमुना तत्र निनीषया हि ॥ २५५ ॥ अन्त्यं विधिं तेन तदैव सर्वं, स कारयित्वा विससर्ज संघम् । स्वयं परावृत्य ततः सशिष्यो, लोहावटं पत्तनमाजगाम ॥ २५६ ॥ पूर्वीयभागे पुरि तत्र जाटा–वासाऽभिधाने स हि मासमेकम् । स्थित्वा पुनस्तद्दिसनोयिवासे, सुखेन मासं गमयाञ्चकार ॥ २५७ ॥ कृत्वा विहारं पुनरेत्य जाटा–वासे स तस्थौ जिनकीर्तिसूरिः । तिथिप्रमाणानि दिनानि वाऽत्र, नखप्रमाणानि सुवासराणि ॥ २५८ ॥

(तोटकम्)—फलवर्द्धिपुरीमधिगन्तुमसौ, सकलैः सुविनीत-विनेयगणैः । सहितः सुविहृत्य ततो मुनिराट्, चिखलाऽभिधपत्तनमागतवान् ॥ २५९ ॥ (उपजातिः)—एकां निशामेष समध्यवात्सीत्, प्रातर्विहारावसरे समेताः । लोहावटश्रीफलवर्द्धिपूर्य्यौ, ववन्दिरे श्राद्धजना गुरूणाम् ॥२६०॥ गुरून्नमस्कृत्य पुरद्वयीस्थाः, स्वं स्वं पुरं प्रत्यगमंस्तदैव । स ओशियायां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्यवसच्च यर्हि, लोहावटाऽऽख्ये वरपत्तनेऽपि ॥ २६१ ॥ वैदेशिकाश्चाऽन्यपुरीयलोका–स्तद्यागमन् भूरितरा गुरूणाम् । संव-न्दना–दर्शनदेशनानां, प्रलिप्सया प्रत्यहमार्हता हि ॥२६२॥ पुनर्यदाऽऽचार्यवरश्चतुर्धा–संघैः समेतः फलवर्द्धिसीम्नि । उपेयिवांस्तर्हि फलोधिवासी, चतुर्विधः संघ इयाय तत्र ॥ २६३ ॥ भक्त्या गुरूणामभिवन्दनाऽऽदि, कृत्वा सहर्षं बहुचारुभिस्ते । महोत्सवैः सज्जितसत्पुरं तान्, प्रावेशयन्मानपुरस्सरं हि ॥ २६४ ॥ उपाश्रयं सोऽथ समेत्य धीमान्, प्रधानपट्टोपरि संनिषद्य । श्रीअर्हदादिस्तुतिरूपमङ्गलीं, सद्देशनां मङ्गलहेतवेऽदात् ॥ २६५ ॥ ततोऽतिभक्त्या सुभगाः सुरूपाः, सुश्राविका मङ्गलगीतमुच्चैः । पैकाऽनुकाराऽधिकमिष्टकण्ठै–र्जगुः प्रमोदाच्छरदिन्दुमुख्यः ॥ २६६ ॥ पश्चाद्यथाशक्ति जनाः कियन्तः, श्रद्धां भजन्तः सुगुरौ च देवे । श्राद्धाऽऽदिका भक्तिभरेण प्रत्याऽऽ-ख्यानं समादाय ययुः स्ववेश्म ॥ २६७ ॥ व्याख्यानमेवं कियतश्च घस्रान्, सामान्यतस्तत्र स सूरिराजः । ददान आसीत्तत आगते हि, सर्वानुकूले दिवसे प्रशस्ये ॥ २६८ ॥ प्रारब्धवानत्र स पञ्चमाऽङ्ग–व्याख्याऽपराऽऽख्यं बहुबोधदायि । प्रज्ञप्तिसूत्रं हरिविक्रमस्य, चरित्रमप्येष सहैव तेन ॥ २६९ ॥ ( युग्मम् ) तस्मिन् प्रवृत्ते प्रतिवासरं हि, व्याख्यानकाले समुपस्थितानाम् । संख्या जनानां शशिनः कलेव, प्रावर्द्धधीत्तच्छ्रुतिभक्तिभाजाम् ॥ २७० ॥ प्रावर्तताऽशेषगृहेषु तत्राऽऽ–चाम्लाऽभिधानं परमं तपश्च । कृत्वा निशाजागरणं प्रभाते, सद्वादशाऽऽतोद्य–निनादपूर्वम् ॥ २७१ ॥ अविभ्रमंश्चारुमहोत्सवैस्ते, रथस्थितश्रीजिनराजमूर्तिम् । दिव्याङ्गनामूर्द्धनि सन्निधाय, प्रज्ञप्तिसूत्रं च पुरे समग्रे ॥ २७२ ॥ नित्यं जिनाऽर्चाऽक्रियताऽत्र भक्त्या, नानाप्रकारी(रा) परमोत्सवैस्तैः । प्रभावना शश्वदपूर्ववस्तु–नाऽऽयातसंघाऽशनपानकाऽऽदि ॥२७३॥ नानाप्रदेशान्नगरादनेकात्, समाययुः श्राद्धगणाः सहैव । सुश्राविकाभिर्गुरु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वन्दनायै, व्याख्यानलाभार्थमपीह नित्यम् ॥ २७४ ॥ न ह्येकमप्यत्र दिनं ह्यगच्छत्, यस्मिन् विदेशादिह केऽपि नाऽऽगुः । श्रीमद्गुरोर्दर्शनवन्दनाऽऽदि-विधित्सया श्राद्धजना महेभ्याः ॥२७५॥ आषाढशुक्लीयचतुर्दशीतः, रामाऽब्धिसंख्यानि दिनानि यावत् । स्वाध्यायधर्माऽऽदिकमाततान, वेदाष्ट-नन्देन्दुमितेप्रवर्षे ॥२७६॥ अष्टाऽह्निकं पर्युषणं ततोऽयं, समस्तसंघेन चतुर्विधेन । सार्धं समाराधितवान् महीयान्, प्रमादमुक्तः परमोत्सवेन ॥ २७७ ॥ ( शार्दूलविक्रीडितम् )—पञ्चाशत्तमवासरे गुरुवरः सम्वत्सरीयप्रति-क्रामं संघयुतो विधाय विधिवत्क्षान्त्वा समैः क्षामयन् । जीवैर्वत्सरजातमन्तुमखिलं ज्ञातं तथाऽज्ञातकं, चैत्यादेरभिवन्दनं समकरोच्छ्रीमान् महान् सूरिराट् ॥२७८॥ (इन्द्रवज्रा)—अथाऽऽश्विने शुक्लदले किलेषुः(लैयुः), सुश्राविकाः श्राद्धगणाश्च तत्र । विराजमाने गुरुराजवर्ये, कर्तुं तपस्ते ह्युपधाननाम ॥ २७९ ॥ ( भुजङ्गप्रयातम् )—ततः सूरिराजो महालाभकार्यं, विदित्वा किलैतद्धृदि स्फारबुद्धिः । प्रशस्ते मुहूर्त्ते सुखेटाऽनुकूले, तदारम्भयच्छ्रावकश्राविकाभिः ॥ २८० ॥

( उपजातिः )—आसंस्तदाराधकपुंस्त्रियश्च, शतं किलाऽष्टोत्तरमार्हतास्ते । ग्रामान्तरीयाः पुरवासिनश्च, समारराधुर्विधिवन्मिलित्वा ॥ २८१ ॥ जातं किलैतच्छर-तर्कघस्र-मात्रं महाऽऽडम्बरतः प्रशस्यम् । निर्विघ्नमेतद्गुरुराजपाद-सरोजयुग्माऽनुपमप्रभावात् ॥ २८२ ॥ सद्दीपमालोदितपर्वसौभा-ग्यपञ्ची(श्चमी)पर्वमहोत्सवैस्ते । एवं चतुर्माससमाप्तिपर्व, ह्याराधयामासुरशेषलोकाः ॥ २८३ ॥ प्रख्यात-मौनाऽभिधभूरिपुण्य-दैकादशीपर्व जनाः सहर्षम् । पौषे च मासे दशमीसुपर्व, ह्याराध्य सर्वे मुदिता बभूवुः ॥ २८४ ॥ ततः स्रगारोपणचार्वपूर्वः, समुत्सवोऽजायत तत्र पुर्याम् । तत्राद्यऽऽरात्रावजनिष्ट जाग-रणं समेषां महता महेन ॥ २८५ ॥ दिने द्वितीये रथवेदिकाऽऽदि-यात्रा विशिष्टा समभूदपूर्वा । स्थाले विशाले विनिधाय माला, अने-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कवर्णा रुचिरप्रभासः ॥ २८६ ॥ अनेकतत्स्थालमुपस्कृतास्ता–श्रीनांशुकाऽशेषविभूषणाऽद्यैः । मौलौ दधानाः सधवाः सुवर्णा, मन्दं व्रजन्त्यः सुषमामगच्छन् ॥ २८७ ॥ मिष्टस्वरैर्धवलमङ्गलगीतमुच्चै-र्गायन्त्य उज्ज्वलतरच्छविभासमानाः। चेतोहरं श्रवण-तर्पणकारि पुंसां, चेलुः सुधांशुवदनाः पुरतः कियत्यः ॥ २८८ ॥ बेण्डाऽऽदिकाऽर्कप्रमितप्रवाद्य–नादोत्थबाधिर्यमुपान-यन्ती । दिशः समस्ता जनता प्रमाण–वर्या चचालाऽत्र महोत्सवे हि ॥ २८९ ॥ पुर्याश्च मध्यस्थितराजमार्गै–र्बम्भ्रम्य-माणा दिशि दक्षिणस्याम् । ग्रामाद्बहिर्दीर्घतटाकपालो–पर्येत्य तस्थौ रथवेदिकाऽऽदि ॥ २९० ॥

(शालिनी)—श्रीमद्गोडीपार्श्वनाथप्रभूणां, रम्यं चैत्यं गौरवं मन्दिरञ्च । विभ्राजेते यत्र तत्र प्रदेशे, शान्तिस्नात्रं पूजनं सम्बभूव ॥ २९१ ॥ (उपजातिः)—निवृत्य सर्वा जनता ततश्च, समागतोपाश्रयमत्र सूरिः । मालासमारोपणसर्वकृत्यं, तैः कारयित्वा शुभकृन्मुहूर्त्ते ॥ २९२ ॥ ताः सूरिमन्त्रेण च मन्त्रयित्वा, प्रक्षिप्य वासं शिरसि प्रकामम् । सपत्निकानां प्रथमं च पुंसां, ततः कुमारीसधवाङ्गनानाम् ॥ २९३ ॥ अनूढपुंसामथ निर्धवाना–माचार्यवर्यैः क्रमतः समेषाम् । आरोप-यामास विशेषमाला, गुहस्य तिथ्यामसिते च पौषे ॥ २९४ ॥ (त्रिभिर्विशेषकम्) ततश्च ते श्रीगुरुदेवमेनं, प्रणम्य चाऽऽदेश-ममुष्य लात्वा । जिनाऽधिनाथप्रविलोकनाय, चैत्यं ययुर्वाद्यनिनादपूर्वम् ॥ २९५ ॥ यावन्त आगुर्नगरान्तरीयाः, सम्बन्धिनः सद्मसु यस्य यस्य । सर्वोऽपि तांस्तान् निजशक्तियोग्य–वस्त्राऽऽदिदानैः समतोषयच्च ॥ २९६ ॥ सुस्वामिवात्सल्यमथो जिने-न्द्र–पूजां गरिष्ठां व्यदधुः प्रभक्त्या । प्रभावनां श्रीफलशर्कराऽऽदि–सद्वस्तुभिर्जीवदयां च तेनुः ॥ २९७ ॥

(मालिनी)—समवसरणमेकं चर्कराञ्चक्रुरेते, सकलसुजनचित्ताऽऽकर्षि लोकप्रशस्यम् । वसुदिनमिह यावत्पूजनं नैक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेदं, प्रतिदिवसमकार्षुर्वीतरागस्य सर्वे ॥ २९८ ॥ निशि च विदधिरे ते भावनां शर्मदात्रीं, तनुरचनमपूर्वं दर्शकाऽऽनन्ददायि । जिनवरविभुमूर्ते रम्यनीराजनाऽऽदि, प्रथितसकलवादित्राणि सन्नादयन्तः ॥ २९९ ॥

( उपजातिः )—चक्रुस्ततस्ते रमणीयवारि–यात्रामपूर्वां रथवेदिकाऽऽदि । चचाल तस्यामतिसज्जितं हि, जिनेन्द्रमूर्तिप्रविराजमानम् ॥३००॥ बेण्डाऽऽदिवादित्रगणेषु तस्यां, नानद्यमानेषु विलासिनीनाम् । यूथेषु गायत्सु तुरङ्गमेषु, चलत्सु नेपथ्यविभूषितेषु, ॥ ३०१ ॥ इत्थं महाऽऽडम्बरतश्चलित्वा, ग्रामाद्बहिर्दीर्घितटाकतीरम् । आगत्य गङ्गाऽऽदिकतीर्थमष्टो–त्तरं शतं तत्र विशेषमन्त्रैः ॥ ३०२ ॥ आवाह्य तावत्कलशांस्तदीय–जलेन भृत्वा प्रविधाय तत्र । स्नात्रार्चनं तीर्थजलेन भूयो भृतांश्च कुम्भान् सधवाङ्गनानाम् ॥ ३०३ ॥ कुमारिकाणां च शिरःसु धृत्वा, निवर्तमाना मुदिताश्च सर्वे । प्रागुक्तवाद्याऽऽदिमहामहेन, स्नात्रस्थले तत्र सुखेन चाऽऽगुः ॥३०४॥ ( चतुर्भिः कलापकम् ) (मालिनी)—समवसरणमाप्ताः कुम्भकान् वारिपूर्णा–न्छुचिभुवि विनिधायैकान्तदेशे स्त्रियस्ताः । तदनु सकललोकाश्चाऽऽददुः सत्प्रभाव–नमथ गृहमगुस्ते मोदमानाः समस्ताः ॥ ३०५ ॥

( उपजातिः )—दिनेऽग्रिमे तीर्थजलेन तेन, स्नात्रप्रपूजा महती बभूव । सायन्तनं भोजनमप्यपूर्वं, साधर्मिकाणामभवत्समेषाम् ॥३०६॥ ( वंशस्थ )—प्रभावनाऽशेष(नां सर्व)जनेभ्य आदरात् , प्रदत्तवानिभ्यगणो विशेषतः। बभूव चेत्थं ह्युपधानसत्तपो–महोत्सवस्तत्र सुचारुरुज्ज्वलः ॥ ३०७ ॥ ( उपजातिः )—अथाऽसकौ विंशतिवासराणि, स्थित्वा तपोमेचकधावृतिध्याम् । संघैश्चतुर्भिः सह सूरिराज–श्चक्रे विहारं फलवर्द्धिपुर्याः ॥ ३०८ ॥ आगात् खिचन्दाऽभिधपत्तनं स, सुसत्कृतः पौरजनैरशेषैः । सद्देशनाभिः सकलान् प्रतर्प्य, प्रगे व्यहार्षीत्तत एष सूरिः ॥ ३०९ ॥ ऐद्वोलियाऽऽख्यं नगरं ततोऽसौ, वाद्याऽऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिचारूत्सवतः प्रविश्य । महोपदेशैः प्रतिबोध्य भव्यान्, प्रभातकाले व्यहरत्ततोऽयम् ॥ ३१० ॥ श्रीदेशनोकं पुरमेष सूरिः,
पुरीजनाऽऽरब्धमहोत्सवेन । पुरं प्रविष्टः सकलानतर्पीत्, सुधोपमाभिर्निजदेशनाभिः ॥ ३११ ॥ तृतीयघस्रे समुपेयिवान् स,
आऊपुरं भूरिसुशिष्यजुष्टः । तत्पौरलोका महतोत्सवेन, प्रावेशयंस्तं पुरमादरेण ॥ ३१२ ॥ जिनेशमालोक्य मुदाऽसकौ हि,
प्रबोधयन् भव्यजनान्महीयान् । द्वित्रीं(त्रां)श्च घस्राञ्जनताऽऽगृहीतो, व्यश्राम्यदस्मिन्नगरे सशिष्यः ॥३१३॥ ततो विहृत्याऽऽग-
मदेष जेग–लाख्यं पुरं तत्र जना अपूर्वम् । चक्रुः प्रवेशोत्सवमस्य सूरेः, सोऽपि प्रबोधं ददिवानथैषाम् ॥ ३१४ ॥ यः
पाँचु-धोरानगरान्तराले, ठाणीत्युपाख्यो जनतानिवासः । तमध्यतिष्ठद्दिनमेकमेष, आगात्ततः पाँचुपुरं सशिष्यः ॥ ३१५ ॥
अनेकवादित्रनिनादपूर्वं, पुरान्तराविश्य गरिष्ठसूरिः । सचैत्यमागत्य जिनं विलोक्य, लोकाननुपादिश्य ततो विजह्रे ॥ ३१६ ॥
अथाऽऽगमत्तत् किसनासरं स, पौरास्तमर्च्यं परमोत्सवेन । प्रावेशयन् सूरिवरस्ततोऽत्र, विशुद्धधर्मं समुपादिदेश ॥ ३१७ ॥
आयातवान् देसलयुक्सरं स, कुर्वन् विहारं सह सर्वशिष्यैः । समुत्सवैः पौरकृतैरपूर्वैः, प्रविश्य तत्रोपदिदेश सूरिः ॥ ३१८ ॥
विहारमार्गस्थितदेशणोक–पुरं समासादितवांस्ततोऽयम् । अत्र स्थिता विक्रमपत्तनेश-कुलप्रपूज्या प्रथिता च कर्णी ॥ ३१९ ॥
तत्रत्यसंघो गुरुराजमेतं, वाद्याऽऽदिभिश्चारुमहोत्सवं हि । वितत्य गत्वाऽभिमुखं सहर्षं, आनेष्ट पुर्यां सह भूरिलोकैः ॥ ३२० ॥
सूरीश्वरोऽप्यत्र जिनेश्वरस्य, विलोकनं भक्तिभरेण कृत्वा । प्रारब्धवांश्चारुमहोपदेशं, स्वधर्मदार्ढ्याऽधिकवृद्धिकारम् ॥ ३२१ ॥
अत्राऽऽगता विक्र(म)पत्तनीयाः, श्राद्धा गरिष्ठा गुरुवन्दनाय । इतो विहृत्याऽखिललोकवन्द्य, उद्रामपूर्वं सरमाजगाम ॥३२२॥
सहर्षमेतत्पुरवासिनोऽपि, बेण्डाऽऽदिभिस्तं पुरमानयन्त । महाऽऽसनाऽऽसीन उपादिशत्स, धर्मं चतुर्धा जिनकीर्तिसूरिः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३२३ ॥ विहृत्य तस्मादयमाजगाम, भिन्नासराऽऽख्यं नगरं प्रसिद्धम् । पुरप्रवेशाय गुरोरमुष्य, चारूत्सवं चक्रुरिहस्थलोकाः ॥ ३२४ ॥ इत्थं प्रविष्टः पुरमेष सूरि-र्भवाऽऽमयोन्मूलनरामबाणम् । अमोघभैषज्यमहोपदेशं, ददौ सभायां महता स्वरेण ॥ ३२५ ॥ गङ्गासहेराऽऽदिकपत्तनानि, गत्वा सुचैत्यं गुरुमन्दिरं च । विलोकयञ्छ्रीप्रभुरेलदादा–जीत्याख्यमैक्षिष्ट गरिष्ठ-भक्त्या ॥ ३२६ ॥ अथाऽऽगमद्विक्रमपत्तनं स, सच्छिष्यवृन्दश्रितपादपद्मः । स्वीयाऽन्यदीयाऽखिलशास्त्र-सिन्धु-पारीण आनन्दघनो बुभूषुः ॥ ३२७ ॥ श्रीपूज्य आसीत्स हि कालिकाता–पुर्यां तदानीं तत एव पत्रम् । लिलेख विस्पष्टतया यतीना–मिहस्थितानां बहुमानपूर्वम् ॥ ३२८ ॥ अहं हि मुम्बापुरि सर्वसंघै–र्यस्मा अदां सूरिपदं वराय । ससूरिमन्त्रं विधिवत्सुविद्व–त्तमाय शान्त्यादिगुणाऽऽकराय ॥ ३२९ ॥ आचार्यपट्टे समतिष्ठिपच्च, स सूरिवर्यो जिनकीर्तिसूरिः । ऐता स्वकीयाऽखिलशिष्यवर्गैः, तत्पत्तने शीघ्रमतो लिखामि ॥ ३३० ॥ ( युग्मम् ) यदेतकस्याऽभिमुखं व्रजित्वा, सर्वोपकृत्या स हि वन्दनीयः । तदानुकूल्ये सततं भवद्भिः, स्थेयं समस्तैर्निजशिष्यवद्भि ॥ ३३१ ॥ महीयसश्चाऽस्य विशेषसेवाऽ–वश्यं विधेया मनसा च वाचा । कायेन चाऽस्त्येष यतो गरीयान्, कस्याऽपि हान्या न हि तस्य भाव्यम् ॥ ३३२ ॥ एतन्मदुक्तं हृदये निधाय, तदीयभक्तौ यतितव्यमेव । चातुर्यशीलाः सकला भवन्तः, परेङ्गितज्ञा निपुणा हि सन्ति ॥ ३३३ ॥ श्रीसंघमप्येष विलिख्य पत्रं, प्रागेव सर्वं समबोधयच्च । यदेष गच्छाऽधिपतिः समस्त–जैनाऽऽगमाऽऽदेरतुलप्रविद्वान् ॥ ३३४ ॥ बहुश्रुतो वृद्धपुमांश्च गच्छे, मुक्तः कषायाऽऽदिकदोषजातैः । समस्तसूरिव्रजमौलिरत्ना–यितस्त्रिगुप्तः परिषेवणीयः ॥३३५॥ ईदृग्गुरुर्भाग्यवशादुपैति, धियेति सर्वे करणत्रयेण । सेवध्वमेतं सततं तदीय–मनोऽनुकूला भवताऽतिमात्रम् ॥ ३३६ ॥ ईदृक्-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुपत्रं परिवाच्य संघ–श्चारित्रसूरेर्जिनपूर्वकस्य । अजर्हषीद्भक्तिभरं च तस्मिन्, बिभ्रच्चतुर्धा मुनिराजवर्ये ॥ ३३७ ॥ सूरीश्वरो यर्हि पुरोपकण्ठं, समागमत्तर्हि समस्तसंघः । श्रीपूज्यपत्राऽधिकसम्प्रणुन्न–श्चतुर्विधस्तद्यतिमण्डली च ॥ ३३८ ॥ सौवर्णयष्टि-ध्वज-शङ्ख-बेण्ड–भेर्यानकाऽऽद्युष्णमयूखमात्रैः । वाद्यैरनेकैः प्रविभूषिताऽश्वैः, प्रत्यागमं ते व्यदधुर्गुरूणाम् ॥ ३३९ ॥ यथाविधानं सकलोऽपि संघो, विधाय तद्वन्दनमादरेण । सहैव तं श्रीगुरुराजवर्यं, प्रावीविशद् विक्रमपत्तनान्तः ॥ ३४० ॥ दैर्घ्यं च तस्या वरिवर्ति पुर्याः, क्रोशत्रयांऽशद्वयसं महत्याः । तावत्प्रमाणा परिणाहताऽस्याः, सद्राजधान्याः सुषमामितायाः ॥ ३४१ ॥ भिन्नासरेशानदिशिस्थनूत्न–भूपालवासाद्गणने तु सा पूः । गव्यूतिकाऽऽयामवती लसन्ती, विशालतां क्रोशमितां विधत्ते ॥३४२॥ नाम्ना सुहल्लेतिविभक्तिरत्र, जिनेशचैत्यानि महान्ति चाऽष्टौ । शरत्रिदंॅंग्नानि च मन्दिराणि, सर्वाणि जैनानि लसन्ति तत्र ॥३४३ । सोपाश्रया जैनिकधर्मशालाः, प्रायेण पञ्चाशदिहाऽऽविभान्ति । वसन्ति लोकाः सकला द्विलक्षं, सर्वे धनाऽऽढ्या निजधर्मरक्ताः ॥ ३४४ ॥ तस्यां चतुर्दिक्षु महान्ति सन्ति, निर्वाणधामानि महागुरूणाम् । प्राच्यां दिशि श्रीजिनदत्तसूरे–र्युगप्रधानस्य महीयसस्तत् ॥ ३४५ ॥ तत्पत्तनं हर्षपुराऽभिधानं, वापीसुकूपोपवनाऽभिरामम् । सद्भिर्गृहस्थैरतिशोभमानं, सद्धर्मकर्माऽऽरतमानवाऽऽढ्यम् ॥ ३४६ ॥ अकब्बराऽऽख्यक्षितिपालकस्य, प्रबोधकश्रीजिनचन्द्रसूरेः । निर्वाणभूमिर्दिशि दक्षिणस्यां, वेनाटताख्ये नगरेऽस्ति रम्यम् (म्या) ॥ ३४७ ॥ दिशि प्रतीच्यां वरिवर्ति तस्य, श्रीमज्जिनाऽऽदेः कुशलस्य सूरेः । देराउराऽऽख्ये नगरे विशालं, निर्वाणधामाऽधिकशोभमानम् ॥ ३४८ ॥ भालस्थलस्थापितरत्नशालि–प्रख्यातिमच्छ्रीजिनचन्द्रसूरेः । कौबेरिकायां दिशि वर्तमानं, दिल्लीपुरे राजति धाम तद्धि ॥ ३४९ ॥ यथा चतुर्दिक्षु चतुर्दिगीश–विमान-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कानि प्रविभान्ति तद्वत् । पुर्याश्चतुर्दिक्षु महत्तराणि, निर्वाणसद्मान्यतुलानि भान्ति ॥ ३५० ॥ बाभेति यद्वद्गजदन्तसंज्ञै- र्नगैश्चतुर्भिः कनकाचलः सः । तथा पुरीयं गुरुवर्यमुक्ति-स्थानैश्चतुर्भिः सततं विभाति ॥ ३५१ ॥ सर्वे धनाऽऽढ्या निवसन्ति तत्र, कोटिध्वजाश्चेभ्यवरा अनेके । ततोऽधिकाः श्रेष्ठिवराः कियन्तो, न्यूनाश्च लक्षान्न हि केऽपि जैनाः ॥ ३५२ ॥ अनेकविद्यालयमत्र भौपं, जैनीयकं चाऽपि विशालमस्ति । कन्यासुशिक्षाभवनं च नैकं, सद्वेदशाला महती च राज्ञः ॥३५३॥ सल्लेखशालाऽऽङ्गलपाठशालाः, सदौषधस्थानमनेकशो हि । स्त्रीणां चिकित्साभवनं विशालं, सद्राजकीयं पृथगस्ति तत्र ॥३५४॥

( शार्दूलविक्रीडितम् )—आयुर्वैदिकभेषजालयमिहाऽनेकं वरीवृत्यते, वापी–कूप–तडाग-हारि-विविधाऽऽरामाः सरस्यस्तथा । उद्यानं बहुलं नृपस्य महतामिभ्याऽऽदिकानामपि, स्वर्वेश्या इव भान्ति तत्र गणिकाश्चन्द्राऽऽनना भूरिशः ॥ ३५५ ॥ विद्वांसो बहुशो वसन्ति जगति प्रख्यातकीर्तिव्रजा, विप्रा वैदिककर्मठा बुधवरा नित्यं स्वधर्मे रताः । जात्याश्वा अमिता मदान्धकरिणः क्षोणीपतिर्धार्मिको, नीतिज्ञा वरमन्त्रिणो विजयिनी सेना यशस्कारिणी ॥ ३५६ ॥ सच्छीलाः कुलजाऽङ्गनाः सुनयनाः पूर्णेन्दुबिम्बाऽऽनना, नाऽनीतिर्न च दुष्कृतं न च भयं चौराऽऽदिजं कर्हिचित् । प्राकारेण सुदुर्गमा सुरपुरीं जाहस्यमानाऽधिका, नानाभौमिकतुङ्गसौधपटली लेलिह्यते चाऽम्बरम् ॥ ३५७ ॥ ( उपजातिः )—बृहल्लघुद्वारमपूर्वमस्या–श्चतुष्पथाऽऽदिर्विपुलो ह्यनेकः । सद्राजमार्गो विपणिः प्रदृश्या, महाऽऽपणाऽऽली बहुधा विभाति ॥ ३५८ ॥ घण्टापथोऽप्यत्र विशेषरम्यः, सर्वत्र पुर्यामतिविस्तृतश्च । रथ्या बृहत्याः परिशोभमानाः, सौगन्धिकादेर्विपणिश्च तासु ॥ ३५९ ॥ राठोरवंशं समलङ्करिष्णुः, श्रीमान्महीयान् गुणवान् नयज्ञः । शार्दूलसिंहो वसुधाधवोऽस्ति, सर्वाः प्रजाः पाति पितेव नित्यम् ॥ ३६० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तद्यौवराज्यं भजते महौजा, विपक्षकक्षौघतनूनपात्सः । गङ्गाहरिः सद्गुणताऽभिरामः, संग्रामजेता हनुमानिवाऽत्र ॥ ३६१ ॥ इत्थं महाऽऽडम्बरतः प्रवेशं, कुर्वन् महीयान् जिनकीर्तिसूरिः । तस्मिन् पुरे विक्रमपूर्वके हि, स्त्रीपुंसवृन्दैरभिवन्द्यमानः ॥ ३६२ ॥ शोभां पुरस्याऽधिकसज्जितस्य, सत्तोरणाऽऽद्यैः परिवीक्षमाणः । महाऽऽपणाऽऽसन्नगतोऽतिभक्त्या, पोपूज्यमानः सुचिरं गृहस्थैः ॥ ३६३ ॥ जिनेशचैत्यान्यवलोकमानः, स राँघणीत्याख्यचतुष्पथेन । नाहाटगूवाडमुहल्लिकायां, क्रमाद्गतः श्रीऋषभस्य चैत्ये ॥ ३६४ ॥ ( त्रिभिर्विशेषकम् ) युगाऽऽदिनाथं प्रविलोक्य भक्त्या, स्तुत्वा तमागाद्बहिरेष यावत् । तावच्च सुश्रावकदानमल्ल–स्तत्र स्थितः शङ्करदानजिच्च ॥ ३६५ ॥ जजल्पतुस्तं भगवन् ! किलेदं, भव्यं विशालं भवनं मदीयम् । भवादृशां पावनपत्कजाना–मावासयोग्यं कृपया पुनीहि ॥ ३६६ ॥ ( युग्मम् ) सच्छिष्यवृन्दैः सह पार्श्ववर्ति–न्यस्मिन् निवासं गुरुवर्य ! नूनम् । कुरुष्व संसारसमुद्रतारिन् ! पवित्रय त्वं तदवश्यमेव ॥ ३६७ ॥ ( शालिनी )—ताभ्यामेवं प्रार्थ्यमानोऽसकौ हि, तस्मिन्नेवाऽगार आवासमीड्यः । शिष्यैः सर्वैः सार्धमाकृत्य पश्चात्, प्रोच्चैः पट्टे सन्निषण्णो महिषुः (मुनीशः) ॥ ३६८ ॥

( उपजातिः )—उपस्थितं तत्र चतुर्विधं श्री–संघं पयोदध्वनिजित्सुवाचा । प्रारब्धवान्मङ्गलदेशनां स, महाविशाले रमणीयसौधे ॥ ३६९ ॥ ( मन्दाक्रान्ता )—अर्हत्सिद्ध-प्रवचनमथाऽऽचार्यवर्य–प्रवृद्धो–पाध्यायांस्तानखिलमुमुनीन् ज्ञान–दृक्–सद्विनीतीः । चारित्रं चाऽतुलबलकरं ब्रह्मचर्यं क्रियां च, व्यावर्ण्यैष प्रथितविदुषामग्रणीः सूरिराजः ॥ ३७० ॥

( आर्या )—तपो गौतम–जिन–चारि–त्रं ज्ञानं ह्यपूर्वश्रुतं तीर्थम् । इति विंशतिपदकानां, स्वरूपाऽऽदीन् वर्णयामास ॥ ३७१ ॥ ( युग्मम् ) ( शार्दूलविक्रीडितम् )—सूरेरास्यसुधामयूख-विगलद्धर्मोपदेशामृतम्, पायम्पायमशेषसभ्यनिवहा मोमु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यमाना गुरोः । व्याख्यानाऽतिमहत्त्वमादरभराः पुंस्त्रीजनास्तुष्टुवु–र्लात्वा श्रीफलसत्प्रभावनममी स्वं स्वं गृहं पेदिरे ॥ ३७२ ॥

(उपजातिः)—कियद्दिनान्यत्र जनानशेषान्, नानोपदेशैः प्रतिबोधयन्सः । आसीत्ततः पश्चिमदिग्विभागे, गव्यूतियुग्मात्परमस्ति नालम् ॥३७३॥ तत्सीम्नि वर्वर्ति तलाइकैका, महत्तरा तां निकषा च रम्यम्। दादाजितः श्रीजिनदत्तसूरेः, स्थानं, विचकास्ति दृश्यम् ॥ ३७४ ॥ महाप्रभावं परितोऽस्ति तच्च, प्राकारशोभां दधदद्वितीयम् । चैत्यद्वयं तत्र विलालसीति, मध्ये जिनादेः कुशलस्य सूरेः ॥३७५॥ दादाजितश्चाऽस्ति विशालचैत्यं, तदग्र्य–पृष्ठ्योभयभागदेशे। यात्रार्थत(म)त्राऽऽगतवासहेतो–र्गृहाणि नैकानि महान्ति सन्ति ॥३७६॥ निर्मातृनामाऽङ्कितभव्य–धर्म–शालाऽप्यनेका रचिताऽस्ति तत्र । इतोऽन्यदप्यस्ति विशेषदृश्यं, स्थाने च तस्मिन्नति पावके हि ॥ ३७७ ॥ अतो ह्यसौ सूरिवरो विहृत्य, यात्रार्थमत्राऽऽगतवांश्चतुर्भिः । संघैश्च सत्रा महतोत्सवेन, द्वित्रांश्च घस्रानिह तस्थिवान् सः ॥ ३७८ ॥ विधाय यात्रां पुनरेष विक्र–मादिं पुरं प्रापदशेषसंघैः । पुनस्तपस्ये समुपाजगाम, दर्शे तिथौ नालपुरं सुखेन ॥ ३७९ ॥ स्थित्वा त्र्यहं सोऽत्र सुखेन पश्चात्, समाययौ विक्रमपत्तनं सः । कियद्दिनानन्तरमेष रेल–दादाजिसन्दर्शनकर्तुकामः ॥ ३८० ॥ आगाच्च गङ्गासहरं सशिष्योऽ–सौ मासकल्पं विधिवद् व्यधत्त । भव्यांश्च सम्यक् प्रतिबोध्य तत्र, भिन्नासरं चाऽऽगतवान् विहृत्य ॥ ३८१ ॥ (युग्मम्) लोकाः ससत्कारममुं प्रहृष्टाः, प्रवेशयामासुरतुच्छभक्त्या । द्व्यहं त्र्यहं वा प्रतिबोध्य लोकान्, उद्रामपूर्वं सरमाससाद ॥ ३८२ ॥ दादाविभुं प्रैक्षत तत्र मास–कल्पं च कृत्वा व्यहरच्च तस्मात् । भिन्नासरं नाम पुरं ह्यगच्छत्, प्राबोधयच्चाऽत्र जनांश्च भव्यान् ॥३८३॥

१ "स्थानं सुरम्यं विचकास्ति दृश्यम्" इति पाठः संभवति.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आयिष्ट गङ्गासहरं स रेल–दादाप्रभुं प्रेक्ष्य ततो विहृत्य । तद्विक्रमं पत्तनमेत्य सूरि–र्गोगाऽभिधद्वारवरेण पुर्याः ॥ ३८४ ॥
अन्तः प्रविष्टः पुरमध्यमार्गैः, परिव्रजन् सूरिवरः सशिष्यः । तद्राँघडीचौकवरं प्रपश्यन्, संघैश्चतुर्भिर्बहुलैः समेतः ॥३८५॥
बेण्डाऽऽदिवाद्यैर्युगपन्नदद्भि–र्रकप्रमाणैर्निजतारनादैः । पुरीमशेषां परिपूरयद्भि–र्बाधिर्यमाप्ते सति सर्वलोके ॥ ३८६ ॥
क्रमेण नाहाटगुवाडसंज्ञ–मुहल्लिकायामृषभीयचैत्ये । समागतः श्रीऋषभप्रभूणा–मालोकनं सोऽकृत भूरिभक्त्या ॥ ३८७ ॥
( चतुर्भिः कलापकम् । प्रागुक्तसुश्रावकदानमल्ल–विशालहर्म्ये मुनिवासयोग्ये । वर्षर्तुवासाऽर्हगुणैरुपेते, सन्तस्थिवाञ्छ्री–
जिनकीर्तिसूरिः ॥ ३८८ ॥ शराऽष्ट–नन्दक्षितिमान[१९८५]वर्षे, प्रावृट्चतुर्मासिकवासमेषः । तत्रैव चक्रे सकलाऽऽगृहीतः, सूरी–
श्वरोऽसौ सह भूरिशिष्यैः ॥ ३८९ ॥ श्रद्धालवः श्राद्धगणा अशेषाः, प्रोत्साहवन्तो बहुसत्तपांसि । स्त्रियः पुमांसश्च गरिष्ठ–
भावै–रकार्षुरेतद्गुरुराजपार्श्वे ॥ ३९० ॥ प्रभावनाः श्रीफल–रूप्य–हेम–खण्डैः प्रचक्रुर्बहवो महेभ्याः । सत्स्वामिवात्स–
ल्यमसंख्यमत्र विराजमाने गुरुराजकेऽस्मिन् ॥ ३९१ ॥ पूजा विशिष्टा प्रतिघस्रमार्ह–ती सम्प्रजज्ञे परमोत्सवेन । कियद्दि–
नान्येष सुमिष्टवाचा, नानोपदेशं ददिवांस्ततश्च ॥ ३९२ ॥ सचन्द्रताराऽऽद्यनुकूलघस्रे, शस्ते मुहूर्त्ते स हि पञ्चमाङ्गम् ।
आरब्धवान् सूरिवरः सटीकं, श्रीविक्रमादित्यचरित्रकं च ॥ ३९३ ॥ दिनाच्च तस्मात्प्रतिसद्म तत्र, ह्याचाम्ल–नीवी–समुपो–
षणानि । लग्नानि नित्यं भवितुं तदर्थं, तपोविशेषाणि यथाऽऽत्मशक्ति ॥ ३९४ ॥ ( भुजंगप्रयातम् )—श्रुतज्ञानपूजां प्रचक्रुः
प्रभक्त्या, सुगन्धिप्रकर्षं प्रधूपं ददुश्च । अखण्डं प्रदीपं सदाऽकुर्वतैते, यथाशास्त्रमेतद् व्यधुस्ते गुरूक्तम् ॥ ३९५ ॥
( उपजातिः )—सन्मौक्तिकैस्तेऽरचयन्त नित्यं, श्रीस्वस्तिकं केतनमुन्नतं च । अपुस्फुरन् राजत–हैममुद्रा, उपाहरन्नि–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यवरा अनेके ॥ ३९६ ॥ मुक्ताफलैः राजत-हैमपुष्पै-र्वर्धापयामासुरतुच्छभक्त्या । प्रभावनानित्यजिनेशपूजा-विशेष-रूपेण समैरकारि ॥ ३९७ ॥ ( आर्या )--प्रति शतकं प्रत्युद्दे-शं प्रति प्रश्नं राजतीं मुद्राम् । सौवर्णीमपि मुद्रां, मुक्ताफलानि च डुढौकिरे ॥३९८॥ गौतमनामोपरिष्टाद्, द्रव्यमप्यढौकन्त सर्वे इभ्याः । साधर्मिक-गुणि-साधु-सप्रेमभक्तिमप्यकुर्वन् ॥ ३९९ ॥ ( शार्दूलविक्रीडितम् )--तस्यारम्भदिने समस्तभविकाः श्राद्धास्तथा श्राविकाः, नैशं जागरणं व्यधुः प्रमुदितास्तौर्यत्रिकैश्चादरात् । प्रातश्चाऽर्कमितैर्विशेषपटहाऽऽद्यातोद्यरम्याऽऽरवैः, श्रीसंघः सकले पुरे भगवतीसूत्रं महाऽऽडम्बरात् ॥ ४०० ॥ दिव्यस्त्रीशिरसि स्थिते गुरुतरे सुस्थालके राजते, न्यस्तं क्षौमपटाऽऽदिभिः परिवृतं सम्भ्राम्य सर्वे जनाः । प्रत्यावृत्य गुरोः करे सरसिजे प्रत्यार्पयन् सादरं, चेत्थं भूरिधनव्ययैर्भगवतीसूत्रं समे शुश्रुवुः ॥ ४०१ ॥ ( युग्मम् )

( उपजातिः )—यावन्तमेतद्विधिमेष सूरि-राख्यज्जनांस्ते सकलैश्च तैर्हि । सूरीश्वराऽऽस्याद्विधिवन्निशम्य, स्वं स्वं जनुर्धन्यममंसतैते ॥ ४०२ ॥ आषाढमासे धवले च पक्षे, चतुर्दशीपर्वदिने च सायम् । प्रतिक्रमाऽन्ते चतुरष्टलक्ष-जीवैर्निजाऽगः क्षमयन् स्वयश्च ॥ ४०३ ॥ तेषां तदक्षंस्त समाधिपूर्वं, विशुद्धभावेन समस्तलोकः । ददौ च मिच्छामि सुदुक्कडं हि, पापाऽपनोदाय शिवाय चाऽपि ॥ ४०४ ॥ (ततो नभोमासि जनाः किलेत्थं, दिनं ह्युपोषुः कति चैकमेव । द्वे त्रीणि चत्वारि दिनानि पञ्चो-पावात्सुरत्रत्यजनाः कियन्तः ॥४०५॥ षट् सप्त चाऽष्टौ नव वासराणि, दशाऽपरे रुद्रदिनानि केचित् । अहानि (च)द्वादश तत्र भव्या-स्त्रयोदशाऽन्ये समुपावसंश्च ॥४०६॥ स्त्रियः पुमांसश्च चतुर्दशाऽपि, दिनानि सानन्दमुपावसन् हि । तिथि-प्रमाणानि च वासराणि, ते षोडशाऽहानि च भूरिलोकाः ॥ ४०७ ॥ उपोषुरेवं दशसप्तघस्राः ) ततो नभोमासि समागते ते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ह्येकोपवासं सकलाः प्रचक्रुः । द्वैघस्रिकं त्र्याहिकमप्यनेके, तुर्यांस्तथा पञ्चदिनोपवासम् ॥ ४०८ ॥ षट्-सप्त-शैलाऽङ्क-दशोपवासान्, एकादश-द्वादश चाऽपि लोकाः । त्रयोदशाऽप्येवमनेकभव्या-श्चतुर्दशाऽकुर्वत भूरिभक्त्या ॥ ४०९ ॥ तिथि-प्रमाणं च जनाः कियन्त-श्चक्रुः परे षोडश चोपवासान् । अथाऽपरे सप्तदश प्रचक्रु-रष्टादशाऽपि प्रबलाः कियन्तः ॥४१०॥ एकोनविंशत्युपवासमेवं, चक्रुस्तथा विंशतिमप्यनल्पाः । अथैकविंशत्युपवासमेते, द्वाविंशतिं चाऽपि घना जना हि ॥४११॥ चक्रुस्त्रयोविंशतिमप्यनेके, युग-द्विसंख्यं बहवोऽत्र भव्याः । कियज्जनाः पञ्चदलप्रमाणं, षड्विंशतिं चाऽपि महामहेन ॥४१२॥ नक्षत्रमात्रं बहुदुष्करं ते-ऽष्टाविंशतिं भक्तिभरेण चक्रुः । एकोनत्रिंशद्दिवसोपवासं मासोपवासं व्यदधुः कियन्तः ॥४१३॥ एकत्रिसंख्यं ह्युपवासमेवं, द्वात्रिंशतं चाऽपि महोपवासम् । विधाय सानन्दमशेषलोका, धर्मं महान्तं परिलेभिरे हि ॥ ४१४ ॥ ततो नभस्याऽसितविष्णुतिथ्यां, दिनाऽष्टकं यावदशेषसंघः । पर्यूषणापर्व महामहेन, समारराधाऽधिकधर्मकृत्यैः ॥ ४१५ ॥ सम्वत्सरीपर्वदिने च सायम्, प्रतिक्रमान्ते सकलैश्च जीवैः । संघश्चतुर्धा क्रमशः क्षमित्वा-ऽक्षमापयद्वार्षिकजातमन्तुम् ॥ ४१६ ॥ ततश्चतुःसंघ उदारभावैश्चैत्यप्रवार्टीं भ्रमयाञ्चकार । समस्तपुर्यां महता महेन, बेण्डाऽऽदिनानाविधवाद्यनादैः ॥ ४१७ ॥ इषेसुमासे विजयाऽऽदिकाया, महे दशम्याः समुपस्थिते हि । सूरीश्वराऽऽस्यादुपधानकृत्य-माहात्म्यमाकर्ण्य विशेषमेषः ॥४१८॥ श्रीप्रेमचन्द्रः सुमतिः खजान-चीत्याख्यसुश्रावक उत्थितः सन् । आचार्यवर्यस्य पुरः समूचे, लाभो ह्ययं मे प्रभुवर्य ! देहि ॥४१९॥ अहङ्करिष्याम्युपधाननाम-महातपः कारयिताऽस्मि चाऽन्यैः । जागर्ति वाञ्छा महती मदीय-चित्ते कृपालो ! भगवंस्तदर्थम् ॥४२०॥ आचार्यवर्यस्तमवक् तदैवं, श्रद्धाऽऽढ्य ! सुश्रावक ! भावना चेत् । किलेदृशी ते समुदेति तर्हि, शीघ्रं विधातुं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुरु यत्नमेतत् (म्) ॥ ४२१ ॥ धर्मस्य कार्ये न विलम्बनीयं, श्रेयोऽर्थिभिर्धीरजनैः सुपुम्भिः । गुरूदितं वाक्यमिदं निशम्य, श्रेष्ठी प्रसीदन् गुरुमेवमाख्यत् ॥४२२॥ स्वामिन्! किलाऽस्मिन् न हि मे विलम्बो, विलोक्यतां तद्दिवसः कदैता । प्रारम्भय त्वं सुदिने किलैतत्, विलोकयन्सूरिस्तमवोचतैवम् ॥ ४२३ ॥ (शार्दूलविक्रीडितम्)—भव्यात्मन्! दशमीयमस्ति विजया सर्वानुकूला शुभा, तस्मिन्नेव शुभङ्करिष्णुदिवसे प्रारभ्यतामेतकत् । निर्णीते गुरुभिर्दिने द्रुततरं सत्कुङ्कुपत्रीमसौ, प्रैषीद्देशविदेशयोश्च सकल-श्रीसङ्घकाऽऽहूतये ॥४२४॥ (उपजातिः)—तत्रोपयुक्तामथ सर्वसाम-ग्रीमानयामास तदैव सोऽपि । ततो दशम्यां विजयादिकाया-मारम्भयच्छ्रीमुनिराज एषः ॥४२५॥ आसंस्तदाराधकपुंस्त्रियश्च, प्रायः शताऽष्टोत्तरसंख्यका हि । तपस्यमुष्मिन् निशि जागराऽऽ-दि-मालासमारोपणकोत्सवश्च ॥४२६॥ दिनाऽष्टकाऽऽरब्धमहोत्सवोऽपि, शान्त्यादिकस्नात्रसमर्चनं च । सुस्वामिवात्सल्यमनेक-वस्तु-प्रभावना-शील-तपः-प्रदानम् ॥ ४२७ ॥ दीनार-मुद्राऽऽदिकदानमत्र, फलोधिपुर्यामिव सर्वथाऽभूत् । आराधकाऽशेष-जनाऽशनाऽऽदि, श्रीप्रेमचन्द्रः कृतवान् खजाञ्ची ॥४२८॥ आरम्भघस्रादुपधानकीया-ऽवसानपर्यन्तमुपागतानाम् । साधर्मिका-णामशनाऽऽदिना हि, सम्भक्तिमेषोऽकृत भूरिभावैः ॥४२९॥ वैदेशिकाऽत्रा(?)गतसज्जनास्ते, तपस्विकेभ्यो व्यददुः समेभ्यः । प्रभावनां भक्तिकृते तदाऽष्ट-शैर्तप्रकारां परिवृद्धभावाः ॥ ४३० ॥ मिथो ददुस्ते शतशश्च मुद्रा, भावप्रवृद्ध्या वरभक्तिहेतोः । तैषेऽसिते स्कन्दतिथौ सुचारु-महोत्सवैः सूरिवरः समेषाम् ॥ ४३१ ॥ मालां समारोपितवानथिग्री-वं स्वर्णमुद्रामथ शाल-रूप्य-कार्दींश्च तेभ्यो व्यददुर्महेभ्या-स्तपस्विनां स्वीयकराम्बुजेन ॥ ४३२ ॥ युग्मम् ॥ शेषं च सर्वं फलवर्द्धिपूर्वत्, पुर्या-मिहाऽभूदुपधानकृत्ये । इत्थं महाऽऽडम्बरतः समाप्य, ततो व्यहार्षीन् मुनिराजवर्यः ॥ ४३३ ॥ (वसन्ततिलका)—आगत्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नालनगरीं सह शिष्यवृन्दै-र्दादाजितं परिविलोक्य बभूव हृष्टः । द्वित्राणि तत्र दिवसानि समध्यवात्सी-दागाच्च विक्रमपुरं पुनरेष सूरिः ॥ ४३४ ॥ भूयस्तपस्य-सितभिन्नदले च दर्शे, श्रीमज्जिनादिकुशलाऽभिधसूरिराजः । निर्वाणकारिदिवसे सह सर्वसंघै-र्नालाऽऽख्यपत्तनमुपागतवांश्च सूरिः ॥ ४३५ ॥ ( उपजातिः )—विधाय यात्रां गुणवद्वरीयान्, पुनः समैद्विक्रमपत्तनं सः । संघैश्चतुर्भिः सह सूरिराजः, प्रख्यातिमान् सर्वगुणैकवासः ॥ ४३६ ॥ विज्ञप्तये सूरिवरस्य तत्र, सवाइपूर्वाज्जययुक्पुराच्च । हम्मीरमल्लो मतिमान् गुलेच्छा, सुश्रावकोऽनेकजनैः सहागात् ॥ ४३७ ॥ अत्यन्तमुद्वीक्ष्य तदाग्रहं स, तत्रैतुमङ्गीकृतवान् दयालुः । ततश्च सर्वे मुदिता निवृत्य, श्राद्धाः समागुः स्वपुरं सुखार्ताः ॥ ४३८ ॥ गतेषु तेष्वत्र चिकित्सका हि, न्यषेधिषुः सूरिवरं विहर्तुम् । अशक्तिमालोक्य तनौ विशेषा-मतो विहारं न्यरुधत्स तावत् ॥ ४३९ ॥ स रांघडीचौक-नवीनधर्म-शालां समागत्य सुखेन तस्थौ । दिनेषु यातेषु कियत्सु तत्र, पुनर्विहर्तुं चकमे यदाऽसौ ॥ ४४० ॥ तर्ह्येव तस्याऽधिकनिर्बलत्व-माकस्मिकं सूरिवरस्य देहे । जज्ञे ततो न व्यहरच्च किन्तु, चित्ते स्वकीये व्यमृशत्किलैवम् ॥ ४४१ ॥

( शार्दूलविक्रीडितम् )—क्षेत्रस्याऽस्य ममाऽस्ति सम्प्रति महान् स्पर्शो बलीयानिति, मत्वा तत्र कियद्दिनानि गमयाञ्चक्रे च सूरीश्वरः । पश्चाद्रांघडिचौक-संस्थित-तपोगच्छीयशालामसौ, यातः पौषधपूर्विकां जलमरुद्व्यावृत्तिकामः प्रभुः ॥४४२॥ क्षेत्रस्पर्शनयोगतोऽधिकतरादाबल्यतश्चाऽप्यसौ, तर्काऽद्रि-ग्रहं-भूमिते [१९७६] सुजनताऽत्यन्ताऽऽग्रहाद्वत्सरे । चातुर्मासमलञ्चकार मतिमान् साद्गुण्यरत्नाकरः, श्रीमच्छ्रीजिनकीर्तिसूरिरखिलैः सच्छिष्यवर्गैः श्रितः ॥ ४४३ ॥ ( उपजातिः )—विचिन्तयन्निष्टमजस्रमेष, साधूनशेषान् यमिनीश्च बह्वीः । अध्यापयत्सूत्रचरित्रकादि, सत्यामशक्तावपि सूरिराजः ॥ ४४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

( स्रग्धरा )—आचाराङ्गं ह्यशेषं तदनु सुयगडांगं च सम्पूर्णमेवं, स्थानाङ्गं चाऽपि सूत्रं तदपि च समवायाङ्गमध्यापिपत्सः । आद्यन्तं नन्दिसूत्रं स हि परमनुयोगादिकं द्वारसूत्रं, व्याख्यानेऽप्येतकानि प्रथितगुरुवरो वाचयामास तत्र ॥४४५॥

( आर्या )—-श्रीज्ञातधर्मकथाङ्ग-मुपादशाङ्गमन्तकृद्दशाङ्गं च । अनुत्तरदशाङ्गसूत्रं, श्रीप्रश्नव्याकरणसूत्रम् ॥ ४४६ ॥

( आर्यागीतिः )—तच्छ्रीविपाकसूत्रं, कल्पसूत्रमात्मप्रबोधप्रकरणम् । नवपदमाहात्म्यप्रक-रणप्रवचनसारोद्धारप्रकरणे ॥ ४४७ ॥ ( उपगीतिः )—जीवविचाराऽऽदि प्रक-रणमुपदेशमालाप्रकरणम् । आगमशास्त्रप्रकरण-मपि च योगशास्त्रप्रकरणम् ॥ ४४८ ॥ नयचक्रसारबालाऽ-वबोधप्रकरणमपि सर्वम् । चतुर्विंशतिबालाऽव-बोधाऽऽदिकाः सर्वे ग्रन्थाः ॥ ४४९ ॥

( उपजातिः )—अध्यापिताः सूरिवरेण तत्र, व्याख्यानकाले परिवाचिताश्च । अनुक्रमाद्द्वादशमासिकानि, पर्वाणि सर्वाणि सुखेन सम्यक् ॥ ४५० ॥ आराधयन् कार्तिकतच्चतुर्मा-सान्त्यं प्रतिक्राममसौ विधाय । मौनाऽऽदिकां तां परमामथैका-दर्शीं ततः पौषधशालिकातः ॥ ४५१ ॥ विनिर्गतः शक्रदिशास्थरम्य-गोगापुरद्वारबहिःस्थितायाम् । आसूजितः कोचरगोत्रिणो हि, सद्वाटिकायामयमागमच्च ॥ ४५२ । ( युग्मम् ) समाधियोग्यं रुचिरं स्थलं तत्, समध्यतिष्ठज्जिनकीर्तिसूरिः । अशक्तितो वैद्यनिरोधतश्च, वाज्यष्ट-नन्दक्षितिसंख्यवर्षे ॥ ४५३ ॥ क्षेत्राभियोगस्य बलिष्ठकत्वात्, सदौषधेः सेवनतश्च तत्र । व्यराजते यत्समयं महीयान्, प्रख्यातिमद्विक्रमपत्तनेऽसौ ॥४५४॥ इतो यथार्यं व्यहरच्चतुर्मा-सस्याऽवसाने तदशेषमग्रे । सौराष्ट्रदेशाऽभिमुखप्रयाणं, संवर्णयिष्ये स्वधिया गुरूणाम् ॥ ४५५ ॥ ( शार्दूलविक्रीडितम् )—इत्याचार्यशिरोमणेर्जिनकृपाचन्द्रस्य सूरीशितुः, सूरिश्रीजयसागरेण विदुषा श्रीमद्गुरोर्भक्तये । सत्काव्ये रचिते यथामति महायत्नाच्चरित्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऽऽत्मके, चातुर्मासिकषट्कवर्णनमयः सर्गस्तुरीयो गतः ॥ ४५६ ॥

॥ इति चतुर्थः सर्गः समाप्तः ॥

## अथ पञ्चमः सर्गः प्रारभ्यते—

( शार्दूलविक्रीडितम् )—लोके श्रीऋषभ–प्रजापति–महादेवेतिनामत्रयैः, प्रख्यातिं गतवाननन्तमहिमा त्रैलोक्यनाथो हि यः । श्रीनाभेर्मरुदेविकासुजठरे सर्वार्थसिद्धच्युतो, जातो मानवसर्वरीतिमनघश्चाऽऽदौ समस्थापयत् ॥ १ ॥

( उपजातिः )—सद्राजनीतिं व्यवहारनीतिं, सद्धर्मनीतिं पुरुषाऽङ्गनानाम् । द्वैलर्षि–वेदाङ्गकला युगादा–वशिक्षयच्चाऽयमनुक्रमेण ॥ २ ॥ आद्यः किलाऽस्मिन्नभवच्च राजा, भिक्षाचरश्चाऽऽदिम एष एव । तीर्थङ्कराणाम्प्रथमश्च योऽभू-दर्हन्नथाऽऽद्यः समभूज्जगत्याम् ॥ ३ ॥ प्राथम्यमागादिह केवलित्वे, यः पञ्चशिल्पीं प्रकटीचकार । कर्माऽष्टकोच्छेदचिकीर्षया हि यो–ऽष्टाऽङ्गयोगं रचयाञ्चकार ॥ ४ ॥ ( स्रग्धरा )—सम्यक्त्वज्ञानचारित्रमिह बहुतपः संविधायाऽतिघोरं, मुक्तेर्मार्गं विशुद्धं शुभभविमनुजान् दर्शयामास यश्च । कर्माण्यष्टौ विनाश्य स्वयमपि रजताऽगोपरिष्टात्सुखेन, निर्वाणं चाऽभ्यगच्छत्तमनिशमनघं नाभिसूनुं नमामि ॥ ५ ॥ ( शार्दूलविक्रीडितम् )—पूर्वं चक्रिसुसम्पदं ह्यनुभवंस्तामत्यजल्लोष्ठवत्, जातोऽर्हन् कनकच्छविर्मृगधरस्तीर्थङ्करः षोडशः । लक्ष्मीवर्धनकारको जनिमतां सद्भक्तिभाजामसौ, कल्याणं बहु तन्तनीतु सततं श्रीशान्तिनाथः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रभुः ॥ ६ ॥ दोष्मद्यद्भुजमावलम्ब्य मधुहा दोलाऽतिलीलां व्यधात्, तेजस्तत्प्रतिवासुदेवकजरासन्धस्य योऽजर्हरीत्। ध्यायन्मुक्तिपथं सदैव हृदये राजीमतीं सञ्जहौ, जीवान् भूचरखेचराञ्जलचरान् बद्धान् परित्रातवान् ॥ ७ ॥

( स्रग्धरा )—अष्टाभिः प्रातिहार्यैरतिशयसुषमां सन्दधानः कृपालुः, आजन्मब्रह्मचारी त्रिभुवनजनतापूज्यपादारविन्दः। आदाज्जीवाऽनुकम्पामयमतिकठिनं संयमं शर्मदं यो, द्वाविंशस्तीर्थकर्ता वितरतु भगवान् नः शिवं नेमिनाथः ॥ ८ ॥ युग्मम् ॥ ( शार्दूलविक्रीडितम् )—यस्याऽसीमकृपाऽवलोकनसुधामापीय सद्यः प(फ)णी, तेनोच्चारितमन्त्रराजमतुलं संश्रुत्य कर्णाऽमृतम्। सन्दग्धाऽर्धतनुर्विपद्य धरणेन्द्राऽऽख्यो हि शक्रोऽभवत्, पाताले परमर्द्धिकः सुखमयस्तापत्रयीवर्जितः ॥ ९ ॥ ( उपजातिः )—सोऽयं सदा नः परिपालयेत, श्रीपार्श्वनाथ–प्रभु–तीर्थकर्ता। विघ्नात्त्रयोविंश इह प्रपन्नान्, अनन्तविज्ञान–दया–बलो हि ॥ १० ॥ युग्मम् ॥ ( वसन्ततिलका )––जन्माऽभिषेकसमये कनकाऽचलीय–शृङ्गस्थितः सकलदेवगणैः समेतः। शक्राऽधिपस्तमनघं चरमं जिनेशं, क्रोडे निधाय मनसीत्थमशङ्कताऽसौ ॥ ११ ॥

( उपजातिः )—यदेष नाथः खलु जातमात्रः, शैलाऽङ्गलक्षाऽधिककोटिकुम्भैः। स्नात्रं ह्यविच्छिन्नतया प्रवृत्तं, सोढाऽथवा तेन सहैव बोढा ? ॥ १२ ॥ अतः सुरांस्तानभिषेचनाय, नैवाऽऽदिशच्छक्रपतिस्तदानीम्। मौढ्यात्कुतर्कं सुरनायकस्य, ज्ञात्वा महावीरजिनस्तदैव ॥ १३ ॥ विस्तार्य पादं किल वाममेष, आपीडयच्चासनमैन्द्रमर्हन्। अङ्गुष्ठमात्रेण ततश्चकम्पे, सिंहासनं मेरुशिरश्च बाढम् ॥ १४ ॥ तदाऽवधिज्ञानवशाद्विदित्वा, तुष्टाव सौधर्मपतिस्तमीशम्। नाथ! प्रसीदाऽनुपमं बलं ते, नाऽवेदिषं मौढ्य(मूढ)तया किलाऽहम् ॥ १५ ॥ अज्ञानजातं (तान्) मम सर्वमन्तून्, त्वं क्षामयेर्मामनुकम्पयाऽऽशु। निगद्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चेत्थं सकलानमर्त्या–नाज्ञापयत्स्नात्रममुष्य कर्तुम् ॥ १६ ॥ ततः प्रहृष्टाः क्रमशोऽमरास्ते, प्रागुक्तसंख्यैः कलशैरशेषैः । त्रैलोक्यनाथं चरमं जिनेशं, संस्नापयामासुरनन्तवीर्यम् ॥ १७ ॥ स त्रैशलेयो भगवाञ्जिनेन्द्रो, देवैरशेषैरसुरैश्च मर्त्यैः । पोपूज्यमानाऽनुपमाऽङ्घ्रिकञ्जः, श्रीसंघसुश्रीपरिवृद्धयेऽस्तु ॥ १८ ॥ नगोऽर्बुदोऽष्टापदभूधरं च (रश्च), समेतयुक्तं शिखरम्प्रशस्यम् । शत्रुञ्जयो रैवतकाऽचलश्च, चम्पापुरी या जगति प्रसिद्धा ॥ १९ ॥ पुरी ह्यपापाऽखिलपत्तनाऽग्र्या, निर्वाणभूमीः सकलाः किलैताः । अघौघविध्वंसनकारिकास्ता, नमाम्यहं भक्तिभरेण नित्यम् ॥ २० ॥ ( युग्मम् ) स्वर्गे च मर्त्येऽप्यथ नागलोके, बिम्बानि चाऽकृत्रिमकृत्रिमाणि । जिनेश्वराणामखिलानि तानि, नमामि चाहं सदभीष्टसिद्ध्यै ॥ २१ ॥

( पृथ्वीच्छन्दः )—चतुर्दशशतं दलेष्वधिकसंख्यकांस्तानपि, जिनाऽधिपगणाऽधिपाञ्जगदनेककीर्त्युज्ज्वलान् । च्युतिं च जिनगर्भकाऽपहृतिजन्मदीक्षाग्रहा–ननन्त–वरकेवलप्रथितबुद्धिनिर्वाणकान् ॥ २२ ॥ ( उपजातिः )—तेषां च कल्याणकपञ्चषट्कं, कल्याणकीयाः सकलाश्च भूमीः । असीमपुण्याऽतुलशक्तिसूचि–चतुर्दशस्वप्नवरांश्च नौमि ॥२३॥ ( युग्मम् )

( शार्दूलविक्रीडितम् )—दन्ती श्वेतवृषो हरिर्ह्यभिषवैः पद्मालयायास्तथा, द्वे मौले कुसुमस्य चन्द्र–दिनपौविन्द्रध्वजः सद्घटः । पूर्णोऽब्धिः सरे उत्पलैर्विलसितं क्षीरोदधिः सुन्दरं, श्रीमद्देवविमानकं सुललितं रत्नोच्चयं(यो) भासुरम्(रः) ॥ २४ ॥ ( वसन्ततिलका )—निर्धूमपावकशिखा महती किलैते, स्वप्ना गरिष्ठफलदा दशतुर्यसंख्याः । उत्सार्य विघ्नपटलीमिह नः समेषां, तन्वन्तु मङ्गलमजस्रमनल्पमूर्व्याम् ॥ २५ ॥ ( युग्मम् ) वर्वर्ति विक्रमपुराद्दल–शैल–योज–नान्ते विशालविषयः खलु लाटनामा । तद्देशमण्डनकरं कमलाप्रधानं, सर्वर्द्धिमद्विपुलसूर्यपुरं चकास्ति ॥ २६ ॥ ( उपजातिः )—तस्मिंश्च सुश्रावक



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इभ्यवर्यः, कल्याणचन्द्रः कुरुते निवासम् । जहेरिकोपाह्व उदारकीर्ति-स्त्रिभिः सुपुत्रैः सह मोदमानः ॥ २७ ॥

( मन्दाक्रान्ता )—श्रद्धाऽऽधिक्यं विदुषि परमे विद्यते श्रेष्ठिनोऽस्य, श्रीश्रीपूज्ये जगति विदिते सर्वशास्त्रप्रवीणे । हेतोस्त-स्माददिपि पुरे तत्र तस्यैकपत्रं, दत्तं तेन प्रतिदलमरं चित्तसन्तोषकारि ॥ २८ ॥ ( वसन्ततिलका )—श्रीमन्ममोपरि कृपां महतीं व्यधत्था, यत्पादलिप्तनगरं गुरुराजवर्यैः । गन्तुं मनश्च समचीकरथास्तदेतत्, आकर्ण्य मे मनसि भूरि बभूव हर्षः ॥ २९ ॥ किञ्चाऽन्यदप्यनघ ! मत्करणीयकार्यं, ज्ञाप्यं ह्यवश्यमखिलं कृपया भवद्भिः । या मामकीन-विशदा कृतधर्मशाला, तत्राऽस्ति साऽपि भविता नियतं पवित्रा ॥ ३० ॥ ( उपजातिः )—इत्यादिवार्तामयपत्रमासीद्, ऊर्जावसाने सुरताऽधि-वासी । स केसरी श्रेष्ठिवरः स्वपुत्रं, भ्रात्रीयकं चाऽपि जनैः कियद्भिः ॥ ३१ ॥ ( शालिनी )—सार्धं प्रैषीत्पूज्यपादाऽन्तिके हि, तूर्णं सव चाऽऽययुः पूज्यपार्श्वम् । ते श्रेष्ठ्युक्ताऽशेषवृत्तान्तमूचुः, स्वामिन् ! गत्वा पादलिप्तं पुरं त्वम् ॥ ३२ ॥ कृत्वा यात्रां तत्पुराच्छीघ्रमेव, सर्वैः शिष्यैः सेव्यमानो विहृत्य । आयाह्येतत्पत्तनं मे कृपालो ! सर्वे युष्मद्दर्शनोत्काश्चिराद्धि ॥ ३३ ॥ ( त्रिभिर्विशेषकम् ) ( शार्दूलविक्रीडितम् )—औषध्यादिकसर्ववस्तु सततं सज्जीकृतं वर्त्स्यति, मार्गे नैव मनागपि प्रभविता क्लेशो विहारेऽपि ते । सर्वं स्वीयधनव्ययेन पथि ते सम्पादयिष्याम्यहं, तच्चिन्तां हर सत्वरं विहर हे कारुण्य-सिन्धो ! गुरो ! ॥ ३४ ॥ एष्याम्यर्बुदपर्वते पुनरहं द्रष्टुं भवत्पत्कजं, तत्रावश्यकरिक्तवस्तु सकलं पूर्णं करिष्ये पुनः । शातेनाऽऽशु भवानितो विहरतामित्येव सम्प्रार्थये, श्रुत्वाऽऽचार्यवरस्तदीयसकलं संप्रार्थनं व्याहरत् ॥ ३५ ॥

( उपजातिः )—मार्गेऽसिते कस्य तिथौ विहार-मितः करिष्यामि न संशयीथाः । यत्केसरी श्रेष्ठिवरोऽस्ति धर्मा-ऽनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रागिमुख्यः कृतिमज्जनाऽऽख्यः ॥ ३६ ॥ श्रद्धालुभक्तोस्ति सदा हितैषी, कर्तास्मि तद्वाक्यमवश्यमेव । इतीरिते सूरिवरेण तेऽपि, जजल्पुराचार्यगणाऽग्रगण्यम् ॥ ३७ ॥ स्वामिन् ! त्वमेवं यदि निश्चिनोषि, सर्वे वयं तावदिहैव तर्हि । उपस्थिताः स्मो भवता विहारे, कृते च गन्तास्म इतः स्वगेहम् ॥ ३८ ॥ तुरङ्गवस्वङ्कशशाङ्कवर्षे[१९८७], गुर्वन्तिके कार्तिकपूर्णिमान्ते । समागतान् सूर्यपुरादनेक–महेभ्यवर्यानवलोक्य सर्वे ॥ ३९ ॥ श्रुत्वा च दृष्ट्वा मिथ इत्थमेषा–माचार्यवर्यैः सह भाषणाऽऽदि । निश्चिक्यिरे पौरजनास्तदानीं, श्रीपूज्यवर्यो विहरिष्यतीति ॥ ४० ॥ ( युग्मम् ) ( इन्द्रवंशा )—ते संस्कृताः सर्वमहाजनास्ततः, श्रीपूज्यवर्यान्तिकमाययुर्नताः । तद्वन्दनादि प्रविधाय भक्तितो, विज्ञप्तिमारक्षत भूरिभावतः ॥ ४१ ॥ स्वामिन् ! मदीयाऽधिकभाग्ययोगतः, पुर्याममुष्यां सुचिरं समस्थिथाः । लाभं महान्तं ह्यदिथाश्च सद्गुरो ! सम्प्रत्यदृष्टप्रतिकूलभावतः ॥ ४२ ॥ चिन्तामणिप्रायभवत्सुदर्शनं, दुष्प्रापमेतत्खलु पुण्यमन्तरा । आगत्य तन्नः करसम्पुटे पुन–र्यायायते सम्प्रति दुःखमेमि तत् ॥ ४३ ॥ ( इन्द्रवज्रा )—नैवाऽस्ति शक्तिः प्रतिरोद्धुमेतत् , तत्केवलं मानसदुःखमेमि ! सम्प्रार्थये त्वां भगवंस्तथापि, स्वीकृत्य तन्नोऽनुगृहाण सर्वान् ॥ ४४ ॥ ( भुजङ्गप्रयातम् )—ततस्तानवादीत्कृपाचन्द्रसूरि–र्जिनाऽऽदिः किमुष्टस्तदाख्यात यूयम् । समूचुस्तदा ते भवानत्र वर्षे, हयाँऽष्ट–ग्रहेन्दुप्रमाणे[१९८७] दयालो ! ॥ ४५ ॥ चतुर्मासमस्थाद्बहिर्देश एव, ततस्त्वं पुराऽन्तः प्रविश्यैकरात्रम् । पुनाराघडीचौकसंस्थाऽतिनूत्न–बृहद्धर्मशालामुषित्वा विहारम् ॥ ४६ ॥ ( उपजातिः )—कुरुष्व याचामह एतदेव, तथाकृते नो हृदयेऽतिमोदः । जनिष्यते कश्चिदवाच्य एव, नो चेत्समेषां हृदि दुःखमेव ॥४७॥ (त्रिभिर्विशेषकम्) स पूज्यपादस्तत एवमूचे, यत्कामयध्वे तदवश्यमस्तु । सुखं यथा वो भविता तथाऽहं, कर्तास्मि भव्या इति वित्त यूयम्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ४८ ॥ ( मालिनी )—इति निगदति तस्मिन् सूरिराजे गरिष्ठे, परममुदमवापुः पौरलोका अशेषाः । सकलनगरशोभां तोरणाऽऽद्यैर्वितेनुः, प्रतिपदि सितभिन्ने मार्गशीर्षे पुराऽन्तः ॥ ४९ ॥ गुरुवर उपयातो धर्मशालां विशालां, कमलभवसुतिथ्यां प्रातराचार्यवर्यः । व्यहरत सह शिष्यैर्द्वादशाऽऽतोद्यनादै–रुपयति बधिरत्वं प्रायशः सर्वलोके ॥ ५० ॥ ( युग्मम् ) सह सकलसुसंघै राँघडीचौकहर्म्यात्, प्रतिविपणि परिभ्राम्यन्नयं मन्दिराणि । परमजिनवराणामीक्षमाणः समन्ताद्, विपुलनगरमध्याद्दक्षिणद्वारतोऽसौ ॥ ५१ ॥ ( उपजातिः )—विनिर्गतः श्रीप्रभुरेलदादा–जित्स्थानमागत्य सुखेन तस्थौ । क्रोशार्धदूरे नगराच्च तस्मा–दाद्यप्रयाणं समभूदिहैव ॥ ५२ ॥ ( युग्मम् ) तत्रत्यसंघस्य चतुर्विधस्य, सच्छ्रेष्ठिनः सूरतवासिनश्च । अत्याग्रहादेष दिने द्वितीये, सन्तस्थिवान्दीनदयालुवर्यः ॥ ५३ ॥ श्रीस्वामिवात्सल्यमपि प्रचक्रे, तस्मिन् दिने सूर्यपुराऽधिवासी । प्रभावनापूजनमेष तत्र, भक्त्या महत्या कृतवान् महेभ्यः ॥ ५४ ॥ दिने तृतीयेऽपि तदध्यतिष्ठत्, सद्धेतुना सूरिवरः सुखेन । चक्रे च तस्मिन् दिवसे स्वधर्मि–वात्सल्यपूजाऽऽदिकमादरेण ॥ ५५ ॥ सद्भावतो विक्रमयुक्पुरीय–स्तुरीयघस्रे प्रग एव सूरिः । कृत्वा विहारं सह साधुवर्गै–रुद्रामयुक्तं सरमाजगाम ॥ ५६ ॥ तत्रस्थदादाजितमेष भक्त्या, नत्वा च नुत्वा परिवृद्धभावैः । चक्रे द्वितीयं क्रमशः प्रयाणं, स्थाने हि तस्मिन्यतिराजमुख्यः ॥ ५७ ॥ विहृत्य तस्मात्स हि देशणोक–मागत्य सर्वैः पुरवासिलोकैः । सुसत्कृतः सर्वजनान् प्रबोध्य, प्रगे विहारं कृतवांस्ततश्च ॥ ५८ ॥ स शूरपूराऽभिधधूमयान–स्थितिस्थले रम्यसरायगेहे । तुर्यप्रयाणं कृतवान् सुखेना–ऽध्युष्यैकरात्रं गुणवारिकूपः ॥ ५९ ॥ ततश्चलित्वा सह सर्वशिष्यै–र्नोकाऽभिधग्रामटिकामियाय । वाद्याऽऽदिभिः पौरजनास्तमेतं, प्रवेशयामासुरति प्रहृष्टाः ॥ ६० ॥ सूरीश्वर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तत्र गिरा महत्या, पुत्रः कलत्रं कमलाऽतुलेयम् । सन्मित्र—भृत्याऽऽदिकवस्तुमात्रं, विनाशि नित्यः खलु धर्म एव ॥६१॥ स एव धीरैः परिषेवणीयः, शश्वत्सुखेच्छा वरिवर्ति येषाम् । इत्याद्युपादिश्य ततो विहृत्य, चीलाऽभिधं जकसनमाजगाम ॥ ६२ ॥ स्थित्वा च तत्रैकसरायगेहे, चैकां निशां सूरिवरः प्रभाते । ततश्चलित्वा समुपाययौ स, लायेतिनाम्ना प्रथितं पुरं वै ॥ ६३ ॥ तत्राऽस्ति चैत्यं रमणीयमेकं, ह्युपाश्रयोऽप्यत्र वरीवृतीति । दृष्ट्वा जिनेशं स उपाश्रये ह्य—तिष्ठत्सशिष्यो महतोत्सवेन ॥ ६४ ॥ महोपदेशैः प्रतिबोध्य लोकान्, कृत्वा विहारं स हि गोगलावम् । आनञ्च लोकैरतिसत्कृतः स—न्नुपादिशच्चाऽऽर्हतशुद्धधर्मम् ॥ ६५ ॥ ततो विहारं प्रविधाय सूरिः, समागमन्नागपुरं प्रसिद्धम् । राठोरवंशाऽमरसिंहभूप—सद्राजधानी महती पुराऽस्ति ॥ ६६ ॥ सर्वर्त्तुसौख्यं जनयन्महच्च, सद्धर्मनिष्ठाः पुरुषा अनेके । बभूवुरस्मिन्नतिकीर्तिमन्तो, महात्मपुम्पादरजःपवित्रम् ॥ ६७ ॥ जैनानि रम्याणि सुमन्दिराणि, सन्त्यत्र सद्मान्यपि सद्गुरूणाम् । सत्कूप—वापी—सरसी—तटाकैः, शोशुभ्यमानं नगरं किलैतत् ॥ ६८ ॥ महर्द्धिकश्रेष्ठिकदम्बवासं, दुर्गाऽधिकाऽसीम—विशालभासम् । लक्षेशकोटीशमहेभ्यकानां, सौधश्रिया भात्यमरावतीव ॥ ६९ ॥ चतुष्पथैर्वेदमितैश्च रम्यं, द्वाराणि चत्वारि महान्ति यत्र । तत्रैतमेनं जगदर्चनीयं, विद्याचणं श्रीजिनकीर्तिसूरिम् ॥ ७० ॥ प्रवेशयामास पुराऽन्तरित्थं, परिभ्रमन्नेष पुरे समस्मिन् । पश्यञ्जिनेशान् प्रतिमन्दिरं स, आगाद्बबूकोटरिकां मुहल्लाम् ॥ ७१ ॥ तत्र स्थितं रम्यमलञ्चकार, सुशोभितं तोरणबन्धनाऽऽद्यैः । उपाश्रयं सूरिवरोऽथ रम्या—मारब्धवान् मङ्गलदेशनां सः ॥ ७२ ॥ इहत्यकश्रीयतिरूपचन्द्र—सच्छिष्यको मोहनलालनामा। प्राप्तप्रतिष्ठो

१ दुर्गाऽतिदुर्गं रिपुभीतिवर्जमिति वा ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बहुधा जनेषु, विद्वत्तमो विश्वजनीनवर्यः ॥ ७३ ॥ व्योम[१९३०]-त्रि-नन्देन्दुमिते च वर्षे, सर्वं परित्यज्य परिग्रहं सः । क्रियोध्धृतिं स स्वयमेव कृत्वा, यथाविधि प्राप सुसंयमित्वम् ॥७४॥ मुम्बापुरी-सूर्यपुराऽऽदिकेषु, लब्धप्रतिष्ठो जगति प्रसिद्धः । कृत्वाऽऽत्मकल्याणमनेकमेष, यातो दिवं निर्मलभूरिकीर्तिः ॥ ७५ ॥ इहैव जातः स हि पत्तने यत्, तदस्य संक्षिप्तचरित्रमत्र । प्राप्तं प्रसङ्गान्मयका व्यदर्शि, महात्मनश्चातियशस्विनश्च ॥ ७६ ॥ वीरप्रभोः पट्टपरम्परायां, षट्षष्टिकोऽभूज्जिनसूक्तिसूरिः । श्रीकर्मचन्द्रोऽभवदस्य पट्टे, तस्याऽभवच्चेश्वरदासशिष्यः ॥ ७७ ॥ श्रीवृद्धिचन्द्रोऽस्य बभूव पट्टे, समास्त पट्टेऽस्य हि लालचन्द्रः । श्रीरूपचन्द्रोऽभवदेतदीय-पट्टाऽधिकारी गुणकीर्तिधारी ॥७८॥ एतस्य पट्टे निषसाद गुण्यो, महामतिर्मोहनलालसूरिः । ज्यायान् विनेयोऽस्य यशोमुनिश्च, पावापुरे ध्याननिमग्नचेताः ॥७९॥ तपोभिरुग्रैर्धुतसर्वपापो, रामेषुवस्त्रान् समुपोष्य धीरः । समाधिना कायमिह प्रहाय, द्यामारुरोहैष यशोगरिष्ठः ॥ ८० ॥ ( आर्यागीतिः )—विस्तृतमेतच्चरितं, दामोदरकविरचित-मोहनचरित्रात् । विदन्तु सर्वे सुधियः, ग्रन्थविस्तारभिया समक्षेपि मया ॥ ८१ ॥ ( उपजातिः )—स सप्तषष्टिः समभूच्च वीर-पट्टावलीभूषणभूत एषः । जिनाऽऽदिभक्त्याख्यगरिष्ठसूरिः, श्रीप्रीतिसारोऽस्य बभूव पट्टे ॥८२॥ (द्रुतविलंबितम् )—तदनु तस्य विनेयवरो महान्, अमृतधर्मगणी समुपाविशत् । प्रथितगौरव-पट्टमहासने, स्व-परशास्त्रविचारणदक्षिणः ॥ ८३ ॥

( उपजातिः )—श्रीमान् क्षमारत्नगणी तदीय-पट्टे न्यषीदद्गुणवान् सुविद्वान् । तत्पट्टशोभाकृदभूच्च धर्मा-नन्दो गणी शान्तिसुधारसज्ञः ॥८४॥ ( द्रुतविलंबितम् )—सुमतिमण्डननामगणी महा-नभवदस्य सुपट्टनिवेशितः । सदसि वादिमतङ्गजकेसरी, निरतिचार-सुसंयमपालकः ॥ ८५ ॥ ( स्रग्धरा )—धर्मानन्दस्य पट्टे न्यसदतुलयशा राजयुक् सागराऽऽख्यः, तत्पट्टे-

For Private And Personal Use Only

ऽत्यन्तविद्वान् विजिततममना ऋद्धियुक् सागराऽऽख्यः । आसीदन्तेसदस्य प्रथितबहुतपाः सागरः स(रो वै)सुखाऽऽदिः, शान्तो दान्तो विनीतः क्षितितलविदितः सर्वजीवोपकर्ता ॥ ८६ ॥ (उपजातिः)—अमुष्य शिष्यौ भगवानदासः, स्थानादिकः सागरकश्च जातौ । लोकोक्तिरेषा मयका बहुभ्यो, लोकेभ्य आकर्णि परम्परातः ॥८७॥ (गीतिः)—भगवान् सागरगणिनो, महोपाध्याय–सुमतिसागरगणी। शिष्यो बभूव विद्वान्, प्रख्यातिमान् क्षितितले सर्वत्र ॥८८॥ अस्याऽभवतां शिष्यौ, पन्यास–मणिसागर–मतिसागरौ । विद्वांसौ तावधुना, वरीवृत्येते वसुधां पुनानौ ॥ ८९ ॥ (वसन्ततिलका)—श्रीस्थानसागरगणेः सुविनीतशिष्यः, श्रीमान् प्रधीश्छगनसागरनामकोऽभूत् । श्रीपूर्णसागरगणी प्रथमश्च तस्य, शिष्योऽपरो नवनिधिश्रितसागराऽऽख्यः ॥ ९० ॥ श्रीपूर्णसागरगणेरभवत्सुशिष्यः, श्रीक्षेमसागरगणी बहुकीर्तिशाली । शिष्यस्तदीय–गणि–वल्लभसागराऽऽख्यः, सम्प्रत्यसौ विजयते क्षितिमण्डलेऽस्मिन् ॥ ९१ ॥ किञ्चाऽन्यदप्यहमनेकमुखाच्छृणोमि, यत्तस्य मोहनयुतस्य हि लालकस्य । बन्धुर्गुरोः सुमतिवर्द्धननामधेयो, नाम्नाऽपरेण स हि साहिवचन्द्रकेण ॥ ९२ ॥ प्रख्यातिमानुदधरत्स्त्रयमेव कर्म, तेनाऽऽशु सर्वजनतासु महत्वमापत् । चारित्रसागरगणी समभूदमुष्य, पादाम्बुजाऽमलपरागविलुब्धभृङ्गः ॥९३॥ श्रीमान् प्रतापयुतसागरनामधेयः, शिष्यो बभूव गुणवान् गुरुभक्तिरक्तः । इत्यन्तसर्वमभिधाय जनैश्च पृष्टो, लोकाऽऽग्रहात्स हि चतुःशरघस्रमस्थात् ॥ ९४ ॥

(उपजातिः)—ततो विहृत्याऽऽगतवान् स मूँड–वाऽऽख्यां पुरीं पौरजना महद्भिः । प्रावीविशंश्चारुमहोत्सवैस्ते, व्याख्याच्चिरं सोऽपि विशुद्धधर्मान् ॥ ९५ ॥ कृत्वा विहारं तत एष सूरि–रागत्य तस्थौ खजवालपुर्याम् । पप्रच्छ गच्छाः सकलाः किमेक–गणाऽधिपाद्वा परतोऽप्यभूवन् ? ॥ ९६ ॥ तदोचिवान् सूरिवरस्तमेवं, भद्रैकपट्टे भगवान् स वीरः । श्रीगौतम-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चाऽपि निगद्यते सु–धर्मा द्वितीये परिगण्यते सः ॥ ९७ ॥ अतोऽधुना गौतमवंश्यकाना–मनुक्रमं चात्र विदर्शयामि । वीरप्रभोराद्यगणेश्वरोऽभू–च्छ्रीगौतमस्वामिवरो महीयान् ॥ ९८ ॥ तदीयशिष्यत्वमवाप केशी–कुमार एनं कथयन्ति लोकाः । समुद्रसूरिं समभूत्किलाऽस्य, स्वयम्प्रभः सूरिवरः सुशिष्यः ॥ ९९ ॥ सच्छिष्य एतस्य बभूव रत्न–प्रभाऽभिधाऽऽचार्यवरस्तदित्थम् । परम्परातो ह्युपकेशगच्छ, उत्पेदिवान् मान्यतरश्च लोके ॥ १०० ॥ कोरण्टवालो निरगात्ततोऽस्मात्, ततश्च नाणाऽऽदिकवालगच्छः । चित्राऽऽदिगच्छश्च समाविरासीत्, नाणादिवालाद्विधिपक्षगच्छः॥१०१॥ जातो द्वितीयो वडगच्छकश्च, ह्येतत्स्थवाद्यादिकदेवसूरिः । अचालयन्नागपुरीययुक्त–वडाऽऽदिगच्छप्रयुतां च शाखाम् ॥१०२॥ सौधर्मवंशीयपरम्परेत्थं, वीराद्द्वितीये समभूत्सुधर्मा । जम्बूरभूदेष तृतीयपट्टे, जातस्तुरीये प्रभवाख्यसूरिः ॥ १०३ ॥

(भुजङ्गप्रयातम्)—स शय्यम्भवोऽभूत्ततः पञ्चमे हि, यशोभद्रसूरिर्बभूवैष षष्ठे । अभूत्सप्तमे वादिजेता सुवक्ता, स सम्भूतिसूरिर्महीयान् सुविद्वान् ॥ १०४ ॥ (उपजातिः)—पट्टेऽष्टमेऽभूदिह भद्रबाहुः, श्रीस्थूलिभद्रो नवमे बभूवान् । आचार्यवर्याऽऽर्यमहागिरिः स, जातो हि पट्टे दशमे गरीयान् ॥ १०५ ॥ एकादशे चाऽऽर्यसुहस्तिसूरिः, स द्वादशे सुस्थितसूरिवर्यः । अभूत्तथा सुप्रतिबद्धसूरि–स्त्रयोदशे चाऽभवदिन्द्रदिन्नः ॥ १०६ ॥ चतुर्दशेऽभूदथ दिन्नसूरि–रभूत्सकः पञ्चदशे च पट्टे । विद्वत्तमः सिंहगिरिश्च सूरिः, श्रीवज्रसूरिः किल षोडशेऽभूत् ॥ १०७ ॥ पट्टेऽभवत्सप्तदशे प्रविद्वान्, श्रीवज्रसेनाऽभिधसूरिवर्यः । अष्टादशे धीवरचन्द्रसूरि–रेकोनविंशेऽभवदार्य एषः ॥ १०८ ॥ समन्तभद्राऽभिधसूरिराजः, श्रीदेवसूरिः समभूच्च विंशे । अथैकविंशेऽतुलशक्तिधारी, प्रद्योतनाचार्यशिरोमणिः सः ॥ १०९ ॥ द्वाविंशपट्टेऽभवदार्यमान–देवाऽऽख्यसूरिः परिणू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तविद्यः । पट्टे त्रयोविंश उदारतेजाः, श्रीमानतुङ्गाऽभिधसूरिवर्यः ॥ ११० ॥ श्रीवीरसूरिः समभूच्चतुर्विं–शेऽभूत्ततः श्रीजयदेवसूरिः । स पञ्चविंशेऽजनि चैष देवा–नन्दाऽऽख्यसूरी रस–पक्षपट्टे ॥१११॥ सञ्जातवान् विक्रमनामसूरिः, पट्टे च तस्मिन् स हि सप्तविंशे । प्रादुर्बभूवान् नरसिंहसूरिः, शैलाऽक्षिपट्टेऽधिककीर्तिशाली ॥ ११२ ॥ नन्दाऽक्षिसंख्ये समभूच्च पट्टे, समुद्रसूरिः शशिशुभ्रकीर्तिः । त्रिंशत्तमे चाऽजनि मानदेवः, प्रभावशाली विजयङ्करिष्णुः ॥ ११३ ॥ एक–त्रिपट्टे विबुधप्रभाख्यः, प्राचार्य उत्कृष्टतरो बभूवान् । द्वात्रिंशति प्रादुरभूच्च पट्टे, जयाऽऽदिमन्दाऽभिधसूरिमुख्यः ॥ ११४ ॥ अभूत्त्रयस्त्रिंशति पट्टकेऽसौ, रविप्रभः सूरिगणाऽग्रगण्यः । पट्टे चतुस्त्रिंशति संबभूव, श्रीमान् यशोदेवयुगप्रधानः ॥ ११५ ॥

( द्रुतविलंबितम् )—विमलचन्द्र उदैदथ सूरिराट्, शर-हुताशनसंख्यकपट्टके । स्व-पर-शास्त्र-विशेषकृतश्रमः, सुजनताऽऽदृत–शोभितसद्गुणः ॥ ११६ ॥ ( उपजातिः )—बभूव षट्त्रिंशति देवचन्द्रो, हय-त्रि-पट्टे प्रभु नेमिचन्द्रः । सूरीश्वरोऽस्थादथ पट्टकेऽष्टा–त्रिंशत्तमे चाऽपि महाप्रभावी ॥११७॥ समस्थितो द्योतनसूरिराजो, ग्रहे–त्रिपट्टे समजायताऽसौ । श्रीवर्धमानो भुवि जिष्णुरार्यो, युगप्रधानः शमताऽम्बुराशिः ॥ ११८ ॥ जिनेश्वरः सूरिवरो नभोऽब्धिं पट्टेऽजनिष्टाऽतुलदीप्तिदीप्रः । श्रीबुद्धिपूर्वोऽ-पि बभूव साग–राख्यो हि सूरिर्गुणवज्जनाऽर्घ्यः ॥ ११९ ॥ एकोऽब्धिपट्टे जिनचन्द्रसूरि–र्जिनाऽभयादिः किल देवसूरिः । द्विगब्धिपट्टेऽभवदच्छकीर्ति–रपूर्वशक्तिर्बहुसिद्धविद्यः ॥ १२० ॥ ततोऽभवच्छ्रीजिनवल्लभाऽऽख्यः, सूरिर्गुणाऽऽम्भोनिधिसंख्यपट्टे । युगाऽब्धिपट्टे जिनदत्तसूरि–र्ऋष्यब्धिपट्टे जिनचन्द्रसूरिः ॥१२१॥ इत्थं हि सौधर्मकुलक्रमोऽयं, विद्योतते भुमितलेऽधुनाऽपि । गच्छेषु चाऽयं सततं व्यनक्ति, याथार्थ्यमेतत्सकला विदन्तु ॥१२२॥ ( वसन्ततिलका )—यावन्तमेव भविका



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनघास्त्यजेयू, रागाऽऽदिषट्कमरिवृन्दमनर्थहेतुम् । तावद्भिरेव बहुलाभकरं विभाव्य, संसारबन्धमखिलं क्रमशो विजह्युः ॥ १२३ ॥ (उपजातिः)—इत्यादिसारमुपदिश्य जनांश्च भव्यान्, सन्तर्प्य सर्वहृदयं प्रग एष सूरिः । आगाद्विहृत्य नगरं स हि देशवालं, तत्रत्यसर्वजनताकृतसूत्सवेन ॥ १२४ ॥ अन्तःप्रविश्य भवभीतिहरीमशेष--पापप्रणाशनकरीमददात्सुवाचा । पीयूषतुल्यमधुरां रुचिरां सभायां, सद्देशनामनघ ईड्यवरः स सूरिः ॥ १२५ ॥ तस्माद्विहृत्याऽऽगतवान् समेड--तारोडपुर्यां सह शिष्यवर्गैः । तत्राऽतिरम्या महती सुधर्म--शालाऽस्ति मध्ये त्रिचकास्ति चैत्यम् ॥ १२६ ॥ दृग्भूत--संख्याऽऽर्हतमूर्तिरम्या–ऽऽलयैश्च संशोभिविशालदुर्गम् । श्रीपार्श्वनाथीयमतिप्रशस्यं, तदालुलोकेऽसमया स भक्त्या ॥ १२७ ॥ विश्वाऽद्भुतैतद्रमणीयतीर्था-ऽवलोकनेनैष जनुर्निजं हि । अमंस्त धन्यं त्रिदिनानि तत्र, स्थित्वा चतुर्थे दिवसे व्यहार्षीत् ॥ १२८ ॥ स लावबाग्राममुपेत्य तस्थौ, ततश्च पोल्कपुरे ह्यतिष्ठत् । विहृत्य तस्माद्गुरुराजवर्यः, स चोकडीग्राममुपेत्य तस्थौ ॥ १२९ ॥ ततो विहृत्याऽऽगतवान् स कोश–णाख्यं पुरं तत्र सुचैत्यमेकम् । उपाश्रयश्चाऽस्ति जिनावलोकं, कृत्वा च तस्मिन् स्थितवान् सुखेन ॥ १३० ॥ स मौनपूर्वामिह सञ्चकार, ह्येकादशीं पर्वतीथिं महेन । पीपाडकग्राममथाऽऽजगाम, पौरा भृशं सत्कृतवन्त एनम् ॥१३१॥ बेण्डाऽऽदिकाऽऽतोद्यनिनादपूर्वं, पुरप्रवेशं विदधत्ससङ्घः । कृत्वा च चैत्यत्रयदर्शनं स, उपाश्रयं रम्यमुपाविवेश ॥ १३२ ॥ सद्देशनां तत्र चिरं प्रदाय, सुधायमानां महता स्वरेण । संसारदुष्पारसमुद्रतार–पोतायमानां समतूतुषत्तान् ॥ १३३ ॥ स्थित्वा द्व्यहं तत्र सुखेन सूरि–र्घस्रे तृतीये व्यहरत्ततोऽसौ । कापेडनाम्ना जगति प्रसिद्धं, प्राचीनतीर्थं समुपाजगाम ॥ १३४ ॥ सद्धर्मशाला रचिताऽस्ति तत्र, वप्राऽन्तराले करपञ्चमात्रम् । उच्चैर्दृषद्बद्धसुपीठमस्ति, तन्मध्यभागे गृहचैत्य-

For Private And Personal Use Only

मेकम् ॥ १२५ ॥ चतुर्मुखाऽऽढ्यं शिखराऽतिशोभं, ह्यभ्रंलिहं भूरिविचित्रचित्रम् । द्विपञ्चजैनाऽऽलयसाम्यमात्त--मालोक्य तस्थौ दिवसद्वयं सः ॥ १२६ ॥ साध्व्योर्द्वयोस्तत्र ददौ स दीक्षां, गुर्वीमथाऽतो दिवसे तृतीये । विहृत्य पुर्यामयमोलवीति--नाम्न्यां समागत्य सुखेन तस्थौ ॥ १२७ ॥ ( वसन्ततिलका )—तस्माद्विहृत्य समियाय पुरं स चोप-डाऽऽख्यं पुरं पुरजनैरतिसत्कृतः सन् । धर्मोपदेशपटलैरखिलान् प्रबोध्य, कृत्वा विहारमगमन्निवलीपुरं सः ॥ १२८ ॥ पालीनिवासिसुजना बहवोऽपि तत्र, श्रीसूरिराजमभिवन्दितुमेयिवांसः । तां तामसीं सकलभव्यजनाः सुखेन, न्यूषुश्च तत्र गुरुपत्कजमाश्रयन्तः ॥ १२९ ॥ जाते प्रभातसमये गुरुदेववर्यः, तैः श्रावकाऽऽदि सुजनैः सह संविहृत्य । पालीपुरीमभिययौ धुतकल्मषौघः, पौरास्ततो गुरुसमागम-जातमोदाः ॥ १४० ॥ ( उपजातिः )—सद्धेण्डभेर्यादिक-भानुवादि-त्रैः सन्नदद्भिर्युगपत्समुच्चैः । देध्मीय्य(य)मानैर्बहुभिश्च शङ्खैः, सचित्रचीनांशुकसद्ध्वजैश्च ॥ १४१ ॥ सुश्राविकामङ्गलगीतनादै-र्जयाऽऽरवैर्दीर्घतरैश्च लोकैः । प्रमाणवर्जैर्गुरुराजमेनं, प्रावीविशन् सज्जितसत्पुराऽन्तः ॥ १४२ ॥ ( त्रिभिर्विशेषकम् ) परिभ्रमंस्तत्र पुरे स इत्थं, जिनांश्च पश्यन् प्रतिमन्दिरेषु । लोढीयवासे प्रभुशान्तिनाथ-चैत्यं ददर्शाऽतिमुदं बभार ॥ १४३ ॥ चैत्यस्य वामेऽस्थित कृष्णलाल-लूनावतीया नवधर्म-शाला । उत्तीर्य तस्यां परमोपदेशं, दत्त्वा विशश्राम स सूरिराजः ॥ १४४ ॥ प्रभावनां श्रीफलशर्कराऽऽदिं, लात्वा च सर्वे निजसद्म जग्मुः । गुणान् गुरूणां निगदन्त उच्चै-रात्मन्यसीमां मुदमाप्नुवन्तः ॥ १४५ ॥ सुश्रावकाऽऽदेरधिकाऽऽग्रहेण, शरीरकार्श्याऽऽदिकहेतुना च । आचार्यवर्यः समतिष्ठताऽत्र, प्रायो हि पक्षं प्रतिवासरं सः ॥ १४६ ॥ सद्देशनाभिः सकलांश्च भव्यान्, सुधोपमाभिः प्रतिबोधयन् सः । अथौशियामेलन आगतो हि, दृष्टः पुरा श्रावक एत्य कश्चित् ॥१४७॥ विनीतवेषः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृतवन्दनादि–लब्धप्रसङ्गस्तमपृच्छदेवम् । स्वामिन् ! मयाऽश्रावि यदोशियाऽऽख्य–तीर्थं सुजीर्णं पुनरुद्धार ॥ १४८ ॥ आचष्ट सूरिर्भवदुक्तिरेषा, सत्यैव सोऽवक् करुणानिधेऽहम् । सविस्तरं वृत्तमिदं भवत्तः, संश्रोतुमिच्छामि चिरात्समुत्कः ॥ १४९ ॥ चकशौ च सूरिः शृणु सावधानः, कथामिमां सम्यगहं वदामि । श्रीरूपचन्द्रस्य यतीश्वरस्य, शिष्यो महान् नागपुराऽधिवासी ॥ १५० ॥ श्रीमान् कृती मोहनलालनामा, गुरोर्महेन्द्रस्य जिनादिकस्य । प्रौढप्रतापस्य गिरा विधाय, क्रियोद्धृतिं स (?) विहरंस्त्रिगुप्तः ॥१५१॥ समाययौ योधपुरे महात्मा, बाणाऽग्नि–नन्देन्दुमिते च वर्षे । श्रीसंघबह्वाग्रहतश्च-तुर्मा–सं तस्थिवांस्तत्र महोपदेष्टा ॥ १५२ ॥ ( युग्मम् ) तदा महीयांश्चिरकालिकैत–त्तीर्थं पवित्रं परिजीर्यमाणम् । विलोक्य चित्ते बहुधा प्रखिद्यन्, समागतो योधपुरे सभायाम् ॥ १५३ ॥ ओजस्विनीं तद्विषये प्रभाव–शाली तथाऽदाद्वरदेशनां सः । आकर्ण्य यां सर्वजनास्तदैव, श्रीओशियातीर्थसमुद्दिधीर्षाम् ॥ १५४ ॥ बभ्रुः स्वचित्ते परमेकराजा–रामाऽभिधानो गडिया तदैव । न यावदेतद्वरतीर्थजीर्णो–द्धारस्य कार्यं हि समारभेत ॥ १५५ ॥ ( इन्द्रवंशा )—तावन्न चोष्णीषमहं स्वमूर्धनि, भन्त्स्यामि नो वा पदयोरुपानहौ । सन्धारयिष्यामि कदापि सर्वथा, सद्ब्रह्मचर्यव्रतसंस्थितः सदा ॥१५६॥ (चतुर्भिः कलापकम्)

( उपजातिः )—इति प्रतिज्ञाय गुरुं जगाद, सर्वेषु सभ्येषु निशामयत्सु । प्रदेहि मे नाथ ! तदीयप्रत्या–ख्यानं कृपालो ! भगवन्नवश्यम् ॥१५७॥ अथाऽङ्ग–रामाऽङ्कशशाङ्कवर्षे, गत्वा तदालोकत दुर्दशं सः । क्षिपन्ति तत्राऽवकरं समस्ता, एकान्तकत्वा-त्सकला हदन्ते ॥१५८॥ पामाऽऽकुला उष्ट्रगणाश्च तत्र, तिष्ठन्ति चाऽन्ये पशवः स्वतन्त्राः । तज्जानुमात्राऽवकरैश्च गूथै–र्विहङ्ग-विड्भी रजसा च पूर्णम् ॥ १५९ ॥ अत्यन्तदुर्गन्धवहं तदानीं, विभीषणं चैत्यमपश्यदेषः । तस्योपरिष्टाच्चटकैरसंख्यैः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुग्रीवजातीयखगैरपीत्थम् ॥ १६० ॥ कृतं कुलायं शतशः सहस्रं, जीर्णं प्रभग्नं समुदीक्ष्य चैत्यम् । तदुद्धृतौ यत्नधरः प्रकामं, सकस्तदा कर्मकरानुवाच ॥ १६१ ॥ यूयं हि सर्वं चितसङ्करादि–चैत्यस्थितं शीघ्रमपाकुरुध्वम् । ते तं समूचुर्न वयं किलैत–च्छकपाककृत्यं प्रविद्‌ध्महे भोः ! ॥ १६२ ॥ अथाऽब्रवीत्कर्मकरं स्वकीयं, द्वौ स्वः किल त्वं परिमार्जयैतत् । क्षिपाम्यहं वा परिमार्ज्यहं हि, क्षिप त्वमेवेति तदीयवाक्यम् ॥ १६३ ॥ ( इन्द्रवंशा )—श्रुत्वा स दासः परिगृह्य मार्जनीं, लग्नः प्रमार्ष्टुं क्रमशस्तया सकः । प्रक्षेप्तुमारब्ध वणिग्वरः स्वयं, दृष्ट्वा तदाऽन्येऽपि च कर्तुमुद्यताः ॥ १६४ ॥ (युग्मम्) अन्तर्बहिश्चाऽपि तदैव तस्य, व्यशोधयत्पावनमन्दिरस्य । तदूर्ध्वभागे च ददर्श सोऽथ, नानाविहङ्गाऽण्डशिशुस्थितिं च ॥ १६५ ॥ दृष्ट्वा दयालुर्मनसि व्यशोचीत्, सहस्रशोऽहं कथमत्र जीवान् । पञ्चेन्द्रियाऽऽदीनभिहत्य जानन्, ऊर्ध्वप्रदेशं परिशोधयानि ॥ १६६ ॥ ( युग्मम् ) हिंसामृते शोधनमप्यमुष्य, दुरापमेवास्ति न संशयोऽत्र । कृतिश्च तस्या अतिदुष्करैव, विचिन्तयन्नित्थमसौ हि कुड्ये ॥ १६७ ॥ संस्थापितां भैरवमूर्तिमुग्रां, ददर्श रम्यामथ स प्रदोषे । ताम्बूल–सिन्दूरदशाङ्गधूप–दीपाऽक्षतैलेयसुमालिकाभिः ॥ १६८ ॥ तैलेन नैवेद्यवरेण पूजां, विधाय नीराजनमेतकस्य । कृत्वाऽतिभक्त्या तमयाचतैवं, देव ! प्रभो ! भूरिपरिश्रमेण ॥ १६९ ॥ मया किलैतन्निजशक्त्यशोधि, नाऽर्हामि शेषं परिशोद्धुमस्य । यद्यस्य जीर्णोद्धृतिमिच्छसि त्वं, तर्ह्याशु तत्र स्थितसर्वजीवान् ॥ १७० ॥ निष्काशयाऽनन्तरमाशु चाऽहं, समुद्धृतिं कारयितास्मि देव ! । नो चेदहं जीववधाऽऽदिपापाद्, बिभेमि तस्मादिदमेव याचे ॥ १७१ ॥ ( पञ्चभिः कुलकम् ) स इत्थमभ्यर्थ्य तदग्रतो हि, समस्वपीच्चोषसि जागरित्वा । दृष्ट्वा शकुन्तव्रजनीडमुक्त–मजर्हृषीच्चेतसि तत्प्रभावम् ॥ १७२ ॥ अमन्यताऽसौ ध्रुवमेव शीघ्रं, जीर्णो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रुतिश्चाऽस्य विभाविनीति । निश्चित्य हृष्टः परितो गवेषयं–स्तद्द्वारमेकत्र ददर्श सन्धिम् ॥ १७३ ॥ ( युग्मम् ) ऊर्ध्वादधस्तात्प-
रिदृश्यमानं, विलोक्य तच्छिलिपवरं तदैव । आकार्य सोऽदीदृशदिभ्यवर्यः, सम्प्रेक्षमाणः परितश्च सोऽपि ॥ १७४ ॥ तत्का-
रणं नैव विवेद किञ्चित्, यत्कस्य हेतोर्दृषदत्र दत्ता । स शब्दयित्वा दृषदं प्रचक्रे, मध्येशिलं वर्तुलदीर्घरन्ध्रम् ॥१७५॥ छिद्रेण
तेनैष ददर्श वेदी–स्थितं महावीरजिनेन्द्रबिम्बम् । मनोहरं तर्हि भृशं जहर्ष, रक्तच्छवि श्रेष्ठिवरस्तदैव ॥ १७६ ॥ सर्वत्र सोऽदाद्दर-
कुङ्कुमाक्तं, पत्रं समागाज्जनताऽप्यसंख्या । सर्वैर्यथाशक्ति तदीयजीर्णो–द्धारार्थमर्थं व्यददुः ( मर्थो व्यददे ) सहर्षम् ॥ १७७ ॥
कार्यं समारप्सत मन्दिरस्य, सुधीर्मुनीमः सकलैर्न्ययोजि । तत्रत्यकार्यं सकलं विधातुं, पूजाकरस्तत्र नियोजितस्तैः ॥ १७८ ॥
सौवर्णवर्गैः प्रभुदेहशोभां, वितेनिरे भक्तिभरेण सर्वे । बिम्बान्तरं चापि नवीनमेक–मानाय्य रम्यं महता महेन ॥ १७९ ॥
प्रतिष्ठिपंस्तत्र महाजनास्ते, श्रेयस्करे सौम्यदिने बलिष्ठे । महोपदेष्ट्रा गुरुणा च तेन, समुद्धृते चैत्यवरे हि तस्मिन् ॥ १८० ॥
ततः प्रभृत्येव समस्तलोकेऽतिप्राच्यतीर्थं प्रथितं बभूव । तत्साम्प्रतं देवविमानकल्पं, शोशुभ्यते फाल्गुनशुक्लपक्षे ॥ १८१ ॥
गौरीतिथेर्नागतिथिं हि यावत्, प्रत्यहमागच्छति भूरिलोकः । इत्योशियातीर्थसमुद्धृतेर्हि, संक्षिप्तवार्तामभिधाय सूरिः ॥१८२॥
पालीपुरात्पौषसिते द्वितीया–तिथौ विहृत्याऽऽगतवांश्च तस्मात् । क्रोशैकमात्रस्थितभाखरीति–गिरौ स्थितं चैत्यमुदीक्षितुं सः
॥ १८३ ॥ तत्र स्थिताऽत्यन्तसुरम्यधर्म–शास्ता स्थितोऽसौ गमयाम्बभूव । एकां तमिस्रां तत आजगाम, गुन्दोचनाम्नीं नगरीं
विहृत्य ॥१८४॥ ततो विहृत्य प्रतिपद्य ढोला–राख्यं पुरं तत्र जनैश्च भव्यैः । सुसत्कृतो धर्म्यकथाऽमृतेन, सर्वानतर्पीदुषसि व्य-
हार्षीत् ॥ १८५ ॥ (शार्दूलविक्रीडितम्)—साण्डेरावमुपागतो गुरुवरस्तत्रत्यसंघैर्मुदा, वादित्राऽऽदिकसद्रणै(वै)र्निजपुरं प्रावेशि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हर्षोद्धुरैः । सूरीन्द्रोऽपि ततः सभामधिगतः सद्देशनां दत्तवान्, संसाराऽर्णवतारिणीं शिवसुखानन्दप्रदात्रीमलम् ॥ १८६ ॥
(तोटकम्)—शिवगञ्जपुरीं समियाय ततो, नगरीजनतापरमोत्सवतः । प्रविवेश पुरं तत एष ददा–वुपदेशमलं कलुषाऽपहरम् ॥ १८७ ॥ (उपजातिः)—स्थित्वा त्र्यहं सूरिवरः सुखेन, कृत्वा विहारं तत आजगाम । पोसालियानामपुरं स पौरैः, सुसत्कृतोऽदात्परमोपदेशम् ॥ १८८ ॥ (वंशस्थ)—विहृत्य तस्मादितवान् स पालडीं, समस्तसंघः कृतवान् सुसत्कृतिम् । प्रदत्तवानेष विशेषदेशनां, प्रबुद्धवांस्तत्त्वमशेषमार्हतम् ॥ १८९ ॥ ततः शिरोहीनगरं प्रयातः, प्रवेशयामास पुरीजनस्तम् । बेण्डाऽऽदिकाऽऽतोद्यसुहृद्यघोषै–र्दत्तोपदेशः स्थितवान् दिने द्वे ॥ १९० ॥ सिन्दूरसंज्ञं नगरं ततोऽगात्, पुरीजनारब्धमहामहेन । प्रविश्य लोकान् सुचिरं स सूरि–रुपादिशच्चाऽऽर्हतधर्मसारम् ॥ १९१ ॥ समाययौ मेरुपुरं ततोऽसौ, गुर्वागमोद्भूतविशेषहर्षः । संघः सुचारूत्सवमाशु कृत्वा, प्रावीविशत्तं नगरं महान्तम् ॥ १९२ ॥ सूरीश्वरस्तत्र ददौ सुवाचा, सुधामयीं धार्मिकदेशनां सः । अपार–संसार–सुदुर्ग–कान्ता–रलग्न–दावोपमतामुपेताम् (दावानलवारिकल्पाम्) ॥ १९३ ॥ इतः समागात् सणवाडपुर्यां, प्रबोध्य लोकांस्तत आजगन्वान् । स पालडीमत्र महोपदेशैः, प्राबूबुधत्सर्वजनांश्च तत्त्वम् ॥ १९४ ॥ ततो विहारं प्रविधाय सूरि–र्हणादरायां पुरि चाऽऽयताऽसौ । ततो विहृत्याऽर्बुदभूधरोप–रिष्टादितो देवलयुक्तवाटम् ॥ १९५ ॥
(मालिनी)—अचलगढसुयात्रामप्यसौ सूरिराजो, ह्यकृत सकलशिष्यैः सार्धमत्यन्तभक्त्या । पुनरपि तत आगाद्देवलार्दिं च वाटं, त्रिदिवसमिह तस्थौ पूज्यपादारविन्दः ॥ १९६ ॥ (उपजातिः)—समागमत्सूर्यपुरान्महेभ्यः, सिद्धाऽचलाऽन्तेप्सितसुप्रबन्धम् । कृत्वा न्यवर्तिष्ट ततोऽसकौ हि, हणादरायां पुनराजगाम ॥ १९७ ॥ ततो दमाणीनगरीमगच्छत्, ततश्च-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लित्वा समगाल्लुणोदम् । अथाऽऽगमद्रेवदडं पुरं स, प्रावेशि पौरैर्विपुलोत्सवेन ॥ १९८ ॥ क्रोशान्तराले वरिवर्ति तस्मा– जीरावलापार्श्वजिनेशतीर्थः(र्थम्) । तत्राऽपि गत्वा प्रविधाय यात्रां, निवृत्य चात्राऽऽगतवान् पुनः सः ॥१९९॥ ब्रह्माणपूर्वं पुरमेष गत्वा, पुरीमपूर्वां म(न)गरीं च बाढाम् । मण्डारनाम्नीं नगरीं समेत्य, दिनद्वयं सोऽत्र सुखेन तस्थौ ॥ २०० ॥ इतश्चलित्वा गतवान् स पाँथा–बाडाऽभिधानं नगरं च तत्र । सच्चक्रुरेनं सकलाश्च पौरा, ददौ च सोऽप्यत्र महोपदेशम् ॥ २०१ ॥ प्रस्थाय चेतः समगात्स कूँचा–वाडां ततश्चाऽपि कृतप्रयाणः । समध्यवात्सीद्धरतं पुरं स, डीसानिवेशं तत आजगन्वान् ॥ २०२ ॥ कृतप्रयाणस्तत इद्धतेजा, बडाबलं नाम पुरं समागात् । न्युष्यैकरात्रं विहरंस्ततोऽय–माथिष्ट सूरिर्भिलडीपुरं हि ॥ २०३ ॥ सद्धर्मशाला बहिरस्ति पुर्या, मध्ये च तस्या बृहदस्ति चैत्यम् । वर्वर्त्ति तस्मिन् प्रभुपार्श्वनाथ–श्चैत्यान्तरं चाऽपि विभाति तत्र ॥ २०४ ॥ उपाश्रयाऽदीर्घ(?)कियत्सुधर्म–शाला विराजन्ति महापुरेऽत्र । अत्रत्ययात्रां विधिवद्विधाय, पृथ्वीपुरं चाऽऽगतवान्मुनीन्द्रः ॥ २०५ ॥ ततः प्रयातः प्रतिपेदिवान् स, मण्डारनाम्नीं नगरीमितोऽपि । उपेयिवान् संघपुरं पुरं स, ततोऽपि चारूपपुरं प्रपेदे ॥ २०६ ॥ प्राचीनमूर्तिः प्रभुपार्श्वनाथ–स्याऽस्त्यत्र रम्या प्रकटप्रभावा । तदीयपृष्ठासनलेखतो हि, सा पञ्चलक्षाधिकवत्सरीया ॥ २०७ ॥ प्रतीयते ग्रामसमीप एव, वेवेत्ति रम्या गुरुधर्मशाला । तन्मध्यदेशे प्रभुपार्श्वनाथ-- चैत्यं सुरम्यं विचकास्ति दीर्घम् ॥ २०८ ॥ अध्युष्य घस्रद्वयमेषकोऽत्र, कृत्वा च तत्तीर्थविशेषयात्राम् । विहृत्य तस्मादण- हिल्लपूर्व--पुरं समागात्सह शिष्यवर्गैः ॥ २०९ ॥ पौरा अपूर्वोत्स्त(त्स)वतः किलैत--त्पुरप्रवेशं रुचिरं प्रचक्रुः । अष्टापदीयोत्तम- चैत्यशोभि--तद्धर्मशालामयमध्यतिष्ठत् ॥ २१० ॥ दिनानि चत्वारि स तस्थिवान् हि, यात्रां प्रकुर्वन् सुजनांश्च तत्र । सद्देश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नाभिः सुधया समाभि--राचार्यवर्यः प्रतिबोधयन् हि ॥ २११ ॥ विहृत्य तस्मात्कुणघेरकादि--मार्गाऽऽगताऽनेकपुरं विलंघ्य । समाययौ जम्मणयुकुपुरं स, हारेजमागच्छदितश्चलित्वा ॥ २१२ ॥ विहृत्य तस्मादभिगम्य मूज--पुरं ततोऽप्येष कृतप्रयाणः । शङ्खेश्वरं तीर्थमयं जगन्वान्, मध्येपुरं दुर्गमदुर्गरुद्धा ॥ २१३ ॥ वरीवृतीत्येकविशालधर्म–शाला तदन्तर्महदस्ति चैत्यम् । शङ्खेश्वरः श्रीप्रभुपार्श्वनाथो, वैमानिकाऽऽभं तदलङ्करोति ॥ २१४ ॥ ( युग्मम् ) अन्याऽपि तत्रैव विभाति गुर्वी, सद्धर्मशाला नवनिर्मिता च । तिस्रः किलैताः परिषन्ति तत्र, दृश्याः प्रशस्याः सुलभाः समेषाम् ॥ २१५ ॥ द्वेऽह्नी(अह्नी) विशश्राम स तत्र सूरिः, कुर्वाण एतद्वरतीर्थयात्राम्। विहृत्य पञ्चासरमेत्य तस्थौ, ततश्चलित्वा समगाद्दशाडाम् ॥ २१६ ॥ स पाटडीग्राममियाय तत्र, प्रबोध्य लोकान् परमोपदेशैः । विहृत्य तस्मादुपरि प्रयुक्त--पालाऽभिधानं नगरं प्रपेदे ॥ २१७ ॥

( वसन्ततिलका )—तत्राऽस्ति रम्यबहुविस्तृतधर्मशाला, वैमानिकाऽऽभ--जिनमन्दिरमस्त्यपूर्वम् । श्रीनाभिनन्दनजिनेश्वर-बिम्बमत्र, सञ्चाकचीति सकलेप्सिततूर्णदोहम् ॥ २१८ ॥ आलोक्य तन्नयनतर्पणकारि बिम्बं, लावण्यपुञ्जमिव शश्वदसीमशोभम् । स्वान्ते ह्यगद्यमतिमोदभरं बभार, तस्माद्वजाणनगरं प्रविहृत्य यातः ॥ २१९ ॥ ( उपगीतिः )—ततश्चलन् मालवणं समेत्य, स तस्थिवान् सत्पुरि खेरवायाम् । गच्छन्नितो मार्गगताऽङ्कवालि--यामेत्य तस्थौ पुरि सद्वणायाम् ॥ २२० ॥ आणन्दरा--राजपुरादिनैकं, हित्वा पुरं चैद्धदवाननाम । पुरं स पौरैरिह सत्कृतोऽभूत्, धर्मोपदेशं कृतवांश्च सूरिः ॥ २२१ ॥ स खारवामेत्य विहृत्य तस्मा–दस्थाद्वलद्दाणपुरे सुखेन । प्रस्थाय तस्मात् स्थितवान् स चूडा--पुरे जनानामधिकाऽऽग्रहेण ॥ २२२ ॥ आगादितो राणपुरं विहृत्य, ह्यागत्य तस्मान्नगरे खसेऽस्थात् । कृत्वा विहारं क्रमशस्ततोऽपि, तस्थौ स लाठीद-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

डपत्तने हि ॥ २२३ ॥ ( मालिनी )—रतनपुरपुरीमागत्य संस्थाय सूरिः, पुरवरमुमरालामागतस्तत्र तस्थौ । तदनु च पिपराली-वावडीत्यादिनाना--लघु--गुरु--पुर--शोभां वीक्षमाणो विजह्रे ॥ २२४ ॥ ( उपजातिः )—सणोसरानाम पुरं समेत्य, व्यस्थैत्स एकां रजनीं सुखेन । ततो नवग्राममुपाययौ स, आकोलिकेत्यादिपथिस्थितानि ॥ २२५ ॥ विसृज्य नैकानि सुपत्त-नानि, सूरीश्वरोऽसौ क्रमशः प्रभावी । समध्यगच्छज्ञमणाद्विाव--पुरं वरं सर्वगुणप्रधानम् ॥ २२६ ॥

( वसन्ततिलका )—श्रीपादलिप्तपुरवासिजनाः कियन्तः, श्रीमद्गुरोरभिमुखं प्रविलोकनार्थम् । तत्राऽऽययुर्विदधिरे जिन-पूजनाऽऽदि, श्रीसंघभक्तिमुचितां परमोत्सवैस्ते ॥ २२७ ॥ ( उपजातिः )—समध्यवात्सू रजनीं च सर्वे, तत्रैव तां भव्यजनाः समेताः । प्राभातिकं कृत्यमशेषमेष, प्रतिक्रमाऽऽदिप्रतिलेखनान्तम् ॥२२८॥ विधाय तस्मात्परिसंविहृत्य, पादोनसप्ताऽष्टघटी-निनादे । श्रीपादलिप्ताऽन्तिकवाटिकाया--मागत्य तस्थौ मुनिराजवर्यः ॥२२९॥ (युग्मम् )॥ वैदेशिकाः पौरजनाश्च सर्वे, सहैव बेण्डाऽऽदिकभानुवाद्यैः । नानद्यमानैर्युगपद्ध्वजाद्यैः, शङ्खाऽऽरवैस्तारजयप्रणादैः ॥ २३० ॥ वितत्य चारूत्सवमुत्कटं हि, ययुश्च तत्राऽभिमुखं गुरूणाम् । अथैष सर्वैः सह सूरिराजः, प्रस्थाय तस्मात्पुरि राजमार्गैः ॥२३१॥ चतुर्विधैः संघजनैः सुजुष्टः, प्रति-स्थलं तोरणबन्धनाऽऽदेः । शोभामपूर्वां पुर ईक्षमाणो, गृह्णंश्च पौराऽर्चनवन्दनादि ॥ २३२ ॥ इत्थं महाऽऽडम्बरतः स सूरिः, परिभ्रमन् मन्दिरमीक्षमाणः । कल्याणसौधान्तिकमाजगाम, समागतं तत्समयं विवेद ॥ २३३ ॥ वाज्यद्रिनन्दक्षितिहाय-नीय–तपस्य–शुक्लप्रतिपत्तिथौ हि । पुर्या बहिर्दक्षिणदिग्विभागे, कल्याणयुक्तं भवनं विशालम् ॥ २३४ ॥ आचार्यवर्यो जिन-कीर्तिसूरिः, शुभे मुहूर्त्ते नववादने हि । पादारविन्देन शुभेन तद्धि, प्रविश्य पूतं कृतवान् महात्मा ॥ २३५ ॥

For Private And Personal Use Only

(इन्द्रवंशा)—निर्मापिता सूर्यपुराऽधिवासिना, जह्वेरिकश्रेष्ठिवरस्य सूनुना । कल्याणचन्द्रस्य महासमृद्धिना, श्रीप्रेमचन्द्रेण सुपुण्यशालिना ॥२३६॥ (आर्या)—खरतरगच्छीयजैन--धर्मशाला--गुर्वीं तामधिगतः । सूरिर्दत्त्वा मङ्गल--मयदेशनां जनानतू तुषत् ॥२३७॥ (युग्मम्) (उपजातिः)—प्रभावनां सर्वजना गृहीत्वा, स्वस्वाऽऽलयं जग्मुरतीव हृष्टाः । जिनार्चनं गौरवपूजनं च, बभूव तस्मिन्नतिविस्तरं हि ॥२३८॥ जिनेश्वराङ्गीरचनाऽतिचित्रा, सौवर्णसद्राजतवर्गकाद्यैः । रात्रौ कृतं जागरणं च भव्यैः, सद्धर्मकार्यं विविधं वितेनुः ॥ २३९ ॥ भक्तिं गुरूणां महतीं प्रचक्रुः, सम्प्रैदिधञ्छासनमप्यशेषाः । शैलाऽष्ट–नन्द[१९८८]–क्षितिवत्सरीय–वर्षानिवासे सकलव्ययश्च ॥ २४० ॥ तद्धर्मशालापतिरेव चक्रे, महेभ्यमुख्यः सुरताऽधिवासी । श्रीप्रेमचन्द्रः शुभकृत्यरक्तः, कल्याणचन्द्राख्यमहेभ्यपुत्रः ॥ २४१ ॥ (युग्मम्) पर्यूषणाराधनमर्हदर्चां, प्रभावनां भूरितपांसि तत्र । भावप्रवृद्ध्या व्यदधुः समस्ता–स्तत्रोपधानं विधिवद्बभूव ॥ २४२ ॥ तस्याऽवसाने परिधापनं च, स्रजामभूदत्र महामहेन । औज़ तथा चैत्रिकपर्व सम्यक्, षड्द्वादशक्रोशपरिक्रमं च ॥ २४३ ॥ चैत्यप्रपाटीभ्रमणं महेन, पुण्योपचायं बहुलव्ययेन । कृत्वा परैश्चाऽपि हि कारयित्वा, सानन्दमाचार्यपदौ प्रणम्य ॥ २४४ ॥ सुश्राविका सा रतनाऽभिधाना, लीलावती सद्गुणताऽभिरामा । पद्मावती पद्मदलायताक्षी, सौभाग्यलावण्यमयी सुशीला ॥२४५॥ सुश्रावकीयाऽखिलधर्मपाली, श्रीपानचन्द्रः सुकृतप्रसक्तः । फतेहचन्द्राऽऽदिकसर्वलोका, निवृत्य जग्मुः सुरतं ततस्ते ॥ २४६ ॥ (त्रिभिर्विशेषकम्) ग्रहाऽद्रि–रन्ध्र[१९८९]–क्षितिवत्सरीय–वर्षर्तुवासं प्रविधातुमिच्छुः । आषाढशुक्ले गिरिशस्य तिथ्यां, श्रीमद्गुरोरन्तिकमाजगाम ॥ २४७ ॥ श्रीकेसरीसूनुरतुच्छबुद्धिः, श्रीपानचन्द्रः सह धर्मपत्न्या । अत्र स्थितोऽसौ चतुरश्च मासा–नाहारपानाऽऽदिकसर्वलाभम् ॥ २४८ ॥ ददौ मुनिभ्यः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिघस्रमत्र, प्रभावना-पूजन-सत्तपांसि । स्वधर्मिवात्सल्यमनेकमत्र, चक्रे यथावत्सुकृताऽभिलाषी ॥ २४९ ॥ (युग्मम्) पर्यूषणापर्वणि चागते तु, श्रीश्रेष्ठिनी सूर्यपुरादिहैत्य । सार्धं कुटुम्बै रतनाऽभिधाना, स्वधर्मशालामधितस्थुषी सा ॥२५०॥ क्रमाऽऽगतं पर्व सुखेन सम्य-गाराध्य संश्रुत्य गुरोरमुष्य । सद्देशनां हृष्टमना भवन्ती, सा कार्तिकीं यावदिहैव तस्थौ ॥२५१॥ (युग्मम्) ॥ सुश्राविकास्ता रतनाऽभिधाना, लीलावती कार्तिकपूर्णिमायाम् । पद्मावती पद्ममुखी च पुष्पा-वती च सुश्रावकपानचन्द्रः ॥ २५२ ॥ श्रीकेसरीचन्द्र-फतेहचन्द्र-श्रीप्रेमचन्द्रा मुदिताश्च सर्वे । सिद्धाऽद्रियात्रां विधिवद्विधाय, नत्वा गुरून् सूर्यपुरं त आगुः ॥ २५३ ॥ (युग्मम्) शैलाऽष्ट-नन्देन्दुमितप्रवर्षे, जह्वेरिवंश्यः सुरते निवासी । भग्वाख्यपुत्रः स हि पानचन्द-स्तस्थौ चतुर्मासमिहेभ्यमुख्यः ॥ २५४ ॥ पुत्री तदीया विधवा सुशीला, सरस्वतीनाम सका दधाना । सहाऽऽगताऽऽसीद्-निशं स्वधर्म-कृत्येषु सक्ता गुरुदेवभक्ता ॥ २५५ ॥ सत्पाकशालां न्ययुनक् च तत्र, नानाविधस्वादिमखाद्यपेयम् । सम्पाच्य पक्त्रा प्रतिवासरं स, ददान आसीच्छ्रमणादिकेभ्यः ॥ २५६ ॥ प्रारब्धमेतत्किल पात्रदानं, कदापि विच्छेदमवाप नैव । यावत्स्थितिस्तस्य बभूव ताव-च्चचाल नित्यं स्वधनव्ययेन ॥ २५७ ॥ वियन्यथाशक्ति धनं चतुर्मा-सीयानि पर्वाणि च वात्सराणि । यथाविधानं सकलानि चक्रे, प्रमादमुक्तः स हि पानचन्द्रः ॥ २५८ ॥ तदात्मजोऽप्यत्र फकीरचन्द्रः, सरस्वती सा दुहिताऽप्यमुष्य । लीलावती पुत्रवधूरपीमे, भक्त्योपधानं तप आरराधुः ॥ २५९ ॥ मालासमारोपणजातचारु-महोत्सवे बोलिकया महेभ्यः । मुद्रासहस्रं प्रवितीर्य तत्र, फकीरचन्द्रः प्रथमं सुमालाम् ॥ २६० ॥ सम्पर्यधादस्य वधूस्ततश्च, लीलावती रम्यतरां सुमालाम् । सरस्वती सा तदनन्तरं हि, मालां विशालां बिभराश्चकार ॥ २६१ ॥ निशीथिनीजागरणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुबोली, प्रभावना-पूजन-संघभक्तीः। सर्वं तदेतद्बहुशंसनीयं, महोत्सवं चारुतरं व्यधत्त ॥ २६२ ॥ सरस्वती शीलवती सुबुद्धिः, प्रत्यब्दमत्रस्थितमूलचैत्ये। चैत्रीयशुक्लप्रतिपत्तिथौ हि, जिनार्चनार्थं द्रविणं न्ययुंक्त ॥ २६३ ॥ यावत्क्षितौ चन्द्र-दिवाकरौ तौ, स्यातां हि तावत्प्रतिवर्षपूजा। शत्रुञ्जयाद्रावचला तदीया, युगादिनाथस्य जिनेश्वरस्य ॥ २६४ ॥ चैत्रीय-पर्वाण्यथ संविधाय, कृत्वौलिकापर्वविशेषमेते। वैशाखशुक्लाक्षयसत्तृतीया-माराध्य नत्वा गुरुदेवपादौ ॥ २६५ ॥ विचि-न्तयन्तो हृदि तीर्थराजं, गुरोः पदाऽब्जं बहुशः स्मरन्तः। मोमुद्यमानाः सकला निवृत्य, जग्मुः स्वकीयं नगरं प्रसन्नाः ॥ २६६ ॥ अमुष्य वंश्यः किल भाइदासः, शैल-द्वि-वस्वेकमिताऽब्दके च। जिनादिलाभाऽभिधसूरिवाचा, मुद्रासहस्रै रस-राम-संख्यैः ॥ २६७ ॥ (वसन्ततिलका)—भूमित्रयाऽऽढ्यमतिसुन्दरमन्दिरं हि, निर्माप्य तत्र नवबिम्बमतिष्ठिपत्सः। श्रीमद्विभोर्दशमशीतलनाथकस्य, संकारिताञ्जनशलाकमुदारबुद्धिः ॥ २६८ ॥ (उपजातिः)—वेदिप्रतिष्ठामपि कारयित्वा, चैत्याऽन्तिके चैकमुपाश्रयं च। ततश्च तं श्रीजिनलाभसूरेः, समार्पयत्सादरमिभ्यवर्यः ॥ २६९ ॥

(वसन्ततिलका)—आरभ्य तद्दिवसमद्यदिनं हि यावत्, सङ्कथ्यते च स हि शीतल [सद्वाटिकां] वाटिकेति। पुष्पालवाल-रमणीयतमा कृता सा, श्रीमज्जिनेशपरिपूजनहेतवे हि ॥२७०॥ पट्टावली(लीं)निगदितामथ दर्शयामि, यत्पल्लि(लीं)कानगर-सत्य-पुरादिपूर्षु। पर्यट्य राधनपुरं समुपेत्य सूरिः, शङ्खेश्वरप्रभुवरं जिनपार्श्वनाथम् ॥ २७१ ॥ (उपजातिः)—आलोक्य सच्छ्रेष्ठि-गुलाबचन्द-श्रीभाइदासादिजनाऽऽग्रहेण। समागमत्सूर्यपुरं विहृत्य, तुरङ्ग-पक्षाऽद्रिसुधांशुवर्षे ॥ २७२ ॥ (युग्मम्)

(वसन्ततिलका)—आद्यन्वयप्रभवसर्वमहेभ्यमुख्य-श्रीनेमिदासशुभनन्दनभाइदासैः। सङ्कारिते त्रिधरसुन्दरमन्दिरे हि,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राधे सिते हरितिथौ शशिनन्दनाऽहे ॥ २७३ ॥ ( आर्या )—शीतलनाथ–शेषफणि–पार्श्वनाथ–गौडीपार्श्वनाथाऽऽदि । एकाऽशीत्यधिकशतं, बिम्बम्प्रत्यतिष्ठिपन्निर्विघ्नम् ॥ २७४ ॥ ( उपजातिः )—वस्वक्षिशैलेन्दुमिते च [१८२८] वर्षे, वैशाखमासे धवले च पक्षे । गोविन्दतिथ्यां बुधवासरे हि, श्रीत्रैशलेयप्रमुखाऽर्हताश्च ॥ २७५ ॥ बिम्बक्ष्यशीतिं समतिष्ठिपत्स, तत्रैव चैत्ये कमनीयशोभे । आचार्यवर्यो जिनलाभसूरिः, प्रज्ञाऽधिकः सर्वजनप्रतिष्ठः ॥ २७६ ॥ (युग्मम्)॥ इत्थं जिनेशाऽऽलय–बिम्बनिर्मा–पणप्रतिष्ठाऽञ्जनयुक्छलाकाम् । श्रीसंघभक्तिं प्रविधाय तत्र, प्रागुक्तसंख्यानि [३६००] वसूनि स व्यैत् ॥ २७७ ॥

( भुजंगप्रयातम् )—ततो राजपूर्वं नगरं स सूरि–स्तद्भावपूर्वं नगरं समेत्य । घोघादिके बन्दर ऐक्षताऽसौ, श्रीपार्श्वनाथं नवखण्डपूर्वम् ॥ २७८ ॥ ( उपजातिः )—विहृत्य तस्मादथ सोऽभिपेदे, सिद्धाचलं शिष्यगणैः सुजुष्टः । व्योम–त्रि–वस्वेक-मिते [१८३०] सुवर्षे, तपोसिते नागतिथौ सुरेज्ये ॥ २७९ ॥ ( स्रग्धरा )—शिष्यैः सद्भिः समेतः शर–हयमुनिभिः सूरिवृन्दाऽग्रगामी, यात्रां सिद्धाचलीयामकृत हृदि महामोदसम्भारमार । नत्वा स्तुत्वा चिरं तम्प्रथमजिनपतिं सादरं भूरिभक्त्या, ह्यागत्योपत्य-कायां धनपतिककुभि प्रायते चत्वरे हि ॥ २८० ॥ ( वसन्ततिलका )—भ्राजिष्णुदेवकुलिकाऽश्चितवेदिकायां, भूपत्यकब्बर-विबोधकसद्गुरोश्च । आचार्यवर्यजिनपूर्वकचन्द्रसूरेः, पादारविन्दयुगले विधिना महेन ॥ २८१ ॥ ( उपजातिः )—संस्थाप्य स श्रीजिनलाभसूरि–श्चिरं जगत्यां प्रतिबोध्य भव्यान् । चिराय सम्पाल्य सुसंयमं च, स्वर्धाम सम्प्राप समाधिनाऽन्ते ॥ २८२ ॥ ( युग्मम् ) प्रागुक्तवंशीयपरम्परायां, जातो महेभ्यः स हि पानचन्द्रः । भग्वाख्यसच्छ्रेष्ठिवरस्य पुत्रः, पूर्णाऽऽग्रहाच्छ्रीजिन-कीर्तिसूरिम् ॥ २८३ ॥ प्रज्ञावतामादिममर्हणीयं, स्वीयाऽन्यदीयाऽऽगमवेदिवर्यम् । अज्ञानतामिस्रदिनेशकल्पं, युग्मं चतुर्मास-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मतिष्ठिपत्सः ॥ २८४ ॥ ( मालिनी )—जगति विदितकीर्तिस्तस्य शुद्धोपदेशाद्, व्ययमकृत सुधर्मोद्यापने शुद्धभावः । नवपदतपसो हि स्फारपुण्यप्रदस्य, कृतदुरितवनालीलग्नदावानलस्य ॥ २८५ ॥ तदनु सुकृतशाली ज्ञानयुक्पञ्चमीत्य–भिधतपस उदारप्राप्तभावप्रकर्षः । दृढतररमणीयज्ञानकोशं विधाय, ह्यकृत विविधविज्ञानोपचार्यं च तस्मिन् ॥ २८६ ॥

( उपजातिः )—प्राकारि तच्छीतलनाथजीर्ण–त्रिभूमचैत्यस्य समुद्धृतिश्च । उपाश्रयं प्राक्तनमुद्दधार, चैत्यादिनानाविधधर्मकृत्ये ॥२८७॥ [१९८८]वस्वष्ट–[१९८९]रन्ध्राऽष्ट–[१९९०]वियन्नवाऽङ्क–भूहायनेषु क्रमशो बभूव । महोपधानं प्रतिवर्षमेषु, संख्यातदाराधकसज्जनानाम् ॥२८८॥ [१२५]बाणाऽक्षि–भू-पञ्च-धरा-[१५५]शशाऽङ्क–युग्माऽक्षि–[१२२]चन्द्रप्रमिता क्रमेण । रवाऽङ्कग्रहे[१९९०]न्दुप्रमिताऽब्दकीय–वर्षर्तुसंवर्णनकप्रसङ्गः ॥२८९॥ यातोऽस्ति तस्मादहमेतदत्र, क्रमाद्यथाबुद्धि विवर्णयामि । यथा हि बिन्द्वङ्कनवेन्दुवर्षे, श्रीसंघवीदानमलाऽभिधानः ॥२९०॥ ( गीतिः )—जेसलमेरनिवस्ता, सदोशवंशीय–बृहच्छाखीयः । सार्धं कुटुम्बवर्गैः, शत्रुञ्जयमहातीर्थमायातः ॥२९१॥ (पञ्चभिः कुलकम्) (उपजातिः)—स तीर्थराजं सुगुरूंश्च शश्वत्, विवन्दिषुश्चाऽत्र सुखेन तस्थौ । गिरीशतिथ्यां शुचिशुक्लपक्षे, वर्षर्तुवासप्रविधित्सया हि ॥ २९२ ॥ स पाकशालां महतीं नियुज्य, सनातनीं दानमिह प्रदातुम् । एकाशिनामाम्बिलकारिणां च, सत्पौषधाऽऽदिव्रतिनां प्रलग्नः ॥२९३॥ सामायिकाऽऽराधनतत्पराणां, परिक्रमाऽनुष्ठितिकारकाणाम् । देशावकाशव्रतकृज्जनानां, व्याख्याननित्यश्रुतिकारिणां च ॥ २९४ ॥ (मालिनी)—नवनवतिसुयात्राकारिभव्यात्मकानां, रिपुजिति नदिकायां स्नायिनां देहिनां च । तदुदकभृतकुम्भैः पञ्चकस्नापकानां, ददिह परिजग्धिं सादरं प्रत्यहं सः ॥२९५॥ ( युग्मम् )

( उपजातिः )—संस्थाप्य सोऽस्मिन् महतीं च पाक–शालां तदायातमुनिव्रजेभ्यः । नानाविधप्रासुकखाद्यपेयं, दातुं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रलग्नः प्रतिवासरं हि ॥ २९६ ॥ प्रायः सदैकाशनमेव कुर्व–न्नायंबिलं पौषधसद्व्रती सन् । सामायिकं नित्यप्रतिक्रमं च,
देशावकाशिव्रतमिभ्यवर्यः ॥ २९७ ॥ सद्देशनायाः श्रवणं सदैव श्रीतीर्थनाथीयनवांङ्कयात्राम् । स्नात्वा च शत्रुञ्जयसत्तटिन्यां,
तदम्बुना पञ्चजिनाऽभिषेकम् ॥ २९८ ॥ ( शालिनी )—अर्कक्रोशीं क्रोशषण्मात्रकीं च, पञ्चक्रोशीमप्यसौ संव्यधत्त । त्रैक्रोशीं
तां सार्धकक्रोशयात्रां, भक्त्युद्रेकाच्छ्रेष्ठिवर्यो यथावत् ॥ २९९ ॥ ( त्रिभिर्विशेषकम् ) ( उपजातिः )—प्रदक्षिणं रन्ध्रनवंप्रमाण–
मियत्प्रकारीं जिनराजपूजाम् । श्रीसंघभक्तिं कृतवान् क्षमाश्र–मणं गरिष्ठां रथकीययात्राम् ॥ ३०० ॥ साधर्मिवात्सल्यमनेक-
मत्र, ह्युपत्यकायामपि पूर्णभक्तिम् । नगेन्द्रपूजामपि सोऽत्र चक्रे, भवाऽर्चनं चैष चकार सम्यक् ॥ ३०१ ॥ अनेकटोलीमुप-
धाननाम, तपश्च मालापरिधापनस्य । महोत्सवं चारुतरं विधाय, सानन्दमाचार्यवरस्य तस्य ॥ ३०२ ॥ सद्धर्मलाभाऽऽशिष-
माददानः, कुटुम्बवर्गैः सह तीर्थनाथम् । गुरूंश्च नत्वा मुहुरेष भक्त्या, गेहं स्वकीयं पुनराजगाम ॥ ३०३ ॥ ( युग्मम् )
श्रीपूज्यकाचार्यमहोपदेशाद्, दादाजितोऽत्यन्तसुजीर्णचैत्यम् । समुद्धाराऽतिविशालमत्र, सद्ब्रह्मचर्याश्रममुत्तमं च ॥ ३०४ ॥
( वसन्ततिलका )—कल्याणयुक्तभवनाऽभिधधर्मशाला, चान्यापि चन्द्रभवनाऽभिधया प्रसिद्धा । प्राकारि गच्छबहुधोन्नति–
हेतुनाऽत्र, प्रख्यातिमत्खरतराऽऽदिकगच्छकीयैः ॥ ३०५ ॥ श्रीप्रेमकर्णशुभनाममरोटिकेन, धीमज्जनाऽग्रगणनीयशुभाशयेन ।
सद्धर्मकारिमतिना गुणिनाऽतिनुन्नैः, श्रीसंघकैश्च सकलैर्बहुलव्ययेन ॥ ३०६ ॥ ( युग्मम् ) ( उपजातिः )—इतश्च सज्जेसलमे-
रवासि–नो बाफणागोत्रसमुद्भवश्च । बृहत्प्रशाखस्य हि संघविश्री–मच्चन्द्रमल्लस्य सुधर्मपत्नी ॥ ३०७ ॥ नाम्ना प्रसिद्धा फुल-
कूँवरीति, सच्छ्रेष्ठिनी स्वीयगुमास्तमेकम् । शत्रुञ्जयेऽत्यन्तपवित्रतीर्थे, सम्प्रेष्य वस्वष्टनवैकवर्षे ॥ ३०८ ॥ राधे सिते पन्नग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राजतिथ्यां, समारम्भद्भवनस्य खात्रम् । वियन्नत्राऽङ्कक्षितिहायने च, सा धर्मशाला समपादि पौष्याम् ॥ ३०९ ॥ ( त्रिभिर्विशेषकम् ) तस्याः प्रवेशे त्विह कालिकाता-पुरात्समागात्स्वयमप्यसौ हि । शुभे मुहूर्ते प्रविवेश तस्यां, तद्वास्तुपूजादि विधाय सा वै ॥ ३१० ॥ तदर्थमारब्ध-विशेष-चारु-महोत्सवे रत्नललामपुर्याः । सच्छ्रेष्ठिनीदत्तकपुत्रराय-बहादुरः श्रेष्ठिगणाऽग्रगण्यः ॥ ३११ ॥ श्रीकेशरीसिंहदिवानपूर्व-बहादुरः सर्वहरित्प्रसिद्धः । सुश्रावकः शासनदीप्तिकारी, धीमान् दयावान् गुणवान् महीयान् ॥ ३१२ ॥ सञ्जातिरागाद् गुरुदेव-तीर्थ-सन्मातृपादाम्बुजवन्दनाय । स धर्मशालां प्रविलोक्य रम्यामजर्हषीच्छ्रेष्ठिवरः प्रकामम् ॥ ३१३ ॥ ( त्रिभिर्विशेषकम् ) षट्सप्तघस्रानिह तस्थिवान् स, यात्रां प्रकुर्वन् प्रतिवासरं च । श्रीमद्गुरोरस्य महोपदेशं, सदैव शृण्वन्नतिमोदमानः ॥ ३१४ ॥ प्रयाणकाले सकुटुम्बकः स, आचार्यवर्याऽन्तिकमाजगाम । गुरून् प्रणन्तुं तमुवाच तर्हि, सूरीश्वरः श्रीजिनकीर्तिसूरिः ॥ ३१५ ॥ महेभ्यराज ! प्रथमः सुशिष्यो, विद्वत्तमश्चैष वरीवृतीति । अस्मै तपस्ये धवले सुपक्षे, तिथावहेर्भानुदिनेऽतिरम्ये ॥ ३१६ ॥ दित्सामि चाचार्यपदं किलाऽहं, वार्धक्यमागान्मम साम्प्रतं हि । सोऽप्यब्रवीन्नाथ ! विवेकिनस्तेऽ-वश्यं विधातुं घटते तदेतत् ॥ ३१७ ॥ ( युग्मम् ) श्रुत्वा किलैतामतिहर्षवार्तां, मनो मदीयं बहुमोदमेति । योग्ये विनीते विदुषि स्वशिष्ये, पदप्रदानं ह्युचितं गुरूणाम् ॥ ३१८ ॥ इत्थं समालप्य चिरं गुरूणां, विधाय सद्वन्दनमादरेण । गुर्वाज्ञया श्रेष्ठिवरस्ततो हि, स्वस्थानमागत्य पुनः प्रतस्थे ॥ ३१९ ॥ गते च तस्मिन् दिवसे द्वितीये, भविष्यदाचार्यपदप्रदानम् । सा श्रेष्ठिनी बुद्धिमती जनानां, मुखेन शुश्राव ततोऽतिहृष्टा ॥ ३२० ॥ निजं गुमास्तं गुरुपार्श्वमुक्त्वा, सम्प्रेष्य सूरिं कथयाञ्चकार । स्वामिन् ! मयाऽऽचार्यपदप्रदानं, निशम्यते तद्ध्रुवमेव तर्हि ॥ ३२१ ॥ अपेक्षितं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र समस्तवस्तु, वाञ्छामि सम्पादयितुं किलाऽहम्। महोत्सवं चाऽपि विधातुमस्मि—न्नाज्ञापय त्वं त्वरितं ममैव ॥३२२॥ (युग्मम्)
(मालिनी)—उपकरणमशेषं तस्य संब्रूहि मह्यं, विधिमपि निगद त्वं चाऽनुगृह्याऽधुना माम्। इति तदुदितवाचः सूरि-
राजो निशम्य, तदखिलमवदत्तं सम्यगाचार्यवर्यः ॥ ३२३ ॥ (उपजातिः)—प्रत्यालयं ख्यापयितुं किलैतत्, तामादिश—
द्वैणवरम्यपात्रे। संस्थाप्य सर्वोपकरं तदीयं, विलासिनीमूर्धनि तन्निधाय ॥ ३२४ ॥ जेगीयमाना सधवा सुभूषा, सुकामिनी-
भिर्बहुभिः सुयुक्ता। वाद्याऽऽदिनाऽऽचार्यसमीपमित्वा, समर्पयेत् तत्सकलं च तस्मै ॥ ३२५ ॥ रात्रौ च संगायनवादनाद्यैः,
संनर्तनैर्जागरणं च कुर्युः। इत्यादितत्सर्वविधिं गदित्वा, सायं जगौ संस्कृतसर्वसंघम् ॥ ३२६ ॥ सर्वे च यूयं वशवर्तिनो मे,
शिष्या विनीता बहुभक्तिभाजः। ज्येष्ठत्व-विद्याऽधिकताद्यनेक-सद्धेतुभिर्योग्यतमाय वोऽस्मै। ३२७ ॥ सच्छीलिने श्रीजय-
सागराय, प्रदाय चाऽऽचार्यपदं प्रभाते। स्वकीयकल्याणचिकीर्षयाऽहं, निरन्तरं ध्यानमुपासिताहे ॥ ३२८ ॥ (युग्मम्)
एतच्च सर्वैरनुमोदनीयं, काले च तस्मिन् समुपस्थितैर्हि। मदीयसाधु-श्रमणीभिरेतत्, सुश्रावकैश्चाऽप्यवबोधनीयम् ॥ ३२९ ॥
तस्मिन् दिने सज्जितचन्द्रसौध-द्वितीयभूमावतिविस्तृतायाम्। आनन्दकल्याणिकपीठिकायाः, सौवर्णिकं राजतरम्यनान्दम्
॥ ३३० ॥ आनाय्य शास्त्रोक्तयथाविधानं, संस्थाप्य तस्योपरि पूजनाऽऽदि। प्राचीकरत् सूरिवरस्तदानीं, सच्छ्रेष्ठिनीं श्रीफु-
लकुंवरीं ताम् ॥ ३३१ ॥ तत्पीठिकामुख्यमुनीमकादि-चतुर्विधे संघ उपस्थिते हि। प्राचार्यकश्रीजिनकीर्तिसूरि-र्विधाय सर्वं
विधिमेतकस्मै ॥ ३३२ ॥ सानन्दमाचार्यपदं मुहूर्ते, शुभे नवांशे स्थिरकेऽतिशस्ते। प्रदाय तत्कर्णमथाऽभिपूज्य, श्रीसूरिम-
न्त्राक्षरमप्यदत्त ॥ ३३३ ॥ (युग्मम्) (सुमुखी)—जिनजयसागरसूरिरिदं, गुरुवरदत्तसुनाम वरम्। प्रथितमभूदिह भूमि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तले, विबुधतमस्य कुशाऽग्रधियः ॥ ३३४ ॥ (उपजातिः)—अथाऽऽसनं स्वं नवसूरिवर्य–मध्यास्य पूर्वः खलु सूरिराजः । सद्द्वादशावर्तममुं ववन्दे, चाऽऽस्ताऽऽसने स्वे पुनरेव तत्र ॥३३५॥ तदासनाऽऽसन्नधृतासने च, नवीनसूरिर्निषसाद पश्चात् । उत्थाय सूरिं प्रथमं प्रभक्त्या, यथाविधानं प्रणनाम सोऽथ ॥ ३३६ ॥ त्रिकम्बलीलक्षणपट्टसंस्थ–सूर्यासनाऽऽसीन–नवीनसूरिः । व्याख्यानमारब्ध घनप्रणाद–जेत्र्या गिरा संसदि सर्वतोषम् ॥ ३३७ ॥ ततो नवाऽऽचार्यपदारविन्दौ, प्रक्षाल्य चाऽभ्यर्च्य पटोपरिष्टात् । संधारयामास चकार भक्त्या, तदङ्गपूजां विधिवत् सभायाम् ॥ ३३८ ॥ स द्वादशाऽऽतोद्यनिनादपूर्वं, संघैश्चतुर्भिः सह नव्यसूरिः । चैत्यानि गत्वा ह्यभिवन्द्य सर्वान्, जिनांस्ततोऽगाद् ऋषभस्य चैत्यम् ॥ ३३९ ॥ पितामहं श्रीप्रथमं जिनेशं, भक्त्या नमस्कृत्य चिरं प्रणुत्य । विधाय तच्चैत्यसुवन्दनादि, समाययौ श्रीगुरुदेवपार्श्वम् ॥ ३४० ॥ यथाविधि श्रीगुरुदेववर्यं, भक्त्याऽभिवन्द्याऽतुलकीर्तिमन्तम् । उपावसत्तत्र दिने सुविद्वान्, कृत्वा परित्यागमसावतिष्ठत् ॥ ३४१ ॥ अनेकवादित्र–सुनृत्य–गीतै–र्मध्याह्नकाले समभूच्च पूजा । प्रभावना चाऽभवदासनस्य, प्राभातिकी सा किल नालिकेरैः ॥ ३४२ ॥ बभूव रात्रौ प्रभुपूर्णभक्तिः, प्रभावनाऽकारि तथाऽऽसनस्य । प्रातश्च सूरिं नवमाग्रहेण, शालाऽधिपत्नी समपारयत् सा ॥ ३४३ ॥ (वसन्ततिलका)—दौर्जन्यपूर्णमनसः कियतश्च लोकान्, सोपाहसत् परमसज्जनतापकर्तॄन् । सच्छीलसौरभसुवासितसर्वपृथ्वी, सच्छ्रेष्ठिनी सततधर्ममतिः सुशीला ॥ ३४४ ॥ (उपजातिः)—सा श्रेष्ठिनी श्रीफुलकुंवरीह, युगप्रधानस्य गुरोर्गिरा हि । संपूर्णलाभं पदसंप्रदाने, संप्राप्य हर्षं परमं बभार ॥ ३४५ ॥ भूयश्च तादृक्–प्रसरं किलाऽऽप्तुं, विभावयन्ती फुलकुंवरी सा । सच्छ्रेष्ठिनी तीर्थपतिं गुरुं च, नंनम्यमाना निजधाम याता ॥ ३४६ ॥ भू–रन्ध्र–नन्द–क्षिति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वत्सरेऽपि, श्रीपादलिप्ते नगरे सुतीर्थे । चक्रे चतुर्मासमतिप्रवृद्धः, संक्षीणजंघाबलको यमीन्द्रः ॥ ३४७ ॥ अतोऽयमत्रैव पवित्रतीर्थे, वस्तुं विनिश्चित्य मनस्यनीहः । अनारतं ध्येयमनुस्मरन् हि, तिष्ठत्यजस्रं नियमेन सोऽत्र ॥ ३४८ ॥ शशाङ्क–नन्दाऽङ्क–धरामिताऽब्दे, तपस्यशुक्ले दशमीसुरेज्ये । पुनर्वसौ भेऽप्यथ सिद्धियोगे, सौभाग्ययोगे मिथुनस्थचन्द्रे ॥ ३४९ ॥ सत्तैतिलाऽऽख्ये करणे दिनस्य, माने नवाऽक्षि–द्वि–गुणप्रमाणे । दिवाकरे मीनगतेऽङ्गरेजी–मासे तृतीये जलधीन्दुसंख्ये ॥३५०॥ तारीखके बाण–हुताशनाऽङ्क–भूवत्सरे यावनशैलमासे । तारीखसूर्ये दल–भूत–राम–भूहायने हैन्दिकचन्द्र–सूर्ये ॥ ३५१ ॥ षड्वादनाऽनन्तरपञ्चमिन्टे, दिवाकरे चाऽभ्युदिते तदस्ते । पञ्चप्रवादोत्तरबाणवार्द्धि–मिण्टे तदित्थं समये प्रशस्ते ॥ ३५२ ॥ प्रभातकाले नवतश्च सार्ध–कामारिपर्यन्तशुभे मुहूर्ते । लग्ने वृषे देवपुरोहितेन, संपूर्णदृष्ट्या प्रविलोकिते हि ॥ ३५३ ॥ चन्द्रे धनस्थे सहजे च केतौ, भूमीसुते पञ्चमभावसंस्थे । जीवे च कामे नवमे च राहौ, सूर्ये शनौ ज्ञे दशमस्थिते च ॥३५४॥ लाभस्थिते दैत्यपुरोहिते च, मीने स्वकीयोच्चग्रहे बलिष्ठे । इत्थं शुभालोकितशुद्धलग्ने, बभूव चाऽऽचार्यपदप्रदानम् ॥ ३५५ ॥ ( सप्तभिः कुलकम् ) ( गीतिः )––जङ्गमयुगप्रधानो, भट्टारकपुरन्दर–योगिराजः । जगतां पूज्यः प्रातः–स्मरणीयः सर्वतन्त्रस्वतन्त्रः ॥ ३५६ ॥ सूरिचक्रचक्रवर्त्ती, शासनसम्राट् सर्वज्ञकल्पो हि । परमश्रीगुरुदेवः, श्रीमान् कृपाचन्द्रसूरीशः ॥३५७॥ स्वसाध्वादिसमुदाये, ज्येष्ठाऽन्तेवासिनं चैनमर्हम् । अवगत्य परम्परया–ऽऽयातां परिपाटीं च परित्रातुम् ॥ ३५८ ॥ व्योमा–ऽङ्क–नंव–शशिवर्षे, तपस्यशुक्लपञ्चमीरविवारे । रेवत्यां शुभयोगे, वर्द्धमानयोगबवकरणे ॥ ३५९ ॥ तिष्ठति मेषे चन्द्रे, शतभिषानक्षत्रसंगते सूर्ये । नव–दशवादनसमये, सह सूरिमन्त्रेण पदमाचार्यम् ॥ ३६० ॥ ददिवाञ्छ्रीमज्जिनजय–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सागरसूरिरिति शुभनाम तदीयम् । प्रथयामास च सकले, श्रीसंघे जिनकृपाचन्द्रसूरिः ॥३६१॥ ( षड्भिः कुलकम् )

( उपजातिः )—दीक्षा च लध्वी समभूदमुष्य, सत्पत्तने जेसलमेरसंज्ञे । षट् –पञ्च–नन्देन्दु[१९५६]मिते च वर्षे, माघेऽसिते नागतिथौ सुवारे ॥ ३६२ ॥ गुर्वी च साऽभूद् हय–बाण–नन्द–भू[१९५७]र्वत्सरे कार्तिकपूर्णिमायाम् । अङ्का–ऽश्व–रन्ध्र[१९७९]–क्षिति-संख्यवर्षे, सत्पत्तने सूर्यपुरे तपस्ये ॥ ३६३ ॥ शुभे मुहूर्ते ददिवानुपाध्या–येत्येतदस्मै पदमाग्रहेण । सिद्धाचले खा–ऽङ्क[१९९०]–नवै-कवर्षे, ह्यागृह्य चाचार्यपदं व्यतारीत् ॥ ३६४ ॥ वर्षात्परं श्रीजिनकीर्तिसूरिः, क्षान्त्यादिसाद्गुण्यमुपेयिवन्तम् । गच्छाधिपत्ये विनियुज्य नैजे, पट्टे तमेनं समतिष्ठिपच्च ॥ ३६५ ॥ इत्थं व्यवस्थाप्य समस्तकृत्य–मिष्टस्मृतिध्यानपरायणोऽसौ । समाधि-लीनो धुतसर्वपापः, स देवतामूर्तिरिव व्यभासीत् ॥ ३६६ ॥

(शार्दूलविक्रीडितम्)—एतस्मिन्समये बृहत्खरतरैर्गच्छाग्रणीश्रेष्ठिभिः, श्रीमन्मान्ययुगाग्रणीजिनकृपाचन्द्राख्यसूरीश्वरम् । आनेतुं नगरेऽव्यराजनगरे शिष्यैः प्रशिष्यैः समं, श्रीसिद्धाचलतः सुसिद्धपुरुषं संघाग्रहान्मन्त्रितम् ॥ ३६७ ॥

( उपजातिः )—कोष्ठारिकः श्रीमणिलालनामा, श्रेष्ठीश्वरो मोहनलालपुत्रः । तथा धनी मङ्गलदास ईभ्यो, डाह्यादि-भाईसुतसुप्रसिद्धः ॥ ३६८ ॥ भाण्डारिमुख्यो धनिचन्दुलालः, श्रेष्ठ्यग्रणीर्मोहनलालपुत्रः । माणिक्यलालेति शुभाभि-धानः, श्रीकालिदासाख्यतनूभवो वै ॥ ३६९ ॥ इत्यादिमुख्यैः पुरसंघमान्यै–रहम्मदावादनिवासिभिश्च । धर्म्यग्रणीश्रा-वकवर्यवर्गा–ग्रहैर्गुरोरागमकाङ्क्षिभिर्वै ॥ ३७० ॥ हस्ताक्षरैः सार्धमनेकसंख्यैः, पत्रं लिखित्वा शुभभावपूर्वम् । सूरीश्व-राणां सविधे स्वकीयः, प्रेष्यो जनः प्रेषित आप्त इभ्यः ॥ ३७१ ॥ ( चतुर्भिः कलापकम् ) श्रीपादलिप्ताख्यपुरं स



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गत्वा, तां प्रार्थनां संघकृतां च भव्यः। सूरीश्वराणां चरणौ प्रणम्य, न्यवेदयत् पत्रमसौ सहर्षम् ॥ ३७२ ॥ तत्प्रार्थनां भावयुतां विदित्वा, श्रीसूरिशिष्यो जयसागराख्यः। आचार्यवर्याऽनुमतिं गृहीत्वा, संघाऽर्थनास्वीकृतिमन्वमंस्त ॥ ३७३ ॥ भट्टारकाऽङ्गीकृतमर्थनं ते, श्रुत्वा सहर्षं पुरसंघमुख्याः। गुरूत्तमानां वरसत्कृतार्थं, सज्जाः समासन् समसाधनौघैः ॥ ३७४ ॥ द्वि-नन्द-नन्दैक मिते ( १९९२ ) हिते ते, श्रीवैक्रमीये शुभवत्सरे वै। मासोत्तमे श्रीशुभफाल्गुनाऽऽह्वे, पक्षे सिते पञ्चमिते तिथौ हि ॥ ३७५ ॥ बृहस्पतेर्वासरसौम्यलग्ने, श्रीपादलिप्ताख्यपुरात् प्रयाणम्। आचार्यवर्या जिनधर्मधुर्याः, कृपादिचन्द्राऽभिधसूरिसूर्याः ॥ ३७६ ॥ श्रीजङ्गमादियुगयुक्प्रधाना, भट्टारकादिपदवीप्रसिद्धाः। शिष्यैः प्रशिष्यैः सह विज्ञवर्यै-स्तदा व्यहार्षुर्वरसाधुवर्याः ॥ ३७७ ॥ ( त्रिभिर्विशेषकम् ) तत्रैव चैत्रस्य शुभाऽऽद्यपक्षे, चन्द्रे तिथौ पञ्चमिते सुलग्ने। वाद्येषु चित्रेषु हि वाद्यमाने-ष्वहम्मदावादपुरेऽविशंस्ते ॥ ३७८ ॥ ( शार्दूलविक्रीडितम् )—तस्मिन्नेव दिने पुरे समभवत् पूजाप्रभृत्युत्सवो, नालीकेरफलप्रभावनविधिश्रीसंघसत्कारितः। अस्मिन् श्रीमुनिराजसत्कृतिविधौ वैहारिकोऽर्थव्ययो, जातस्तं समपूरयत् खरतरश्रीसंघ उत्साहितः ॥ ३७९ ॥ तस्मिन् गुर्जरराष्ट्र-राजनगरे श्रीमद्गृहैर्मण्डिते, श्रीमच्छ्रीमणिकारपाटकपटौ कोष्ठारिकाणां पथि। संघैः सत्कृतिपूर्वकं खरतरश्रीजैनसूपाश्रये, श्रीमज्जैनमतैकसूरिधुरिणां भव्यः प्रवेशः कृतः ॥ ३८० ॥ श्रीमत्पूज्यमुनीशितुर्जिनकृपाचन्द्राख्यसूरेस्तदा, रोगाऽऽविष्टतनोर्व्ययः समभवद् भैषज्यकार्यादिके। रौप्याणां प्रतिमास मेकशतकं तत्सूरिसेवाकृते, सर्वस्तैः परिपूरितः खरतरैर्गच्छीयसंघैर्मुदा ॥ ३८१ ॥

( उपजातिवृत्तम् )—द्वि-नन्दे-नन्दैकमिते वरेण्ये, श्रीविक्रमार्केन्द्रविनिर्मितेऽस्मिन्। तथैव वह्नि-ग्रह-नन्द-चन्द्रे,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रसिद्धसंवत्सरकद्वये ते ॥ ३८२ ॥ अहम्मदावादपुरे न्यवात्सु-स्तदा चतुर्मासविधित्सया वै । संघाग्रहाच्छ्रीजिनपूजनादौ, प्रावीवृतन् सर्वजनान् मुनीशाः ॥ ३८३ ॥ ( युग्मम् ) अत्रान्तरे भारतवर्षवर्य-श्रीमालवाख्यापरिभूषितस्य । राष्ट्रस्य लक्ष्म्याः सुललामतुल्या, वास्तव्यवर्ण्या रतलामपुर्याः ॥ ३८४ ॥ श्रीश्रेष्ठिनी फूलकुमार्यभिख्या, श्रीपादलिप्ताख्यपुरप्रतिष्ठे । स्वका-रिते वै भुवने हि चान्द्रे, ऐच्छन्निवासाय मुनीश्वराणाम् ॥ ३८५ ॥ अहम्मदावादपुरे ततो हि, जन्नाण्युपाह्वं मुनिमं स्वकी-यम् । श्रीचान्दमल्लाभिधमर्थनार्थं, प्रासादसाफल्यकृते नु प्रैषीत् ॥ ३८६ ॥ तथैव सर्वोऽपि पथि व्ययश्च, श्रीपादलिप्ताख्य-पुराऽवधिकः । अहम्मदावादपुराद्धि यः स्यात्, तथैव दातुं प्रतिस्वीकृतः सः ॥ ३८७ ॥ ( अर्थतः चतुर्भिः कलापकम् ) आचार्यवर्यस्य तनुस्तदानीं, रोगाऽभिभूता क्षयिणी सदाऽऽसीत् । किञ्च स्विकां वृद्धतमामवस्थां, निर्वाणकालं सविधे च ज्ञात्वा ॥ ३८८ ॥ श्रीसिद्धक्षेत्राख्यपवित्रतीर्थे, तनोस्तनोस्त्यागविधित्सया वै । स्वजन्मसाफल्यचिकीर्षया ते, तत्प्रार्थनां स्वीकृतवन्त ईशाः ॥ ३८९ ॥ ( युग्मम् ) तथा च तुर्य-ग्रहे[१९९४]-नन्द-चन्द्रे, संवत्सरे पौषसिते च पक्षे । त्रयोदशी-शुक्रदिने व्यहार्षु-रहम्मदावादपुरान्मुनीशाः ॥३९०॥ तस्मान्निरीयात्मविदामधीशा-स्तस्मिन् हि मासोत्तममाघमासे । शुक्लद्वितीया-बुध-वासरे च, श्रीपादलिप्ताख्यपुरेऽगमंस्ते ॥ ३९१ ॥ श्रीसंघमुख्यैर्विविधैर्महैश्च, वाद्यैर्विचित्रैस्सह हर्षपूर्वम् । पुर्यां प्रवेशः शुभभावभव्यैः, सूरीश्वराणां हि कृतस्तदानीम् ॥३९२॥ श्रीपादलिप्ताऽऽगमनस्य पश्चा-दाचार्यवर्यस्य तनुस्तनुत्वम् । रोगाऽ-र्दितत्वादतिरुग्णतायाः, स्वरूपमापद् वमनव्यथाभिः ॥ ३९३ ॥ वर्षे हि तुर्य-ग्रहे[१९९४]-नन्द-चन्द्रे, शुक्ले च पक्षे शुभमाघमासे । एकादशीपुण्यदिने वरेण्ये, बृहस्पतौ साऽभिजितीड्यलग्ने ॥ ३९४ ॥ तथैव सम्यग्मृगशीर्षधिष्ण्ये, समाधियुक्ताः शुभ-

For Private And Personal Use Only

भावपुण्याः । नमस्कृतीः पञ्च मुदा स्मरन्त, आचार्यवर्यास्त्रिदिवं व्यराजन् ॥ ३९५ ॥ ( युग्मम् )

( शार्दूलविक्रीडितम् )—नेतुः श्रीजिनशासनस्य महतः सम्यक्त्वसंसेवितुः, आचार्यैकधुरन्धरस्य विदुषः सत्स्वर्गयात्रा तदा । जैना-ऽजैनमतानुयायिभिरपि श्रीमद्भिरीडचैर्घनै-र्लोकैः शोकयुतैरसंख्यगणनैः संघैर्मिलित्वा कृता ॥ ३९६ ॥ श्रीमन्मुख्यजिनेशपादसविधे श्रीपादलिप्ते पुरे, लक्ष्मीचन्द्रयतेर्वरेण्यवसुधावृक्षादिसाऽलंकृते । उद्याने घृत–चन्दनादिसकलैः सौगन्ध्ययुक्तैः शुभै-र्द्रव्यैः श्रीमुनिपुङ्गवस्य सुतनुः संस्कारिता पावके ॥ ३९७ ॥ ( उपजातिः )—काले च तस्मिन् व्ययिता अभूवन्, आचार्यवर्याऽन्तिमसत्क्रियायाम् । चतुःशतं राजतराजमुद्राः, तस्याऽग्निसंस्कारविधौ तदानीम् ॥ ३९८ ॥ सर्वा हि ताः फूलकुमारीनाम्नी, श्रीचान्द्रमल्लाऽऽह्वधनीशपत्नी । श्रीश्रेष्ठिनी भावयुताऽऽर्पिपत् सा, आचार्यवर्याऽग्रिमभक्तियुक्ता ॥ ३९९ ॥

( द्रुतविलम्बितम् )—मुनिपतावथ नाकसदां पुरे, गतवतीति निमित्तकृते तदा । वरमहोत्सवमष्टदिनात्मकं, कृतवती पुरि फूलकुमारी सा ॥ ४०० ॥ ( उपजातिः )—अष्टाह्निके तत्र महोत्सवे हि, व्ययोऽभवद् रौप्यसहस्रकल्पः । तस्मिन्नदाद् रौप्यशतत्रयीं हि, श्रेष्ठिन्यसौ फूलकुमार्यभिख्या ॥ ४०१ ॥ गार्हस्थ्यवासादथ तच्चतुर्मा–सोल्लेखमस्मिंश्चरिकमितस्य । आदर्शभूतस्य समस्तलोके, सर्वज्ञकल्पस्य जितस्मरस्य ॥ ४०२ ॥ स पैत्रिके सद्मनि संन्यवात्सीत्, गुणैक–नन्द–क्षितिसंख्य[१९१३]-वर्षात् । पञ्चा-ऽक्षि-रन्ध्रेन्दु[१९२५]समाश्च यावत्, षडक्षि–रोकैकमिताऽब्द[१९२६]तश्च ॥ ४०३ ॥ भूत-त्रि-नन्द[१९३५]–शशितुल्यसमाऽन्तमेष, प्रख्यातविक्रमपुरे स हि तस्थिवांश्च । तर्का-ऽग्नि–रन्ध्र[१९३६]–धरणीमितवर्षतो हि, छिद्र-त्रि-रोक–कु[१९३९]समाऽवधि रायपूरे ॥ ४०४ ॥ व्योमोदधि–ग्रह[१९४०]-धरामितहायनाच्च, पक्षाऽब्धि[१९४२]काऽवधि स दक्षिणनागपूरे । रामा-ऽब्धि-नन्द[१९४३]–शशिसंख्यसमात एक–पञ्चा[१९५१]श-

दब्दमयमिन्द्रपुरे ह्यतिष्ठत् ॥ ४०५ ॥ अक्षीषु–नन्दे–शशिवत्सर एष तस्थौ, तत्रोदयादिपुरके किल मेदपाटे । संवत्त्रि–भूत–नव–चन्द्रमिते च वर्षे, सद्देसुरीपुरवरे स्थितवांश्च गौडे ॥ ४०६ ॥ ( भुजङ्गप्रयातम् )—चतुष्पञ्च–नन्देन्दुवर्षे महीयान्, पुरे योधपूर्वे मरौ रम्यदेशे । चतुर्मासमस्थादशेषाऽऽग्रहेणा–ऽभवद् धर्मवृद्धिर्भृशं नैकधा हि ॥४०७॥ ( उपजातिः )—स पञ्च–तत्त्वा-ऽङ्क–सुधांशुवर्षे, संतस्थिवान् जेसलमेरुदुर्गे । वर्षर्तुकालं सकलाऽऽगृहीतो, गुरुर्गरीयान् सह भूरि–शिष्यैः ॥ ४०८ ॥ स तर्क–बाणा-ऽङ्क-धरामिताऽब्दे, तस्थौ मरौ श्रीफलवर्द्धिपुर्याम् । श्रीसंघ–बह्वाग्रहतो महीयान्, सद्देशनाऽम्बूनि सदैव वर्षन्, ॥ ४०९ ॥ तुरङ्ग–पञ्च–ग्रह–चन्द्रवर्षे, स विक्रमाऽग्र्यं पुरमध्यवात्सीत् । देशे मरौ वारिदकालमेष, व्यत्येतुकामो वृषमेधयन् हि ॥ ४१० ॥ जेतारणे विक्रमसंवदब्दे, शैलेषु–रन्ध्र–क्षितिसंख्यके हि । चक्रे चतुर्मासमसौ समस्त–जनाऽऽग्रहाच्छासन–वर्धनाय ॥ ४११ ॥ सिद्धाचले नन्द–शशा-ऽङ्क–चन्द्रमात्रे सुवर्षे जितमारदर्पः । सोऽस्थाद् महीयान् प्रणुतप्रभावः, प्रावृष्य-नीहोऽतुलकीर्तिबुद्धिः ॥४१२॥ वियद्–रसाँऽङ्कैकमिते च वर्षे, बोराऽऽदिमद्वन्दरपत्तने हि । सौराष्ट्रदेशे जनताऽऽग्रहेण, तस्थौ चतुर्मासमदभ्रबुद्धिः ॥ ४१३ ॥ शशाङ्क–तर्काऽङ्क-महीमिताऽब्दे, कच्छीयमुद्राऽऽदिमबन्दरे हि । अलञ्चकारैष पयोदकालं, सच्छासनौन्नत्यमचीकरच्च ॥ ४१४ ॥ दृक्तर्क–रन्ध्रेन्दुमिति च वर्षे, देशे च कच्छे भुजराजधान्याम् । प्रावृष्यवात्सीत् सह शिष्यवर्गैः, प्रवर्द्धयञ्छासनमुच्चकैः सः ॥ ४१५ ॥ स माण्डवीबन्दर आग्रहेण, कच्छस्थिते वह्नि-षडङ्क–चन्द्रे । वर्षेऽकृत प्रावृषि सन्निवास–मानन्दयन् सङ्घमशेषमेषः ॥ ४१६ ॥ वेदाऽङ्ग–नन्देन्दुमिते च वर्षे, कच्छप्रधाने बिदडाऽभिधाने । महा-पुरेऽस्थाच्चतुरश्च मासान्, प्रबोधयंस्तत्त्वमशेषलोकान् ॥ ४१७ ॥ पञ्चाऽङ्ग–नन्देन्दुमिते च वर्षे, कच्छीयकेऽञ्जारपुरे गरिष्ठे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृत्वा चतुर्मासमशेषभव्या–नबूबुधद् धर्मरहस्यमेषः ॥ ४१८ ॥ रसाऽङ्गरन्ध्र–क्षितितुल्यवर्षे, श्रीपादलिप्ते नगरे सुतीर्थे । अत्याग्रहात् संघजनस्य सोऽयं, पयोदकालं गमयांबभूव ॥ ४१९ ॥ हयाँऽङ्ग–नन्द–क्षितिसम्मितेऽब्दे, श्रीजामपूर्वे नगरे विशाले । सौराष्ट्रदेशे कृतवांश्चतुर्मा–समेधयन्नार्हतशुद्धमार्गम् ॥ ४२० ॥ सौराष्ट्रदेश–कमलालय–मोरबीति–संज्ञे पुरे सुवि-पुले न्यवसत्समेषाम् । अत्याग्रहाज्जलदकालमसौ गरीयान्, नागाऽङ्ग–नन्द–विधुसम्मितवत्सरे हि ॥ ४२१ ॥ श्रीराजपूर्वे नगरे विशाले, सर्वाग्रहान्नन्द–शराङ्क–चन्द्रे । वर्षेऽध्यवात्सीच्चतुरश्च मासान्, तपः समस्तैर्विविधं ह्यकारि ॥ ४२२ ॥ सौरा-ष्ट्रदेशे स हि तीर्थपाद–लिप्ते पुरे बिन्दु–हयाँ–ऽङ्क–चन्द्रे । वर्षे च तस्थौ जनताऽऽग्रहेण, महामहैः प्रावृषि धर्मवृद्ध्यै ॥४२३॥ प्रख्यातिमत्सूर्यपुरे च लाटे, चन्द्राऽश्व–नन्देन्दुमिते च वर्षे । वर्षर्तुकालं गमयाञ्चकार, ह्याडम्बरेणैष गरीयसा हि ॥ ४२४ ॥ स मोहमय्यां पुरि सर्वसंघा-ऽऽग्रहाद् द्वि–वाज्यङ्क–महीमिताऽब्दे । रामाऽश्व–रन्ध्र–क्षितिवत्सरे च, तस्थौ महीयानमितप्रभावः ॥ ४२५ ॥ समुद्र–वाज्यङ्क–शशाङ्कवर्षे, बुहारिकायां पुरि संन्यवात्सीत् । पयोदकालं विबुधाऽग्रगण्यः, सह प्रशिष्यैः परमोपकर्ता ॥ ४२६ ॥ संतस्थिवान् सूर्यपुरे पुरेऽसौ, पञ्चर्षि--रन्ध्र--क्षिति--हायने हि । षडश्व--नन्दैकमिते च वर्षे, वार्षी च वेलाममितोत्सवेन ॥ ४२७ ॥ हयर्षि--नन्दाऽब्जे-समानवर्षे, वटोदरायां पुरि राजधान्याम् । वर्षर्तुकालं समलंचकार, सद्ध्यान--निर्धूतसमस्तपापः ॥ ४२८ ॥ ( मालिनीवृत्तम् )—वसु--हय–नव--चन्द्रे वत्सरे मालवेऽसौ, न्यवसदतुलकीर्तिः ख्याति-मद्रत्नपुर्याम् । जलदसमयमर्हच्छासनौन्नत्यकारी, दुरितचयनिरासी सर्वकर्मप्रणाशी ॥ ४२९ ॥ ग्रह--तुरग--नवेन्दौ विन्द्रपुर्यां नगर्या–मकृत सकलजैनाचार्यचूडामणिः सः । जलदसमयवासं शासनाम्भोजभानु–र्दलित--मदनसारः शुद्धमार्गप्रचारः ॥४३०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ख-गज-नव-शैशाङ्के[१९८०] वत्सरे मालवीये, दशपुरनगरेऽसौ प्रार्थितः सर्वसंघैः । अलमकृत--चतुर्मासीं कषायप्रमुक्तः, कुमतिचयगजानामङ्कशः सप्रभावः ॥ ४३१ ॥ उदयपुरसमाह्वे पत्तनेऽतिप्रसिद्धे, शशि--वसु--नव--चन्द्रे हायने[१९८१] मेदपाटे । जगदुपकृतिकारी कीर्तिधारी सुतारी, स्थितिमकृत चतुर्मास्यां महाडम्बरेण ॥ ४३२ ॥ (उपजातिः)—बालोचराख्ये नगरे मरुस्थे, दलाऽष्ट--नन्दैकमिते च[१९८२] वर्षे । चक्रे चतुर्मासिकसन्निवासं, लाभो महांस्तत्र बभूव तेन ॥ ४३३ ॥ त्र्यष्टाऽङ्कभूमी[१९८३]मितवत्सरेऽसौ, देशे मरौ जेसलमेरुदुर्गे। तस्थौ च मासांश्चतुरश्च सर्वाऽतिप्रार्थनैष महोपकृत्यै ॥४३४॥ स तस्थिवान् वेद--गजाऽङ्कभूमी[१९८४]-प्रमाणवर्षे फलवर्द्धिपुर्याम् । मरौ च देशे प्रचुराग्रहेण, ततान वीरप्रभुशासनं च ॥ ४३५ ॥ शराऽद्रि--नन्देन्दुमिते च[१९८५] वर्षे, सविक्रमे तत्र पुरे पुरे हि। अत्याग्रहात् तत्स्थमहाजनानां, प्रावृष्यवात्सीज्जिनकीर्तिसूरिः ॥४३६॥ षडष्ट-रन्ध्रैकमिते[१९८६] पुनः स, तुरङ्ग-वस्वङ्क[१९८७]-महीमिताऽब्दे । व्यत्यैत् पयोदाऽऽगमकालमेष, तत्रैव पुर्यां सह शिष्यवर्गैः ॥ ४३७ ॥ वस्वष्ट-नन्देन्दुमिते[१९८८] च वर्षे, नवाऽष्ट-रन्ध्रैकमिते च[१९८९] वर्षे । व्योमाऽङ्क-नन्द--क्षिति-संम्मिते[१९९०]ऽब्दे, स पादलिप्ते नगरे ह्यतिष्ठत् ॥ ४३८ ॥

(वंशस्थवृत्तम्)—तथैव चन्द्र-ग्रह[१९९१]-नन्द-भूमिते, स वैक्रमीये शुभवत्सरान्तरे । शत्रुञ्जयाऽलङ्कृतपादलिप्तके, पुरे चतुर्मासविधिं व्यधादसौ ॥ ४३९ ॥ द्वि-नन्द[१९९२]-नन्दैकमिते च वत्सरे, तथाऽग्नि-नन्द-ग्रह[१९९३]-भूमितेऽब्दके । अहम्मदावादपुरे पुरोत्तमेऽवसँश्चतुर्मासमिमे मुनीश्वराः ॥ ४४० ॥ (उपजातिः)—अथोत्तमाचार्यवराः स्वकीयं, निर्वाणकालं सविधे विदित्वा । आदीशपादाश्रितसिद्धशैले, तनोस्तनोस्त्यागविधातुकामाः ॥ ४४१ ॥ अहम्मदावादपुराद् विहृत्य, शिष्यैः प्रशिष्यैः सह सूरिसूर्याः । श्रीपादलिप्ताख्यपुरे पुराणे, पुण्यौघपुष्ट्या पुनरागमँस्ते ॥ ४४२ ॥ (युग्मम्) तत्राऽब्धि-नन्द-ग्रह[१९९४]-भूमितेऽब्दे,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीसिद्धपादाऽब्जपवित्रपुर्याम् । सूरीश्वरास्ते ह्यशीतिवयस्काः, स्वर्गं गता मुक्तकषायकामाः ॥ ४४३ ॥ समां त्रयोविंशतिमेष तस्थौ, गृहे शराऽग्नि–ग्रह–चन्द्र[१९३५]–वर्षे। आषाढशुक्ले शमनस्य तिथ्यां, दीक्षां यतेः श्रीजिनचन्द्रसूरेः ॥ ४४४ ॥ शुभंयु–पाण्यम्बुजयुग्मयोगाद्, जग्राह दर्भाग्रमतिर्मुमुक्षुः । गृहीतदीक्षः स्वगुरोः क्रमाब्जं, श्रयन् मही–तर्क–नवैक–वर्षान्[१९६१] ॥ ४४५ ॥ यावत् समध्यैष्ट स्व–पराऽऽगमीय–ग्रन्थानशेषान् मतिमज्जनाग्र्यः । अथ द्वि–पञ्च[१९५२]–ग्रह–भू–मितायां, क्रियामसावुद्धृतवाननीहः ॥ ४४६ ॥ ( त्रिभिर्विशेषकम् ) त्रि–सप्त[१९७३]–नन्देन्दुमिते शुभेऽब्दे, श्रीपौषमासे तिथिपूर्णिमायाम् । लग्ने शुभाऽनेकखगाऽनुदृष्टे, सत्तारकाढ्ये शुभवासरेऽसौ ॥ ४४७ ॥ श्रीमन्मुनीनामपि मोहकर्त्र्यां, धर्त्र्यां पृथिव्यां प्रथमामभिख्याम् । श्रीमोहमय्याख्यमहामहिम्नि, श्रीभारतोत्कृष्टमहानगर्याम् ॥ ४४८ ॥ चतुर्विधश्रीजिनसंघसेव्यः, कृपादिचन्द्राऽभिधसन्मुनीड्यः । गरिष्ठमाचार्यपदं पदानां, प्रापन्महीन्द्रादिपदाद् वरिष्ठम् ॥ ४४९ ॥ ( त्रिभिर्विशेषकम् )

( शार्दूलविक्रीडितम् )—इत्याचार्यजयाब्धिसूरिरचिते दीव्यन्महाकाव्यके, चातुर्मासिकवेदवर्णनविधौ तद्देशनामिश्रिते । गार्हस्थ्यादिकवणनात्मकमये चित्रैः पदैर्गुम्फिते, नानाऽलङ्कृतिभूषिते समगमत् सर्गो ह्ययं पञ्चमः ॥ ४५० ॥

॥ पञ्चमः सर्गः समाप्तः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## प्रशस्तिः ।



(इन्द्रवज्रा)—श्रीमच्चतुर्विंशतिसज्जिनेन्द्राः, संसारवार्द्धेस्तरितुं सुपोताः । जयन्ति शश्वद् भवभीतिवाराः, पोपूजिताऽशेषजनक्रमाब्जाः ॥ १ ॥ (पृथ्वीच्छन्दः)—चतुर्दशशतीमलं गणभृतां द्विपञ्चाशता—ऽधिकामनिशमादराद् भवकदम्बनाशाय वै । तथा नवपदीमहं नियतसर्वशर्मप्रदां, स्मरामि हृदि संततं सकलविघ्नविच्छित्तये ॥ २ ॥ (उपेन्द्रवज्रा)—नखप्रमाणानि सदैव भक्त्या, स्थानानि वन्दे सकलार्थसिद्ध्यै । तीर्थङ्करीयाऽखिलनामगोत्रा-ऽनुभावकानीह महाफलानि ॥ ३ ॥

(गीतिः)—निर्ग्रन्थ—कौटिक—चन्द्र—वनवासि—सुविहितगच्छ—सुविहितपक्षः । सुविहितपरम्पराकः, खरतर—राजगच्छ—भाणगच्छकादिः ॥ ४ ॥ (उपजातिः)—गच्छान् पवित्रान् विशदान्नमामि, पापौघविद्रावणसंविधातॄन् । श्रीमत्सुधर्माऽन्वयिसद्गुरूंस्ता—नक्षय्यसौख्याय शिवाय सर्वान् ॥ ५ ॥ (स्रग्धरा)—श्रीपूज्याः कीर्तिरत्नाऽभिधवरगुरवः संबभूवुर्महिष्ठाः, सर्वाऽऽशाव्याप्तचन्द्राऽधिकरुचियशसा सच्चरित्रा गरिष्ठाः । प्राप्ताऽनन्तप्रतिष्ठा निज—परसमयज्ञानदाक्षिण्यवन्तः, चन्द्राऽऽख्यस्फारगच्छाऽम्बुजवनदिनपा निर्जिताऽऽत्माऽरिवर्गाः ॥ ६ ॥ (शार्दूलविक्रीडितम्)—यत्पादोदकसेचनेन भविनां तीव्रज्वरादिव्यथा, सद्यो नश्यति वर्द्धधीति सदने कान्ताहरेर्नित्यशः । यद्ध्यानादधुनाऽपि भूरिमनुजा गच्छन्ति सिद्धिं परां, तेऽमी पूज्यतमा दिशन्तु जयिनो नो धीविवृद्धिं सदा ॥ ७ ॥ (इन्द्रवज्रा)—तत्पट्टमेरावुदितो दिनेशो, व्यबोधयद् भव्यसरोरुहाणि । युगप्रधानो गुरुचन्द्रकीर्ति—रत्नाभिधानः प्रभया महत्या ॥ ८ ॥ (स्रग्धरा)—तद्गच्छे संबभूवुर्जगति बहुमहा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धयः कीर्तिमन्तः, श्रीमल्लावण्यशीलप्रमुखगुरुवराः शासनाऽम्भोजसूर्याः । गीतार्थाऽग्र्या गरिष्ठा विबुधजनयुताः कीर्तयः सत्तपस्याः, येषां कीर्तिश्च सिद्धिः स्फुरति बहुतरा चाऽधुनाऽप्युल्लसन्ती ॥ ९ ॥ ( शार्दूलविक्रीडितम् )—स्पर्शात् पाणिसरोरुहस्य भुवने येषां बभूवुर्ध्रुवं, मूर्खाः पण्डितसत्तमा मतिमतामग्र्या यशःश्रीश्रिताः । नानाशास्त्रविचारणे पटुतरा मुक्ताः कषायैः समै–र्योगीन्द्रा गतकल्मषाः सुभविनां सद्बोधिबीजप्रदाः ॥ १० ॥ ( उपेन्द्रवज्रा )—अभूत्तदन्तेसदनन्तकीर्तिः, प्रतापसौभाग्यगणी महीयान् । दक्षः समस्तेष्वयमागमेषु, जितेन्द्रियग्राम उदारवक्ता ॥ ११ ॥ ( मालिनी )—अभययुतविशालाऽऽख्यानभाक् सद्गुणी स, समभवदतुलर्द्धिश्चाऽऽद्य–शिष्यस्तदीयः । विषयिगणविजेताऽऽजन्मसच्छीलपाली, परिणुतगुणराशिः सर्वशास्त्रप्रवीणः ॥ १२ ॥ ( इन्द्रवज्रा )—शिष्यो द्वितीयो गणभृद् बभूवान्, विशालपश्चात्सुमतिः सुधीमान् । तृतीयशिष्यः स हि दानपूर्व–विशालनामा गणधारिवर्यः ॥ १३ ॥ विशालपश्चात्सुमतेर्गणेशः, समुद्रसोमो गणभृत् सुशिष्यः । अजायत ह्येष समस्तविश्व–प्रख्यातिमापन्न तपोभिरुग्रैः ॥ १४ ॥ युक्त्यादिभागस्य बभूव शिष्यो–ऽमृताऽभिधानः क्षितिसत्प्रतिष्ठः । गणी सुवाग्मी बहुशास्त्रवेत्ता, गीतार्थमुख्यो भुवि सूरिराजः ॥ १५ ॥ ( वसन्ततिलका )—श्रीमानुदारमहिमा रविचण्डधामा, कारुण्यवारिपरिपूर्णतरः प्रकूपः । विद्याचणः स हि कृपायुतचन्द्रसूरि–स्तच्छिष्यतामुपययौ गुणरत्नमालः ॥ १६ ॥

( इन्द्रवज्रा )—ज्यायानभूदस्य समस्तविद्या–वार्द्धिः सुशिष्यो बहुभाग्यशाली । आनन्दनामा विबुधाऽग्रगण्यः, स्वल्पेऽपि काले सुरलोकवासी ॥ १७ ॥ शिष्योऽपरः श्रीजिनयुग्जयाब्धि–सूरीश्वरो भूरिमनोज्ञवृत्तैः । श्रीमद्गुरूणां चरितं ह्युदारं, धियाऽतियत्नाद् रचयांचकार ॥ १८ ॥ श्रीमद्गुरोः पादसरोजभृङ्गो, यथाश्रुतं सर्वचरित्रमेतत् । अमत्सराणां सुधियां प्रमोद–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृते यथाबुद्धिबलं लिलेख ॥१९॥ काचित् त्रुटिश्चेदिह मे सुधीभि–र्नैसर्गिकी मानवदृष्टिदोषात्। विशोध्य सर्वैः पठितव्यमेत–दित्येव चाऽहं भृशमर्थयेऽस्मिन् ॥ २० ॥ ( द्रुतविलम्बितम् )—मतिमतः कविताप्रतिभाजुषः, स्खलनमत्र विधौ खलु जायते। तदनिशं गुणगुम्फकृतादरै–स्त्रुटिविशुद्धिकरैर्मयि जायताम् ॥ २१ ॥ (उपजातिः)—श्रीतुर्य–नन्दे–ग्रह–भूमितेऽब्दे, [१९९४] शास्त्रीय-मासेऽसितफाल्गुने च। श्रीगुर्जरस्वीकृतमाघकृष्णे, त्रयोदशी–सोमसुवासरे हि ॥ २२ ॥ नक्रे मृगाङ्के श्रवणाऽभिधे भे, सर्वेष्टसिद्धावभिजिन्मुहूर्ते। श्रीपादलिप्ताख्यपुरे वरेण्ये, चरित्रमेतत् परिपूर्णमासीत् ॥ २३ ॥ ( युग्मम् )

( पुष्पिताग्रावृत्तम् )—इति मुनिततिषु प्रसिद्ध–श्रीम–ज्जिनपदपूर्वकृपादिचन्द्रसूरेः। चरितमनुपमं पठेत् सुभक्त्या, स भवति पुण्यफलाढ्य इहचलोके ॥ २४ ॥

। इति प्रशस्तिः ।

॥ इति श्रीकृपाचन्द्रसूरीश्वरचरितं समाप्तम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only